१८ सिद्धं तूभयान्तर्यात् ।

उरण् रपरः ॥ ५१ ॥

१ उरण्रपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दोषः ।

२ य उः स्थाने स रपर इति चेद् गुणवृद्ध्योरवर्णाप्रतिपत्तिः ।

३ सिद्धं तु प्रसङ्गे रपरत्वात् ।

४ आदेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः ।

५ उदात्तादिषु च ।

६ एकादेशस्योपसंख्यानम्[1] ।

७ अवयवग्रहणात्सिद्धमिति चेदादेशे रान्तप्रतिषेधः[2] ।

८ अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिशेषविसर्जनीयप्रतिषेधः प्रत्ययाव्यवस्था च ।

९ पूर्वान्ते वैवधारणं विसर्जनीयप्रतिषेधो यक्स्वरश्च ।

१० परादावकारलोपौत्वपुक्प्रतिषेधश्चङ्युपधाह्रस्वत्वमिटोऽव्यवस्थाभ्यासलोपोऽभ्यस्ततादिस्वरो दीर्घत्वं च ।

अलोऽन्त्यस्य ॥ ५२ ॥

१ अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः ।

२ इतरथा ह्यनिष्टप्रसङ्गः ।

३ योगशेषे च ।

ङिच्च ॥ ५३ ॥

१ तातङि ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः ।

आदेः परस्य ॥ ५४ ॥

१ अलोऽन्त्यस्यादेः परस्यानेकाल्शित्सर्व

१ प. पुस्तके नास्ति २ प. पुस्तके अवयवग्रहणात्सिद्धमित्यधिकम् ।

स्येत्यपवादविप्रतिषेधात्सर्वादेशः ।

अनेकाल्शित् सर्वस्य ॥ ५५ ॥

स्थानिवदादेशोऽनल्विधौ ॥ ५६ ॥

१ स्थान्यादेशपृथक्त्वादादेशे स्थानिवदनुदेशो गुरुवद्गुरुपुत्र इति यथा ।

२ अल्विधौ प्रतिषेधेऽविशेषणेऽप्राप्तिस्तस्यादर्शनात् ।

३ सामान्यातिदेशे विशेषानतिदेशः ।

४ सत्याश्रये विधिरिष्टः ।

५ प्रतिषेधस्तु प्राप्नोत्यल्विधित्वात् ।

६ न वानुदेशिकस्य प्रतिषेधादितरेण भावः ।

७ आदेश्यल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः ।

८ आदेश्यादेश इति चेत्सुप्तिङ्कृदतिदिष्टेषूपसंख्यानम् ।

९ एकदेशविकृतस्योपसंख्यानम् ।

१० एकदेशविकृतस्यानन्यत्वात्सिद्धम् ।

११ अनित्यविज्ञानं तु तस्मादुपसंख्यानम्[१] ।

१२ अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात् ।

१३ सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वेऽपि स्थानशब्दप्रयोगात् ।

१४ कार्यविपरिणामाद्वा सिद्धम् ।

१५ अपवादप्रसङ्गस्तु स्थानिवत्त्वात् ।

१६ [२]उक्तं वा ।

१७ सिद्धं तु षष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ।

१८ तस्य दोषस्तयादेश उभयप्रतिषेधः ।

१९ जात्याख्यायां वचनातिदेशे स्थानिवद्भावप्रतिषेधः ।

२० ङ्याब्ग्रहणेऽदीर्घः ।

२१ आहिभुवोरीट्प्रतिषेधः ।

२२ वध्यादेशे वृद्धितत्त्वप्रतिषेधः ।

२३ इड्विधिश्च ।

२४ आकारान्तान्नुक्षुक्प्रतिषेधः ।

२५ लोडादेशे शाभावजभावाधित्वहिलोपैत्त्वप्रतिषेधः ।

२६ त्र्यादेशे स्रन्तप्रतिषेधः ।

२७ आम्विधौ च ।

२८ स्वरे वस्वादेशे ।

२९ गोः पूर्वणित्वात्वस्वरेषु ।

३० करोतिपिब्योः प्रतिषेधः ।

३१ [३]उक्तं वा ।

अचः परस्मिन्पूर्वविधौ[४] ॥ ५७ ॥

१ अचः पूर्वविज्ञानादैचोः सिद्धम् ।

२ तत्रादेशलक्षणप्रतिषेधः[५] ।

३ असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः ।

४ असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य भावः ।

५ तस्मात्स्थानिवद्वचनमसिद्धत्वं च ।

६ [६]उक्तं वा[७] ।

---

१ इतः परमधिक प. पुस्तके । एकदेशविकृतेषूपसंख्यानम् । अनादेशत्वात् । रूपान्यत्वाच्च । आदेशः स्थानिवादिति चेन्नानाश्रितत्वात् । आश्रय इति चेदल्विधिप्रसङ्गः । इति भारद्वाजीयपाठः । २ प. पुस्तके इदं नास्ति । ३ प. पुस्तके नास्ति । ४ अपरविधाविति वक्तव्यम् इदमधिकमितः परं प. पुस्तके । ५ प. पुस्तके इतः परमिदमधिकम् । असिद्धवचनात्सिद्धम् । ६ प. पुस्तके नास्ति । ७ प. पुस्तके इतः परमधिकम् । काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति । कल्प्यो हि वाक्यशेषो वाक्यं वक्त्रधीनं हि ॥

७ अनन्तरस्य चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानम् ।
८ पूर्वमात्रस्येति चेदुपधाह्रस्वत्वम् ।
९ गुरुसंज्ञा च ।
१० न वा संयोगस्यापूर्वविधित्वात् ।
११ एकादेशस्योपसंख्यानम् ।
१२ उभयनिमित्तत्वात् ।
१३ उभयादेशत्वाच्च ।
१४ हल्चोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः ।
१५ स्थूलादीनां यणादिलोपेऽवादेशः ।
१६ केकयमित्रय्वोरियादेश एत्वम् ।
१७ उत्तरपदलोपे च ।
१८ यङ्लोपे यणियङुवङः ।
१९ अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः ।
२० अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः ।
२१ द्विर्वचनादयश्च प्रतिषेधे ।
२२ क्सलोपे लुग्वचनम् ।
२३ हन्तेर्घत्वम् ।
२४ ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः ।
२५ यणादेशे युलोपेत्वानुनासिकात्त्वप्रतिषेधः ।
२६ रायात्वप्रतिषेधश्च ।
२७ दीर्घे यलोपप्रतिषेधः ।
२८ अतो दीर्घे यलोपवचनम् ।

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ ५८ ॥

१प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत् ।
२ क्लिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् ।
३ पूर्वत्रासिद्धे च ।
४ प्रयोजनं क्सलोपः सलोपे ।
५ दध आकारलोप आदिचतुर्थत्वे ।
६ हलो यमां यमि लोपे ।
७ अल्लोपणिलोपौ संयोगान्तलोपप्रभृतिषु ।
८ द्विर्वचनादीनि च ।
९ वरेयलोपस्वरवर्जम् ।
१० तस्य दोषः संयोगादिलोपलत्वणत्वेषु ।

द्विर्वचनेऽचि ॥ ५९ ॥

१ आदेशे स्थानिवदनुदेशात्तद्वतो द्विर्वचनम् ।
२ तत्राभ्यासरूपम् ।
३ अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य ।
४ तत्र गाङ्प्रतिषेधः ।
५ कृत्येजन्तदिवादिनामधातुष्वभ्यासरूपम् ।
६ प्रत्यय इति चेत्कृत्येजन्तनामधातुष्वभ्यासरूपम् ।
७ द्विर्वचननिमित्तेऽचि स्थानिवदिति चेण्णौ स्थानिवद्वचनम् ।

१ प. पुस्तके नास्ति । २ प. पुस्तके दिवादीत्यधिकम् ।

८ ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्य ।

अदर्शनं लोपः ॥ ६० ॥

१ [1]लोपसंज्ञायामर्थसतोरुक्तम् ।

२ सर्वप्रसङ्गस्तु सर्वस्यान्यत्रादृष्टत्वात् ।

३ तत्र प्रत्ययलक्षणप्रतिषेधः ।

४ सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात् ।

प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥

१ लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम् ।

२ प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थम् ।

३ योगविभागात्सिद्धम् ।

४ कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धम् ।

५ [2]उक्तं वा ।

६ षष्ठीनिर्देशार्थं तु ।

७ अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः ।

८ सर्वादेशार्थं वा वचनप्रामाण्यात् ।

९ उत्तरार्थं तु ।

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ६२ ॥

१ प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य ।

२ लुक्युपसंख्यानम् ।

३ लोपे हि विधानम् ।

४ न वादर्शनस्य लोपसंज्ञित्वात् ।

५ प्रत्ययादर्शनं तु लुमत्संज्ञम् ।

६ तत्र लुकि श्लुविधिप्रतिषेधः ।

७ न वा पृथक्संज्ञाकरणात् ।

८ लुमति प्रतिषेधाद्वा ।

९ सतो निमित्ताभावात्पदसंज्ञाभावः ।

१० तुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात्परिवीरिति ।

११ सिद्धं तु स्थानिसंज्ञानुदेशादान्यभाव्यस्य ।

१२ भसंज्ञाङीप्ष्फगोरात्वेषु च सिद्धम् ।

१३ तस्य दोषो ङौनकारलोपेत्त्वेम्विधयः ।

१४ प्रयोजनमपृक्तशिलोपे नुममामौ गुणवृद्धिदीर्घत्वेमडाट्श्नम्विधयः ।

१५ भसंज्ञाङीप्ष्फगोरात्वेषु च दोषः ।

न लुमताङ्गस्य ॥ ६३ ॥

१ लुमति प्रतिषेध एकपदस्वरस्योपसंख्यानम् ।

२ सर्वामन्त्रितसिज्लुक्स्वरवर्जम् ।

३ प्रयोजनं ञिनिकिल्लुकि स्वराः ।

४ पथिमथोः सर्वनामस्थाने ।

५ अह्नो रविधौ ।

६ उत्तरपदत्वे चापदादिविधौ ।

७ द्वन्द्वेऽन्त्यस्य ।

८ सिच उसोऽप्रसङ्ग आकारप्रकरणात् ।

९ युष्मदस्मदोः स्थग्रहणात् ।

१० आमि लिलोपात्तस्य चानिघातस्तस्माच्च निघातः ।

११ अङ्गाधिकार इटो विधिप्रतिषेधौ ।

१२ क्रमेदीर्घत्वं च ।

---

[1] प. पुस्तके नास्ति । [2] प. पुस्तके नास्ति ।

१३ न लुमता तस्मिन्निति चेद्धनिणिङादेशास्तल्लोपे ।

अचो ऽन्त्यादि टि ॥ ६४ ॥

अलो ऽन्त्यात्पूर्व उपधा ॥ ६५ ॥

१ उपधासंज्ञायामल्ग्रहणमन्त्यनिर्देशश्चेत्संघातप्रतिषेधः ।

२ अन्त्यविज्ञानात्सिद्धमिति चेन्नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ।

३ प्रयोजनमव्यक्तानुकरणस्यात इतौ ।

४ व्वसोरेद्धावभ्यासलोपश्च ।

५ आपि लोपोऽकोऽनचि ।

६ अत्र लोपोऽभ्यासस्य ।

७ अलोऽन्त्यात्पूर्वोऽलुपधेति वा ।

८ अवचनाल्लोकविज्ञानात्सिद्धम् ।

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ ६६ ॥

तस्मादित्युत्तरस्य ॥ ६७ ॥

१ निर्दिष्टग्रहणमानन्तर्यार्थम् ।

२ तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थं वचनं दध्युदकं पचत्योदनम् ।

३ उभयनिर्देशे विप्रतिषेधात्पञ्चमीनिर्देशः ।

४ प्रयोजनमतो लसार्वधातुकानुदात्तत्वे ।

५ वहोरिष्ठादीनामादिलोपे ।

६ गोतो णित् ।

७ रुदादिभ्यः सार्वधातुके ।

८ आने मुगीदासः ।

९ आमि सर्वनाम्नः सुट् ।

१० घेर्ङित्याण्नद्याः ।

११ याडापः ।

१२ ङमो ह्रस्वादचि ङमुण्नित्यम् ।

१३ विभक्तिविशेषनिर्देशानवकाशत्वादविप्रतिषेधः ।

१४ यथार्थं वा षष्ठीनिर्देशः ।

१५ प्रकल्पकमिति चेन्नियमाभावः ।

१६ प्रकृतिविकाराव्यवस्था च ।

१७ सप्तमीपञ्चम्योश्च भावादुभयत्र षष्ठीप्रक्लृप्तिस्तत्रोभयकार्यप्रसङ्गः ।

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ ६८ ॥

१ शब्देनार्थगतेरर्थस्यासंभवात्तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम् ।

२ न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः ।

३ संज्ञाप्रतिषेधानर्थक्यं वचनप्रामाण्यात् ।

४ मन्त्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सिद्धम् ।

५ सित्तद्विशेषाणां वृक्षाद्यर्थम् ।

६ पित्पर्यायवचनस्य च स्वाद्यर्थम् ।

७ जित्पर्यायवचनस्यैव राजाद्यर्थम् ।

८ झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ।

अणुदित् सवर्णस्य चाप्रत्ययः ॥ ६९ ॥

१ अण्सवर्णस्येति स्वरानुनासिक्यकालभेदात् ।

२ तत्र प्रत्याहारग्रहणे सवर्णाग्रहणमनुपदेशात् ।

३ ह्रस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनम् ।

---

१ प. पुस्तके इतः परमधिकम् अन्त्यविज्ञानात्सिद्धमिति ।

४ वर्णपाठ उपदेश इति चेदवरकालत्वात्परिभाषाया अनुपदेशः ।
५ तस्मादुपदेशः ।
६ तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात्।
७ सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्
८ अनन्यत्वाच्च ।
९ अनेकान्तो ह्यनन्यत्वकरः ।
१० तद्वच्च हल्ग्रहणेषु ।
११ द्रुतविलम्बितयोश्चानुपदेशात् ।
१२ वृत्तिपृथक्त्वं तु नोपपद्यते ।
१३ तस्मात्तत्र तपरनिर्देशात्सिद्धम्।

तपरस्तत्कालस्य ॥ ७० ॥

१ तपरस्तत्कालस्येति नियमार्थमिति चेद्दीर्घग्रहणे स्वरभिन्नाग्रहणम् ।
२ प्रापकमिति चेद्ध्रस्वग्रहणे दीर्घप्लुतप्रतिषेधः ।
३ विप्रतिषेधात्सिद्धम् ।
४ द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ।
५ सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यन्ते[२] ।

आदिरन्त्येन सहेता ॥ ७१ ॥

१ आदिरन्त्येन सहेतेत्यसंप्रत्ययः संज्ञिनोऽनिर्देशात् ।
२ सिद्धं त्वादिरिता सह तन्मध्यस्येति वचनात् ।
३ संबन्धिशब्दैर्वा तुल्यम् ।

येन विधिस्तदन्तस्य ॥ ७२ ॥

१ येन विधिस्तदन्तस्येति चेद्ग्रहणोपाधीनां तदन्तोपाधिप्रसङ्गः ।
२ सिद्धं तु विशेषणविशेष्ययोर्यथेष्टत्वात् ।
३ समासप्रत्ययविधौ प्रतिषेधः ।
४ उगिद्वर्णग्रहणवर्जम् ।
५ अकच्छ्रम्वतः सर्वनामाव्ययधातुविधावुपसंख्यानम् ।
६ सिद्धं तु तदन्तान्तवचनात् ।
७ तदेकदेशविज्ञानाद्वा सिद्धम् ।
८ प्रयोजनं सर्वनामाव्ययसंज्ञायाम् ।
९ उपपदविधौ भयाढ्यादिग्रहणम् ।
१० ङीब्विधावुगिद्ग्रहणम् ।
११ प्रतिषेधे स्वस्रादिग्रहणम् ।
१२ अपरिमाणबिस्तादिग्रहणं च प्रतिषेधे ।
१३ दिति ।
१४ रोण्या अण् ।
१५ तस्य च ।
१६ रथसीताहलेभ्यो यद्विधौ ।
१७ सुसर्वार्धदिक्शब्देभ्यो जनपदस्य ।
१८ ऋतोर्वृद्धिमद्विधाववयवानाम् ।
१९ ठञ्विधौ संख्यायाः ।
२० धर्मान्नञः ।
२१ पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ।
२२ प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु ।
२३ महदप्स्वसृनप्तृणां दीर्घविधौ ।
२४ पद्युष्मदस्मदस्थ्याद्यनडुहो नुम् ।
२५ द्युपाथिमथिपुंगोसखिचतुरनडुत्त्रिग्रहणम्।

१ इदं प. पुस्तके नास्ति । २ प. पुस्तके इतः परमाधिकं भेर्यांघातवत् ।

२६ त्यदादिविधिभस्त्रादिस्त्रीग्रहणं च।

२७ वर्णग्रहणं च सर्वत्र।

२८ प्रत्ययग्रहणं चापञ्चम्याः।

२९ यस्मिन्विधिस्तदादावल्ग्रहणे।

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥ ७३ ॥

१ वृद्धसंज्ञायामजसंनिवेशादनादित्वम्।

२ एकान्तादित्वे च सर्वप्रसङ्गः।

३ सिद्धमजाकृतिनिर्देशात्।

४ व्यञ्जनस्याविद्यमानत्वं यथान्यत्र।

५ वा नामधेयस्य।

६ गोत्रोत्तरपदस्य च।

७ गोत्रान्ताद्वासमस्तवत्।

८ जिह्वाकात्यहरितकात्यवर्जम्।

त्यदादीनि च ॥ ७४ ॥

एङ् प्राचां देशे ॥ ७५ ॥

प्रथमाध्यायस्य प्रथमः पादः।

गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ १ ॥

१ ङित्किद्वचने तयोरभावादप्रसिद्धिः।

२ भवतीति चेदादेशप्रतिषेधः।

३ संज्ञाकरणे ङिद्ग्रहणेऽसंप्रत्ययः शब्दभेदात्।

४ तद्वदतिदेशेऽकिद्विधिप्रसङ्गः।

५ सिद्धं तु प्रसज्यप्रतिषेधात्।

६ सर्वत्र सन्नन्तात्मनेपदप्रतिषेधः।

७ सिद्धं तु पूर्वस्य कार्यातिदेशात्।

८ पृथगनुबन्धत्वे प्रयोजनं वचिस्वपियजादीनामसंप्रसारणं सार्वधातुकचङादिषु।

९ जाग्रोऽगुणविधिः।

१० कुटादीनामिट्प्रतिषेधः।

११ क्त्वायां कित्प्रतिषेधश्च।

विज इट् ॥ २ ॥

विभाषोर्णोः ॥ ३ ॥

सार्वधातुकमपित् ॥ ४ ॥

१ अपिन्ङिदिति चेच्छ्वेकादेशप्रतिषेध आदिवत्त्वात्।

२ न पिन्ङिदिति चेदुत्तमैकादेशप्रतिषेधः।

असंयोगाल्लिट् कित् ॥ ५ ॥

१ ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन।

२ उक्तं वा[1]।

इन्धिभवतिभ्यां च ॥ ६ ॥

१ इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां किद्वचनानर्थक्यम्[2]।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ ७ ॥

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥

इको झल् ॥ ९ ॥

हलन्ताच्च ॥ १० ॥

१ दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम्[3]।

---

१ प. पुस्तके नास्ति। २ प. पुस्तके इतः परमधिकम्। इकः कित्त्वं गुणो मा भूत्। दीर्घारम्भात्। कृते भवेत्। अनर्थकं तु हस्वार्थम्। दीर्घाणां तु प्रसज्यते। सामर्थ्याद्धि पुनर्भाव्यम्। ऋदित्वं दीर्घसंश्रयम्। दीर्घाणां नाकृते दीर्घे। णिलोपस्तु प्रयोजनम्। ३ प. पुस्तके इतः परमधिकम् इच्च कस्य तकारत्वम्। दीर्घो मा भूत्। ऋतेऽपि सः। अनन्तरे प्लुतो मा भूत्। प्लुतश्च विषये स्मृतः। न सेडिति कृते कित्त्वे। निष्ठायामवधारणात्। ज्ञापकान्न परोक्षायाम्। सनि झल्ग्रहणं विदुः। इत्त्वं कित्संनियोगेन। रेण तुल्यं सुधीवनि। वस्वर्थम्। किदतीदेशात्। निगृहीतिः। क्त्वा च विग्रहात्।

लिङ्सिचावात्मनेपदेषु ॥ ११ ॥
उश्च ॥[1] १२ ॥
वा गमः ॥ १३ ॥
हनः सिच् ॥ १४ ॥
यमो गन्धने ॥ १५ ॥
विभाषोपयमने ॥ १६ ॥
स्थाघ्वोरिच्च ॥ १७ ॥
न क्त्वा सेट् ॥ १८ ॥
निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः १९
मृषस्तितिक्षायाम् ॥ २० ॥
उदुपधाद्भावादिकर्मणोरन्यतरस्याम् २१
१ उदुपधाच्छपः ।
पूङः क्त्वा च ॥ २२ ॥
१ पूङः क्त्वानिष्ठयोरिटि वा प्रसङ्गः सेट्प्रकरणात् ।
२ न वा सेट्त्वास्याकिदाश्रयत्वादनिटि वा कित्त्वम् ।
३ इड्विधौ ह्यग्रणम्[2] ।
नोपधात् थफान्ताद्वा ॥ २३ ॥
वञ्चिलुञ्च्यृतश्च ॥ २४ ॥
तृषिमृषिकृशेः काश्यपस्य ॥ २५ ॥
रलो व्युपधाद्धलादेः संश्च ॥ २६ ॥
१ रलः क्त्वासनोः कित्त्वम् ।
ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥
१ ह्रस्वादिषु समसंख्याप्रसिद्धिर्निर्देशवैषम्यात् ।
२ सिद्धं तु समसंख्यत्वात् ।
३ त्रयाणां हि विकारनिर्देशः ।
४ दीर्घप्लुतयोस्तु पूर्वसंज्ञाप्रसङ्गः ।
५ सिद्धं तु तपरनिर्देशात् ।
६ द्रुतादिषु चोक्तम् ।

अचश्च ॥ २८ ॥
१ ह्रस्वादिविधिरलोऽन्त्यस्येति चेद्वाचिप्रच्छिशमादिप्रभृतिहानिगमिदीर्घेष्वज्ग्रहणम् ।
२ अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वनन्त्यप्रतिषेधः ।
३ संज्ञया विधाने नियमः ।
४ अज्ग्रहणं संयोगाच्समुदायनिवृत्त्यर्थम् ।

उच्चैरुदात्तः ॥ २९ ॥
१ उच्चनीचस्यानवस्थितत्वात्संज्ञाप्रसिद्धिः ।
२ सिद्धं तु समानप्रक्रमवचनात् ।

नीचैरनुदात्तः ॥ ३० ॥
समाहारः स्वरितः ॥ ३१ ॥
१ समाहारोऽचोश्चेन्नाभावात् ।
२ गुणयोश्चेन्नाच्प्रकरणात् ।
३ सिद्धं त्वच्समुदायस्याभावात्तद्गुणे संप्रत्ययः ।

तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥
१ स्वरितस्यार्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थम् ।
२ स्वरितोदात्तार्थं च ।

[1] प. पुस्तके इतः परमधिकम् । नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थम् इति भारद्वाजीयः पाठः। [2] इदं प. पुस्तके नास्ति ।

३ स्वरितोदात्तात्स्वरितार्थम् ।

४ स्वरितपरसन्नतरार्थं च ।

५ देवब्रह्मणोरनुदात्तवचनं ज्ञापकं स्वरितादिति सिद्धत्वस्य ।

एकश्रुति दूरात्संबुद्धौ ॥ ३३ ॥

यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥

उच्चैस्तरां वा वषट्कारः ॥ ३५ ॥

विभाषा छन्दसि ॥ ३६ ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ ३७ ॥

१ सुब्रह्मण्यायामोकार उदात्तः ।

२ आकार आख्याने परादिश्च ।

३ वाक्यादौ च द्वे द्वे ।

४ मघवन्वर्जम् ।

५ सुत्यापराणामन्तः ।

६ असावित्यन्तः ।

७ अमुष्येत्यन्तः ।

८ स्यान्तस्योपोत्तमं च ।

९ वा नामधेयस्य ।

देवब्रह्मणोरनुदात्तः ॥ ३८ ॥

१ देवब्रह्मणोरनुदात्तत्वमेके ।

स्वरितात्संहितायामनुदात्तानाम् ॥ ३९ ॥

१ स्वरितात्संहितायामनुदात्तानामिति चेद्व्येकयोरैकश्रुत्यवचनम् ।

२ अविशेषेणैकश्रुत्यामिति चेद्व्यवहितानामप्रसिद्धिः ।

३ अनेकमपीति तु वचनात्सिद्धम् ।

उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥

अपृक्त एकाल् प्रत्ययः ॥ ४१ ॥

१ अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलोऽग्रहणार्थम्[1] ।

२ अणिञोर्लुगर्थमिति चेण्णेऽतिप्रसङ्गः ।

३ वचनप्रामाण्यादिति चेत्फग्निवृत्त्यर्थं[2] वचनम् ।

४ पैलादिषु वचनात्सिद्धम् ।

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ ४२ ॥

१ तत्पुरुषः समानाधिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः ।

२ सिद्धं तु पदसामानाधिकरण्यात् ।

प्रथमानिर्दिष्टं समास उपसर्जनम् ॥ ४३ ॥

१ प्रथमानिर्दिष्टं समास उपसर्जनमिति चेचेदनिर्देशात्प्रथमायाः समासे संज्ञाप्रसिद्धिः ।

२ सिद्धं तु समासविधाने वचनात् ।

३ न वा तादर्थ्यात्ताच्छब्द्यम् ।

४ यस्य विधौ प्रथमानिर्देशस्ततोऽन्यत्राप्युपसर्जनसंज्ञाप्रसङ्गः ।

५ सिद्धं तु यस्य विधौ तं प्रतीति वचनात्[3] ।

६ षष्ठ्यन्तयोश्चोपसर्जनत्व उक्तम् ।

७ उक्तं वा[3] ।

एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥

१ एकविभक्तावषष्ठ्यन्तवचनम् ।

२ उक्तं वा[3] ।

३ प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गाः क्त्वार्थे ।

---

१ प. पुस्तके इतः परमधिकम् । अणिञोर्लुगर्थमल्ग्रहणम् । २ प. पुस्तके इतः परमधिकम् नाप्रतिषेधात् अप्राप्तेर्वा । ३ इदं प. पुस्तके नास्ति ।

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ४५

१ अर्थवत्यनेकपदप्रसङ्गः ।
२ समुदायोऽनर्थक इति चेदवयवार्थवत्त्वात् समुदायार्थवत्त्वं यथा लोके ।
३ वाक्यप्रतिषेधोऽर्थवत्त्वात् ।
४ पदार्थादन्यस्यानुपलब्धिरिति चेत्पदार्थाभिसंबन्धस्योपलब्धिः ।
५ तस्मात्प्रतिषेधः ।
६ अर्थवत्समुदायानां समासग्रहणं नियमार्थम् ।
७ अर्थवत्ता नोपपद्यते केवलेनावचनात् ।
८ न वा प्रत्ययेन नित्यसंम्बन्धात्केवलस्याप्रयोगः ।
९ सिद्धं त्वन्वयव्यतिरेकाभ्याम् ।
१० वर्णस्यार्थवदनर्थकत्व उक्तम् ।
११ संघातार्थवत्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः ।
१२ निपातस्यानर्थकस्य प्रातिपदिकत्वम् ।
१३ अप्रत्यय इति चेत्तिवेकादेशे प्रतिषेधोऽन्तवत्त्वात् ।
१४ न प्रत्यय इति चेदूङेकादेशे प्रतिषेध आदिवत्त्वात् ।
१५ सुब्लोपे च प्रत्ययलक्षणत्वात् ।

कृत्तद्धितसमासाश्च ॥ ४६ ॥

१ समासग्रहण उक्तम्[1] ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ४७ ॥

१ नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिब्निवृत्त्यर्थम् ।
२ अव्ययप्रतिषेधः ।
३ न वा लिङ्गाभावात् ।
४ यणेकादेशदीर्घैत्त्वेषु प्रतिषेधः ।
५ यणेकादेशदीर्घैत्त्वेषु बहिरङ्गलक्षणत्वात्सिद्धम् ।

गोस्त्रियोरुपसर्जनस्य ॥ ४८ ॥

१ उपसर्जनह्रस्वत्वे च ।
२ गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम् ।
३ ईयसो बहुव्रीहौ पुंवद्वचनम् ।
४ पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थम् ।
५ कपि च ।
६ द्वन्द्वे च ।
७ [2]उक्तं वा ।

लुक्तद्धितलुकि ॥ ४९ ॥

१ तद्धितलुक्यवन्त्यादीनां प्रतिषेधः ।
१ तद्धितलुक्यवन्त्यादीनामप्रतिषेधोऽलुक्परत्वात्[3] ।

इद्गोण्याः ॥ ५० ॥

लुपि युक्तवद्व्यक्तिवचने ॥ ५१ ॥

१ अन्यत्राभिधेयव्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः ।
२ लुपोऽदर्शनसंज्ञित्वादर्थगतिर्नोपपद्यते ।

---

१ इदं प. पुस्तके नास्ति । २ इदं प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । इद्गोण्या नेति वक्तव्यम् । ह्रस्वता हि विधीयते । इति वा वचने तावत् । मात्रार्थं वा कृतं भवेत् । गोण्या इत्त्वं प्रकरणात् । सूच्याद्यर्थमथापि वा ।

३ न वा दर्शनस्याशक्यत्वादर्थगतिः साहचर्यात् ।

४ योगाभावाच्चान्यस्य ।

५ समास उत्तरपदस्य बहुवचनस्य लुपः ।

विशेषणानां चाजातेः ॥ ५२ ॥

१ विशेषणानां वचनं जातिनिवृत्त्यर्थम् ।

२ समानाधिकरणत्वात्सिद्धम् ।

३ हरीतक्यादिषु व्यक्तिः ।

४ खलतिकादिषु वचनम् ।

५ मनुष्यलुपि प्रतिषेधः ।

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३ ॥

लुब्योगाप्रख्यानात् ॥ ५४ ॥

योगप्रमाणे च तदभावेऽदर्शनं स्यात् ॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ ५६ ॥

कालोपसर्जने च तुल्यम् ॥ ५७ ॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ ५८ ॥

१ जात्याख्यायां सामान्याभिधानादैकार्थ्यम् ।

२ तत्रैकवचनादेश उक्तम्[१] ।

३ अर्थातिदेशात्सिद्धम् ।

४ संख्याप्रयोगे प्रतिषेधः ।

५ अस्मदो नामयुवप्रत्यययोश्च[२] ।

६ अशिष्यं वा बहुवत्पृथक्त्वाभिधानात् ।

७ जातिशब्देन हि द्रव्याभिधानम् ।

अस्मदो द्वयोश्च ॥ ५९ ॥

फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥

छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥

विशाखयोश्च ॥ ६२ ॥

१ पुनर्वसुविशाखयोः सुपां सुलुक्पूर्वसवर्णेति सिद्धम् ।

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥

सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥

१ प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम् ।

२ तत्रानेकार्थाभिधानेऽनेकशब्दत्वम् ।

३ तस्मादेकशेषः ।

४ एकविभक्ताविति चेन्नाभावाद्विभक्तेः ।

५ पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात् ।

६ समास इति चेत्स्वरसमासान्तेषु दोषः ।

७ अङ्गाश्रये चैकशेषवचनम् ।

८ तिङ्समासे तिङ्समासवचनम् ।

९ तिङ्विप्रतिषेधश्च ।

१० असमासे वचनलोपः ।

११ द्विवचनबहुवचनविधिः ।

१२ द्वन्द्वप्रतिषेधश्च ।

१३ विभक्त्यन्तानामेकशेषे, एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम् ।

१४ न वार्थविप्रतिषेधाद्युगपद्वचनाभावः ।

१५ अनेकार्थाश्रयश्च पुनरेकशेषः ।

१६ तस्मान्नैकशब्दत्वम् ।

---

१ इदं प. पुस्तके नास्ति । २ प. इदमधिकम् । ('अस्मदः सविशेषणस्य प्रयोगेनेत्येव' इत्यपर आह ।)

१७ प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः सरूपत्वात् ।
१८ हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम् ।
१९ न वा पदस्यार्थे प्रयोगात् ।
२० सर्वत्रापत्यादिषूपसंख्यानम् ।
२१ सिद्धं तु समानार्थानामेकशेषवचनात् ।
२२ नानार्थानामपि सरूपाणाम् ।
२३ एकार्थानामपि विरूपाणाम् ।
२४ स्वरभिन्नानां यस्योत्तरस्वरविधिः ।
२५ संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः ।
२६ प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात्
२७ द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात् ।
२८ नैकार्थ्यमिति चेदारम्भानर्थक्यम् ।
२९ अशिष्य एकशेष एकेनोक्तत्वात् ।
३० प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव[1]।
३१ यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेकेनप्यनेकस्याभिधानम्[2] ।
३२ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तत्वात्प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः ।
३३ अभिधानं पुनः स्वाभाविकम् ।
३४ उभयदर्शनाच्च ।
३५ आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायनः ।
३६ प्रख्याविशेषात् ।
३७ अन्यपवर्गगतेश्च ।
३८ ज्ञापकं चैकोपदिष्टम् ।
३९ धर्मशास्त्रं च तथा ।
४० अस्ति चैकमनेकाधिकरणस्थं युगपदितीन्द्रवद्विषयः ।
४१ नैकमनेकाधिकरणस्थं युगपदिति चेत्तथैकशेषे ।
४२ द्रव्याभिधाने ह्याकृत्यसंप्रत्ययः ।
४३ तत्रासर्वद्रव्यगतिः ।
४४ चोदनायां चैकस्योपाधिवृत्तेः ।
४५ द्रव्याभिधानं व्याडिः ।
४६ तथा च लिङ्गवचनसिद्धिः ।
४७ चोदनासु च तस्यारम्भात् ।
४८ न चैकमनेकाधिकरणस्थं युगपत् ।
४९ विनाशे प्रादुर्भावे च सर्वं तथा स्यात् ।
५० अस्ति च वैरूप्यम् ।
५१ तथा च विग्रहः ।
५२ व्यर्थेषु च मुक्तसंशयम् ।
५३ लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात् ।
५४ गुणवचनवद्वा ।
५५ अधिकरणगतिः साहचर्यात् ।
५६ न चैकमनेकाधिकरणस्थं युगपदित्यादित्यवद्विषयः ।
५७ अविनाशोऽनाश्रितत्वात् ।
५८ वैरूप्यविग्रहौ द्रव्यभेदात् ।
५९ व्यर्थेषु च सामान्यात्सिद्धम् ।

१ प. पुस्तके इतः परमधिकम् । नैकार्थ्यम् । २ प. पुस्तके इतः परमधिकम् । यावतामभिधानं तावतां प्रयोगे न्याय्यः । ३ प. पुस्तके इतः परमधिकम् । एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः ।

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ ६५ ॥

स्त्री पुंवच्च ॥ ६६ ॥

पुमान्स्त्रिया ॥ ६७ ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥

१ असरूपाणां युवस्थविरस्त्रीपुंसानां विशेषस्याविवक्षितत्वात्सामान्यस्य च विवक्षितत्वात्सिद्धम् ।

२ ब्राह्मणवत्साब्राह्मणीवत्सयोर्लिङ्गस्य विभक्तिपरस्य विशेषवाचकत्वादनेकशेषः ।

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ ६९ ॥

१ प्रधाने कार्यसंप्रत्ययाच्छेषः ।

२ आकृतिवाचित्वादेकवचनम्[१] ।

पिता मात्रा ॥ ७० ॥

श्वशुरः श्वश्र्वा ॥ ७१ ॥

१ भ्रातृपुत्रपितृश्वशुराणां कारणाद्द्रव्ये शब्दनिवेश इति चेत्तुल्यकारणत्वात् सिद्धम् ।

२ दर्शनं हेतुरिति चेत्तुल्यम् ।

३ तद्विषयं च ।

४ अन्यत्रापि तद्विषयदर्शनात् ।

त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥

१ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि ।

२ अद्वन्द्वतत्पुरुषविशेषणानाम् ।

३ त्यदादीनां सामान्यार्थत्वात् ।

४ परस्य चोभयवाचित्वात्[४] ।

५ पूर्वशेषदर्शनाच्च ।

६ सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम् ।

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री[५] ॥ ७३ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ।

भूवादयो धातवः[६] ॥ १ ॥

१ पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः ।

२ परिमाणग्रहणं च ।

३ क्रियावचन उपसर्गप्रत्ययप्रतिषेधः ।

४ सङ्घातेनार्थगतेः ।

५ अस्तिभवतिविद्यतीनां धातुत्वम् ।

६ प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यन्तरेषु । धातोश्चार्थभेदात्प्रत्ययान्तरेषु ।[७] सिद्धं त्वन्वयव्यतिरेकाभ्याम् ।

७ क्रियाविशेषक उपसर्गः ।

८ भाववचने तदर्थप्रत्ययप्रतिषेधः ।

९ इतरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः ।

१० सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः ।

११ प्रथमभावग्रहणं च ।

---

१ प. पुस्तके इतः परमधिकम् भ्रातृपुत्रपितृश्वशुराणां कारणाद् द्रव्ये शब्दनिवेशः । २ प. पुस्तके इतः परमधिकम् दर्शनं वै हेतुः । ३ प. पुस्तके इदमधिकमितःपरम् । न वा एष लोके संप्रत्ययः । ४ इदं प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकं वार्तिकम् । अनेकशफेष्विति वक्तव्यम् । प. पुस्तके इतः परमधिकम् । भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते । ७ सिद्धं तु इत्यधिकं कीलहॉर्नपाठे । अपि तूत्तमेषु हस्तलिखितेषु न दृश्यते ।

१२ भूवादिपाठः प्रातिपदिकाणपयत्यादिनिवृत्त्यर्थः ।

१३ स्वरानुबन्धज्ञापनाय च ।

उपदेशेऽजनुनासिक इत् ॥ २ ॥

१ इत्संज्ञायां सर्वप्रसङ्गोऽविशेषात् ।

२ सिद्धं तूपदेशनेऽनुनासिकवचनात् ।

हलन्त्यम् ॥ ३ ॥

१ हलन्त्ये सर्वप्रसङ्गः सर्वान्त्यत्वात् ।

२ सिद्धं तु व्यवसितान्त्यत्वात् ।

३ लकारस्यानुबन्धाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः ।

४ सिद्धं तु लकारनिर्देशात् ।

५ एकशेषनिर्देशाद्वा ।

६ प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते ।

७ इदर्थाभावात्सिद्धम् ।

न विभक्तौ तुस्माः ॥ ४ ॥

१ विभक्तौ तवर्गप्रतिषेधोऽतद्धिते ।

आदिर्ञिटुडवः ॥ ५ ॥

षः प्रत्ययस्य ॥ ६ ॥

चुटू ॥ ७ ॥

१ चुञ्चुप्चणपोश्चकारप्रतिषेधः ।

२ इदर्थाभावात्सिद्धम् ।

३ पित्करणं किमर्थमिति चेत्पर्यायार्थम् ।

४ इर उपसंख्यानम् ।

५ अवयवग्रहणादिति चेदिदिद्विधिप्रसङ्गः।

लशक्वतद्धिते ॥ ८ ॥

तस्य लोपः ॥ ९ ॥

१ इतो लोपे णल्क्त्वानिष्ठासूपसंख्यानमित्प्रतिषेधात् ।

२ सिद्धं तु णलादीनां ग्रहणप्रतिषेधात् ।

३ निर्दिष्टलोपाद्वा ।

४ तत्र तुस्मानां प्रतिषेधः ।

५ न वोच्चारणसामर्थ्यात् ।

६ अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः ।

७ सिद्धं त्वपवादन्यायेन ।

८ भावो हि कार्यार्थोऽनन्यार्थो लोपः ।

९ एकान्तस्तत्रोपलब्धेः ।

१० तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वात् ।

११ अनेकान्ते वृत्तिविशेषः ।

१२ अनन्तर इति चेत्पूर्वपरयोरित्कृतप्रसङ्गः ।

१३ सिद्धं तु व्यवसितपाठात् ।

१४ इतरथा ह्येकान्तेऽपि संदेहः ।

१५ वृत्ताद्वा ।

यथासंख्यमनुदेशः समानाम् ॥ १० ॥

१ संज्ञासमासनिर्देशात्सर्वप्रसङ्गोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थम् ।

२ संज्ञासमासनिर्देशःपृथग्विभक्ति संज्ञ्यनुच्चरणार्थः ।

३ प्रकरणे च सर्वसंप्रत्ययार्थः ।

४ संख्यासाम्यं शब्दतश्चेणलादयः परस्मैपदानां डारौरसः प्रथमस्यायवायाव एच इत्यनिर्देशः ।

१ प. पुस्तके इतः परमाधिकम् । अवयवग्रहणात्सिद्धम् ।

५ अर्थतश्चेल्लुटोर्नन्चरीहणसिन्धुतक्षशिलादिषु दोषः ।
६ आत्मनेपदाविधिनिष्ठासार्वधातुकद्विग्रहणेषु ।
७ एङः पूर्वत्वे प्रतिषेधः ।
८ अतिप्रसङ्गो गुणवृद्धिप्रतिषेधे क्ङिति ।
९ उदिकूले रुजिवहोः ।
१० तच्छीलादिषु धातुत्रिग्रहणेषु ।
११ घञादिषु द्विग्रहणेषु ।
१२ अवे तृस्त्रोः करणाधिकरणयोः ।
१३ कर्तृकर्मणोश्च भूकृञोः ।
१४ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ।
१५ कृभ्वोः क्त्वाणमुलौ ।
१६ अधीयानविदुषोश्छन्दोब्राह्मणानि ।
१७ रोपधेतोः पथिदूतयोः ।
१८ तत्र भवस्तस्य व्याख्यानः क्रतुयज्ञेभ्यश्च ।
१९ संघादिष्वञ्प्रभृतयः ।
२० वेशोयशआदेर्भगाद्यल्खौ ।
२१ ङसिङसोः ख्यत्यात्परस्य ।
२२ न वा समानयोगवचनात् ।
२३ तस्य दोषे विदो लटो वा ।
२४ ध्माधेटोर्नाडीमुष्ट्योश्च ।
२५ खलगोरथादिनित्रकट्यचश्च ।
२६ सिन्ध्वपकाराभ्यां कन् अणञौ च ।
२७ युष्मदस्मदोश्चादेशाः ।

स्वरितेनाधिकारः ॥ ११ ॥

१ अधिकारः प्रतियोगं तस्यानिर्देशार्थः ।
२ न वा निर्दिश्यमानाधिकृतत्वाद्यथा लोके ।
३ अन्यनिर्देशस्तु निवर्तकस्तस्मात्परिभाषा ।
४ अधिकारपरिमाणाज्ञानं तु ।
५ अधिकारपरिमाणाज्ञानार्थं तु नाधिकार इति चेदुक्तम् ।
६ यावतिथोऽलनुबन्धस्तावतो योगाननतिवचनात्सिद्धम् ।
७ भूयसि प्राग्वचनम्[१] ।

अनुदात्तङित आत्मनेपदम् ॥ १२ ॥

१ आत्मनेपदवचनं नियमार्थम् ।
२ लविधानाद्विहितम् ।
३ तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानिवृत्तत्वात् ।
४ क्यष आत्मनेपदवचनं तस्यान्यत्र नियमात् ।
५ प्रकृत्यर्थनियमेऽन्याभावः ।
६ शेषवचनं च ।
७ कर्तरि चात्मनेपदविषये परस्मैपदप्रतिषेधार्थम्[२] ।

भावकर्मणोः ॥ १३ ॥

कर्तरि कर्मव्यतिहारे ॥ १४ ॥

१ कर्मव्यतिहारादिषु कर्तृग्रहणं भावकर्मनिवृत्त्यर्थम् ।
३ न वानन्तरस्य प्रतिषेधात् ।

न गतिहिंसार्थेभ्यः ॥ १५ ॥

१ प्रतिषेधे हसादीनामुपसंख्यानम् ।
२ हरिवह्योरप्रतिषेधः ।

१ प. पुस्तके इतः परं नास्ति । २ प. पुस्तके इतः परमधिकम् । विकरणेभ्यः प्रतिषेधः । ३ प. पुस्तके इतः परमधिकम् । क्रियाव्यतिहार इति वक्तव्यम् ।

इतरेतरान्योऽन्योपपदाच्च ॥ १६ ॥

१ परस्परोपपदाच्च ।

नेर्विशः ॥ १७ ॥

परिव्यवेभ्यः क्रियः ॥ १८ ॥

विपराभ्यां जेः ॥ १९ ॥

आङो दोऽनास्यविहरणे ॥ २० ॥

१ आङो दोऽव्यसनक्रियस्य ।

२ स्वाङ्गकर्मकाच्च ।

क्रीडोऽनुसंपरिभ्यश्च ॥ २१ ॥

१ समोऽकूजने ।

२ आगमेः क्षमायाम् ।

३ शिक्षेर्जिज्ञासायाम् ।

४ किरतेर्हर्षजीविकाकुलायकरणेषु ।

५ हरतेर्गतताच्छील्ये ।

६ आङि नुप्रच्छयोः ।

७ आशिषि नाथः ।

८ शप उपलम्भने ।

समवप्रविभ्यः स्थः ॥ २२ ॥

१ आङः स्थः प्रतिज्ञाने ।

प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥

उदोऽनूर्ध्वकर्मणि ॥ २४ ॥

१ उद ईहायाम् ।

उपान्मन्त्रकरणे ॥ २५ ॥

१ उपाद्देवपूजासंगतकरणयोः[२] ।

२ वा लिप्सायाम् ।

अकर्मकाच्च ॥ २६ ॥

उद्विभ्यां तपः ॥ २७ ॥

१ स्वाङ्गकर्मकाच्च ।

आङो यमहनः ॥ २८ ॥

समो गम्यृच्छिभ्याम् ॥ २९ ॥

१ समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम् ।

२ अर्तिश्रुदृशिभ्यश्च ।

३ उपसर्गादस्यत्यूह्योर्वावचनम् ।

निसमुपविभ्यो ह्वः ॥ ३० ॥

स्पर्धायामाङः ॥ ३१ ॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ॥ ३२ ॥

अधेः प्रसहने ॥ ३३ ॥

वेः शब्दकर्मणः ॥ ३४ ॥

अकर्मकाच्च ॥ ३५ ॥

संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ॥ ३६ ॥

कर्तृस्थे चाशरीरे कर्मणि ॥ ३७ ॥

वृत्तिसर्गतायनेषु क्रमः ॥ ३८ ॥

उपपराभ्याम् ॥ ३९ ॥

आङ उद्गमने ॥ ४० ॥

१ ज्योतिषामुद्गमने ।

वेः पादविहरणे ॥ ४१ ॥

प्रोपाभ्यां समर्थाभ्याम् ॥ ४२ ॥

अनुपसर्गाद्वा ॥ ४३ ॥

अपह्नवे ज्ञः ॥ ४४ ॥

अकर्मकाच्च ॥ ४५ ॥

संप्रतिभ्यामनाध्याने ॥ ४६ ॥

---

१ प. पुस्तके इतः परमधिकम् । उपसर्गग्रहणम् । २ प. पुस्तके इतः परमधिकम् । °मित्रकरणपथिष्विति वक्तव्यमित्यपर आह ।

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥
व्यक्तवाचां समुच्चारणे ॥ ४८ ॥
अनोरकर्मकात् ॥ ४९ ॥
विभाषा विप्रलापे ॥५० ॥
अवाद्ग्रः ॥ ५१ ॥
१ अवाद्ग्रो गिरतेः ।
समः प्रतिज्ञाने ॥५२ ॥
उदश्चरः सकर्मकात् ॥ ५३ ॥
समस्तृतीयायुक्तात् ॥ ५४ ॥
दाणश्च सा चेच्चतुर्थ्यर्थे ॥ ५५ ॥
उपाद्यमः स्वकरणे ॥ ५६ ॥
ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥
नानोर्ज्ञः ॥ ५८ ॥
१ अनोर्ज्ञः प्रतिषेधे सकर्मकवचनम् ।
२ न वाकर्मकस्योत्तरेण विधानात् ।
३ प्रतिषेधः पूर्वस्य च ।
प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥
शदेः शितः ॥ ६० ॥
१ शदे शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः ।
२ सिद्धं तु लडादीनामात्मनेपदवचनात् ।
३ उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानम् ।
४ नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदटोऽपि नित्यनिमित्तत्वादात्मनेपदाभावः ।
५ तस्मादुपसंख्यानम्[1] ।
म्रियतेर्लुङ्लिङोश्च ॥ ६१ ॥
पूर्ववत्सनः ॥ ६२ ॥
१ पूर्ववत्सन इति शदिम्रियत्यर्थम् ।
२ इतरथा हि ताभ्यां सनन्ताभ्यामात्मनेपदप्रतिषेधः ।
३ पूर्वस्यात्मनेपददर्शनात्सन्नन्तादात्मनेपदभाव इति चेज्ञुपादिष्वप्रसिद्धिः ।
४ सिद्धं तु पूर्वस्य लिङ्गातिदेशात् ।
५ क्नूआदिषु तु लिङ्गप्रतिषेधः ।
६ प्रत्ययग्रहणं णियगर्थम् ।
७ तत्र हेतुमण्णिचः प्रतिषेधः ।
आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥६३॥
प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥
समः क्ष्णुवः ॥ ६५ ॥
१ समः क्ष्णुवः सकर्मकार्थम्[2] ।
भुजोऽनवने ॥ ६६ ॥
णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने
१ णेरात्मनेपदविधानेऽण्यन्तस्य कर्मणस्तत्रोपलब्धिः ।
२ इतरथा हि सर्वप्रसङ्गः ।
३ कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं वचनम् ।
४ न वा यक्चिणोः प्रतिषेधात् ।
५ इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः ।
६ आत्मनेपदस्य च ।

१ प. पुस्तके इतःपरमधिकम् । स्वराद्युपसृष्टादिति वक्तव्यम् । स्वराद्यन्तोपसृष्टादिति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अनवनकौटिल्ययोरिति वक्तव्यम् ।

७ आत्मनेपदप्रतिषेधार्थं तु ।

८ आत्मनः कर्मत्वे प्रतिषेधः ।

९ न वा ण्यन्तेऽन्यस्य कर्तृत्वात् ।

भीस्म्योर्हेतुभये ॥ ६८ ॥

गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥

लियः संमाननशालीनीकरणयोश्च ॥ ७० ॥

मिथ्योपपदात्कृञोऽभ्यासे ॥ ७१ ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ ७२ ॥

अपाद्वदः ॥ ७३ ॥

णिचश्च ॥ ७४ ॥

समुदाङ्भ्यो यमोऽग्रन्थे ॥ ७५ ॥

अनुपसर्गाज्ज्ञः ॥ ७६ ॥

विभाषोपपदेन प्रतीयमाने ॥ ७७ ॥

शेषात्कर्तरि परस्मैपदम् ॥ ७८ ॥

१ शेषवचनं पञ्चम्या चेदर्थे प्रतिषेधः ।

२ सप्तम्या चेत्प्रकृतेः ।

३ सिद्धं तूभयनिर्देशात् ।

४ कर्तृग्रहणमनुप्यपराद्यर्थम् ।

अनुपराभ्यां कृञः ॥ ७९ ॥

१ परस्मैपदप्रतिषेधात्कृञादिषु विधानम्[1] ।

२ तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वात् ।

३ न वा द्युतादिभ्यो वावचनात् ।

४ आत्मनेपदनियमे वा प्रतिषेधः[2] ।

अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥

प्राद्वहः ॥ ८१ ॥

परेर्मृषः ॥ ८२ ॥

व्याङ्परिभ्यो रमः ॥ ८३ ॥

उपाच्च ॥ ८४ ॥

विभाषाकर्मकात् ॥ ८५ ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ ८६ ॥

निगरणचलनार्थेभ्यश्च ॥ ८७ ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ ८८ ॥

१ अणावकर्मकादिति चुरादिणिचोऽण्यन्तात्परस्मैपदवचनम् ।

२ सिद्धं त्वतस्मिण्णाविति वचनात् ।

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ ८९ ॥

वा क्यषः ॥ ९० ॥

द्युद्भ्यो लुङि ॥ ९१ ॥

वृद्भ्यः स्यसनोः ॥ ९२ ॥

लुटि च क्लृपः ॥ ९३ ॥

१ पादिषु धेट उपसंख्यानम् ।

॥ प्रथमाध्यायस्य तृतीयः पादः ॥

आ कडारादेका संज्ञा ॥ १ ॥

१ अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम् ।

२ तत्रैकसंज्ञाधिकारे तद्वचनम् ।

३ अङ्गसंज्ञया भपदसंज्ञयोरसमावेशः ।

४ कर्मधारयत्वे तत्पुरुषग्रहणम्[3] ।

५ तत्पुरुषत्वे द्विगुचग्रहणम् ।

६ गतिदिवःकर्महेतुमत्सु च ग्रहणम् ।

७ गुरुलघुसंज्ञे नदीघिसंज्ञे ।

८ परस्मैपदसंज्ञा पुरुषसंज्ञा ।

९ परवचने सिति पदं भम् ।

---

१ प. पुस्तके विधानस्य स्थाने वचनमिति । २ प. पुस्तके इतः परमधिकम् । अदेः प्रतिषेधो वक्तव्यः । ३ प. पुस्तके कर्मधारये तत्पुरुषग्रहणमिति ।

१० गतिबुद्ध्यादीनां ण्यन्तानां कर्म कर्तृसंज्ञम्।
११ शेषवचनं च विसंज्ञानिवृत्त्यर्थम्।
१२ न वा संभवात्।
१३ ह्रस्वलक्षणा हि नदीसंज्ञा विसंज्ञायां च गुणः।
१४ तत्र वचनप्रामाण्यान्नदीसंज्ञायां विसंज्ञाभावः।
१५ आश्रयाभावान्नदीसंज्ञायां विसंज्ञानिवृत्तिरिति चेच्चणादेशाभावः।
१६ नद्याश्रयत्वाच्चणादेशस्य ह्रस्वस्य नदीसंज्ञाभावः।
१७ बहुव्रीह्यर्थं तु
१८ प्रयोजनमव्ययीभावोपमानद्विगुक्लोपेषु।
१९ तत्र शेषवचनाद्दोषः संख्या समानाधिकरणनञ्समासेषु बहुव्रीहिप्रतिषेधः।
२० क्लोपे च शेषवचनात्त्रादिभिर्न बहुव्रीहिः[५]।
२१ एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेन्न क्त्वार्थे प्रतिषेधः।
२२ तत्पुरुष इति चेदन्यत्र क्त्वार्थात्प्रतिषेधः।
२३ सिद्धं तु प्रादीनां क्त्वार्थे तत्पुरुषवचनात्।
२४ प्रयोजनं ह्रस्वसंज्ञा दीर्घप्लुतौ।
२५ तिङ्सार्वधातुकं लिङ्लिटोरार्धधातुकम्।
२६ अपत्यं वृद्धं युवा।
२७ घि नदी।
२८ लघु गुरु।
२९ पदं भम्।
३० अपादानमुत्तराणि धनुषा विध्यति कंसपात्र्यां भुङ्क्ते गां दोग्धि धनुर्विध्यतीति।
३१ क्रुधद्रुहोरुपसृष्टयोः कर्म संप्रदानम्।
३२ करणं पराणि साध्वसिश्छिनत्ति।
३३ अधिकरणं कर्म गेहं प्रविशति।
३४ अधिकरणं कर्ता। स्थाली पचति।
३५ अध्युपसृष्टं कर्म।
३६ गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा।
३७ परस्मैपदमात्मनेपदम्।
३८ समाससंज्ञाश्च।
३९ अर्थवत्प्रातिपदिकम्।
४० गुणवचनं च[६]।
४१ समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गा जातिः।
४२ संख्या।
४३ डु च।
४४ एकद्रव्योपनिवेशिनी संज्ञा।

विप्रतिषेधे परं कार्यम्॥ २॥

१ द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः
२ एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः।
३ तृजादिभिस्तुल्यम्।
४ अनवयवप्रसङ्गात्प्रतिपदं विधेश्च।

१ प. पुस्तकेऽतः परमधिकम्। एक संज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः। २-५ प. पुस्तके इतः नास्ति।
६ प. पुस्तके च स्थाने त्विति।

५ अप्रतिपत्तिर्वोभयोर्तुल्यबलत्वात् ।
६ तत्र प्रतिपत्त्यर्थं वचनम् ।
७ तव्यदादीनां त्वप्रसिद्धिः ।
८ अन्तरङ्गं च ।
९ प्रयोजनं यणेकादेशेत्त्वोत्त्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः ।
१० इण्ङ्शीनामादगुणः सवर्णदीर्घत्वात् ।
११ न वा सवर्णदीर्घत्वस्यानवकाशत्वात् ।
१२ ऊङापेरेकादेश ईत्वलोपाभ्याम् ।
१३ आत्वनपुंसकोपसर्जनह्रस्वत्वान्ययवायावेकादेशतुग्विधिभ्यः ।
१४ तुग्यणेकादेशगुणवृद्ध्यौत्त्वदीर्घत्वेत्वमुमेत्त्वरीविधिभ्यः[2] ।
१५ इयङादेशो गुणात्[2] ।
१६ श्वेः संप्रसारणपूर्वत्वं यणादेशात् ।
१७ ह्व आकारलोपात् ।
१८ स्वरो लोपात् ।
१९ प्रत्ययविधिरेकादेशात्[3] ।
२० लादेशो वर्णविधेः ।
२१ तत्पुरुषान्तोदात्तत्वं पूर्वपदप्रकृतिस्वरात् ।
२२ तस्य दोषः पूर्वपदोत्तरपदयोर्वृद्धिस्वरावेकादेशात् ।
२३ यणादेशादियुवौ ।
२४ ङसि पररूपाच्च ।
२५ लुग्लोपयणयवायावेकादेशेभ्यः ।

यू स्त्र्याख्यौ नदी ॥ ३ ॥

१ नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयत्वार्थम् ।
२ प्रथमलिङ्गग्रहणं च ।
३ प्रयोजनं क्विप्लुप्समासाः ।
४ अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गोऽवयवस्येयङुवङ्स्थानत्वात् ।
५ सिद्धं त्वङ्गरूपग्रहणाद्यस्याङ्गस्येयुवौ तत्प्रतिषेधात् ।
६ ह्रस्वे युव्स्थानप्रवृत्तौ च स्त्रीवचने ।

नेयङुवङ्स्थानावस्त्री ॥ ४ ॥

वामि ॥ ५ ॥

ङिति ह्रस्वश्च ॥ ६ ॥

शेषो घ्यसखि ॥ ७ ॥

पतिः समास एव ॥ ८ ॥

षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥

ह्रस्वं लघु ॥ १० ॥

संयोगे गुरु ॥ ११ ॥

दीर्घं च ॥ १२ ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ।

१ अङ्गसंज्ञायां तदादिवचनं स्यादिनुमर्थम् ।
२ मित्सुटोरुपसंख्यानम् ।
३ सिद्धं तु तदाद्यादिवचनात् ।
४ तदेकदेशविज्ञानाद्वा सिद्धम् ।
५ प्रत्ययग्रहणं पदादावप्रसङ्गार्थम् ।
६ परिमाणार्थं च ।

---

१ प. पुस्तके इतः परमधिकम् ।अनडुनड्भ्यां चेति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् उवङादेशश्चेति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । यणादेशाच्चेति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । अवयवस्त्रीविषयत्वात्सिद्धम् ।

७ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ।

८ प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः ।

९ कृद्ग्रहणे गतिकारकपूर्वस्यापि ।

१० प्रयोजनं समासतद्धितविधिस्वराः ।

सुप्तिङन्तं पदम् ॥ १४ ॥

१ पदसंज्ञायामन्तवचनमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् ।

नः क्ये ॥ १५ ॥

सिति च ॥ १६ ॥

स्वादिष्वसर्वनामस्थाने[1] ॥ १७ ॥

यचि भम् ॥ १८ ॥

१ भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः ।

२ सिद्धमचः स्थानिवत्वात् ।

३ नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ।

४ वृषण्वस्वश्वयोः ।

तसौ मत्वर्थे ॥ १९ ॥

अयस्मयादीनि च्छन्दसि[2] ॥ २० ॥

बहुषु बहुवचनम् ॥ २१ ॥

१ सुप्तिङामविशेषविधानाद्दृष्टविप्रयोगत्वाच्च नियमार्थं वचनम् ।

२ तत्र प्रत्ययानियमेऽव्ययानां पदसंज्ञाभावोऽसुबन्तत्वात् ।

३ अर्थनियमे सिद्धम् ।

द्व्येकयोर्द्विवचनैकवचने ॥ २२ ॥

कारके ॥ २३ ॥

१ कारक इति संज्ञानिर्देशश्चेत्संज्ञिनोऽपि निर्देशः ।

२ इतरथा ह्यनिष्टप्रसङ्गो ग्रामस्य समीपादागच्छतीत्यकारकस्य ।

३ कर्मसंज्ञाप्रसङ्गोऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति ।

४ अपादानं च वृक्षस्य पर्णं पततीति ।

५ न वापायस्याविवक्षितत्वात् ।

६ अन्वर्थमिति चेदकर्तरि कर्तृशब्दानुपपत्तिः ।

७ सिद्धं तु प्रतिकारकं क्रियाभेदात्पचादीनां करणाधिकरणयोः कर्तृभावः ।

८ अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः ।

९ द्रोणं पचत्याढकं पचतीति संभवनक्रिया धारणक्रिया चाधिकरणस्य पाकः ।

१० एधाः पक्ष्यन्त्या विक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः ।

११ उद्यमननिपातनानि कर्तुश्छिदिक्रिया ।

१२ यत्तत्र तृणेन तत्परशोश्छेदनम् ।

१३ इतरथा ह्यसितृणयोश्छेदनेऽविशेषः स्यात् ।

१४ अपादानादीनां त्वप्रसिद्धिः ।

१५ न वा स्वतन्त्रपरतन्त्रत्वात्तयोः पर्यायेण वचनं वचनाश्रया च संज्ञा ।

ध्रुवमपायेऽपादानम् ॥ २४ ॥

१ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्

---

[1] प. पुस्तके इतः परमधिकम् । नाप्रतिषेधात् । अप्राप्तेर्वा । भुवद्वद्भ्यो धारयद्वद्भ्यः पदसंज्ञा वक्तव्या

[2] प. पुस्तके इतः परमधिकम् । उभयसंज्ञान्यपीति वक्तव्यम् ।

२ गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेऽध्रुवत्वात् ।

३ न वाध्रौव्यस्याविवक्षितत्वात् ।

भीत्रार्थानां भयहेतुः ॥ २५ ॥

पराजेरसोढः ॥ २६ ॥

वारणार्थानामीप्सितः ॥ २७ ॥

१ वारणार्थेषु कर्मग्रहणानर्थक्यं कर्तुरीप्सिततमं कर्मेति वचनात् ।

अन्तर्धौ येनादर्शनमिच्छति ॥ २८ ॥

आख्यातोपयोगे ॥ २९ ॥

१ आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसङ्गः ।

२ अकारकमिति चेदुपयोगवचनानर्थक्यम्

जनिकर्तुः प्रकृतिः ॥ ३० ॥

भुवः प्रभवः ॥ ३१ ॥

कर्मणा यमभिप्रैति स संप्रदानम् । ३२ ।

रुच्यर्थानां प्रीयमाणः ॥ ३३ ॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः । ३४ ।

धारेरुत्तमर्णः ॥ ३५ ॥

स्पृहेरीप्सितः ॥ ३६ ॥

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।३७।

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ ३८ ॥

राधीक्ष्योर्यस्य विप्रश्नः ॥ ३९ ॥

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ ४० ॥

अनुप्रतिगृणश्च ॥ ४१ ॥

साधकतमं करणम् ॥ ४२ ॥

दिवः कर्म च ॥ ४३ ॥

परिक्रयणे संप्रदानमन्यतरस्याम् । ४४ ।

आधारो ऽधिकरणम् ॥ ४५ ॥

अधिशीङ्स्थासां कर्म ॥ ४६ ॥

अभिनिविशश्च ॥ ४७ ॥

उपान्वध्याङ्वसः ॥ ४८ ॥

१ वसेरश्यर्थस्य प्रतिषेधः ।

कर्तुरीप्सिततमं कर्म ॥ ४९ ॥

१ ईप्सितस्य कर्मसंज्ञायां निर्वृत्तस्य कारकत्वे कर्मसंज्ञाप्रसङ्गः क्रियेप्सितत्वात् ।

२ न वोभयेप्सितत्वात् ।

तथा युक्तं चानीप्सितम् ॥ ५० ॥

अकथितं च[२] ॥ ५१ ॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ ॥ ५२ ॥

१ शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद्ध्वयत्यादीनां प्रतिषेधः ।

---

१ प. पुस्तके इतः परमधिकम् । क्रियाग्रहणमपि कर्तव्यम् । कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा । २ प. पुस्तके इतः परमधिकम् । दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना । कथिते लादयश्चेत्स्युः षष्ठीं कुर्यात् तदा गुणे । अकारकं ह्यकथितत्वात् । कारकं चेत्तु नाकथा । कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेत् । कथितेऽभिहिते त्वविधिस्त्वमतिगुणकर्मणि लादिविधिः सपरे । ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनाम् । ण्यन्ते कर्तुश्च कर्मणः । नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयः । सिद्धं वाप्यन्यकर्मणः । अन्यकर्मेति चेद्ब्रूयाल्लादीनामविधिर्भवेत् । कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मकाणाम् । देशश्चाकर्मणां कर्मसंज्ञो भवतीति वक्तव्यम् ।

२ शृणोत्यादीनां चोपसंख्यानमशब्दक्रियत्वात् ।

३ शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम् ।

४ दृशेः सर्वत्र ।

५ अदिखादिनीवहीनां प्रतिषेधः ।

६ वहेरनियन्तृकर्तृकस्य ।

७ भक्षेरहिंसार्थस्य ।

८ अकर्मग्रहणे कालकर्मकाणामुपसंख्यानम्[1] ।

९ सिद्धं तु कालकर्मणामकर्मकवद्वचनात्

हृक्रोरन्यतरस्याम् ॥ ५३ ॥

१ हृक्रोर्वावचनेऽभिवादिदृशोरात्मनेपद उपसंख्यानम् ।

स्वतन्त्रः कर्ता ॥ ५४ ॥

१ स्वतंत्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानमस्वतन्त्रत्वात् ।

२ न वा स्वातन्त्र्यादितरथा ह्यकुर्वत्यपि कारयतीति स्यात् ।

३ नाकुर्वतीति चेत्स्वतंत्रः ।

तत्प्रयोजको हेतुश्च ॥ ५५ ॥

१ प्रैषेऽस्वतंत्रप्रयोजकत्वाद्धेतुसंज्ञाप्रसिद्धिः[2]

२ स्वतन्त्रत्वात्सिद्धमिति चेत्स्वतन्त्रपरतन्त्रत्वं विप्रतिषिद्धम् ।

३ [3]उक्तं वा ।

प्राग्रीश्वरान्निपाताः[4] ॥ ५६ ॥

१ प्राग्वचनं संज्ञानिवृत्यर्थम् ।

चादयोऽसत्त्वे ॥ ५७ ॥

प्रादय उपसर्गाः क्रियायोगे ॥ ५८ ॥

॥ ५९ ॥

१ प्रादय इति योगविभागः ।

२ निपातसंज्ञार्थः ।

३ एकयोगे हि निपातसंज्ञाभावः ।

४ मरुच्छब्दस्योपसंख्यानम् ।

५ श्रच्छब्दस्योपसंख्यानम् ।

गतिश्च ॥ ६० ॥

१ कारिकाशब्दस्य ।

२ पुनश्चनसौ छन्दसि ।

३ गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीति वचनम् ।

४ प्रयोजनं घत्वषत्वणत्वे ।

५ वृद्धिविधौ च धातुग्रहणानर्थक्यम् ।

६ वद्विधिनस्भावावीत्त्वस्वाङ्गादिस्वरणत्वेषु वचनप्रामाण्यात्सिद्धम् ।

७ सुदुरोः प्रतिषेधो नुम्विधितत्त्वषत्वणत्वेषु ।

ऊर्यादिच्विडाचश्च[5] ॥ ६१ ॥

अनुकरणं चानितिपरम् ॥ ६२ ॥

१ अनुकरणस्येतिकरणपरत्वप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः ।

आदरानादरयोः सदसती ॥ ६३ ॥

भूषणेऽलम् ॥ ६४ ॥

अन्तरपरिग्रहे ॥ ६५ ॥

---

१ प. पुस्तके °कर्मकाणा° । २ प. पुस्तके इतः परमाधिकम् । स्वतन्त्रत्वात् सिद्धम् । ३ प. पुस्तके नास्ति । ४ प. पुस्तके इतः परमधिकम् । रीश्वराद्वीश्वरान्मा भूत् । कृन्मेजन्तः परोऽपि सः । समासेष्वव्ययीभावः । लौकिकं चातिवर्तते । ५ प. पुस्तके इतः परमधिकम् । कृभ्वस्तियोग इति वक्तव्यम् ।

१ अन्तः शब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम् ।

कर्णेमनसी श्रद्धाप्रतीघाते ॥ ६६ ॥

पुरो ऽव्ययम् ॥ ६७ ॥

अस्तं च ॥ ६८ ॥

अच्छ गत्यर्थवदेषु ॥ ६९ ॥

अदो ऽनुपदेशे ॥ ७० ॥

तिरो ऽन्तर्धौ ॥ ७१ ॥

विभाषा कृञि ॥ ७२ ॥

उपाजे ऽन्वाजे ॥ ७३ ॥

साक्षात्प्रभृतीनि च ॥ ७४ ॥

१ साक्षात्प्रभृतिषु च्व्यर्थवचनम् ।

२ मकारान्तत्वं च गतिसंज्ञासंनियुक्तम् ।

३ तत्र च्विप्रतिषेधः ।

४ न वा पूर्वेण कृतत्वात् ।

अनत्याधान उरसिमनसी ॥ ७५ ॥

मध्येपदेनिवचने च ॥ ७६ ॥

नित्यं हस्ते पाणावुपयमने ॥ ७७ ॥

प्राध्वं बन्धने ॥ ७८ ॥

जीविकोपनिषदावौपम्ये ॥ ७९ ॥

ते प्राग्धातोः ॥ ८० ॥

१ प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः ।

२ छन्दसि परव्यवहितवचनं च ।

३ संज्ञानियमे सिद्धम् ।

४ उभयोरनर्थकं वचनमनिष्टादर्शनात् ।

५ उपसर्जनसंनिपाते तु पूर्वपरव्यवस्थार्थम् ।

छन्दसि परे ऽपि[1] ॥ ८१ ॥

व्यवहिताश्च ॥ ८२ ॥

कर्मप्रवचनीयाः ॥ ८३ ॥

अनुर्लक्षणे ॥ ८४ ॥

१ अनुर्लक्षणेवचनानर्थक्यं सामान्यकृतत्वात् ।

२ हेत्वर्थे तु वचनम् ।

तृतीयार्थे ॥ ८५ ॥

हीने ॥ ८६ ॥

उपो ऽधिके च ॥ ८७ ॥

अपपरी वर्जने ॥ ८८ ॥

आङ् मर्यादावचने[2] ॥ ८९ ॥

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ ९० ॥

अभिरभागे ॥ ९१ ॥

प्रतिः प्रतिनिधिप्रतिदानयोः ॥ ९२ ॥

अधिपरी अनर्थकौ ॥ ९३ ॥

सुः पूजायाम् ॥ ९४ ॥

अतिरतिक्रमणे च ॥ ९५ ॥

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ॥ ९६ ॥

अधिरीश्वरे ॥ ९७ ॥

---

१ अत्रेदं विकृतं वार्तिकम् । यतः 'छन्दसि परव्यवहितवचनं' चेति भाष्ये वार्तिकपाठः । तथैवास्माभिर्गृहीतो वार्तिकपाठे । अन्यत्र सूत्रत्वेनेदं गृहीतम् । २ प. पुस्तके इतः परमधिकम् । आङ्मर्यादाभिविध्योरिति वक्तव्यम् ।

१ अधिरीश्वरवचन उक्तम्[1] ।

विभाषा कृञि ॥ ९८ ॥

लः परस्मैपदम् ॥ ९९ ॥

१ लादेशे परस्मैपदग्रहणं पुरुषबाधितत्वात् ।

२ इह वचने हि संज्ञाबाधनम् ।

३ सिचि वृद्धौ तु परस्मैपदग्रहणं ज्ञापकं पुरुषाबाधकत्वस्य ।

तङानावात्मनेपदम् ॥ १०० ॥

तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १०१ ॥

१ प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणं समसंख्यार्थम् ।

२ आनुपूर्व्यवचनं च ।

३ न वैकशेषनिर्देशात् ।

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १०२ ॥

सुपः ॥ १०३ ॥

विभक्तिश्च ॥ १०४ ॥

युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ॥ १०५ ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ १०६ ॥

अस्मद्युत्तमः ॥ १०७ ॥

शेषे प्रथमः ॥ १०८ ॥

१ युष्मदस्मच्छेषवचनं नियमार्थम् ।

२ तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वात् ।

३ सिद्धं तु युष्मदस्मदोः प्रतिषेधात् ।

४ युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन ।

५ अनेकशेषभावार्थं[2] तु ।

६ न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः ।

७ क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्य ।

परः संनिकर्षः संहिता ॥ १०९ ॥

१ परः संनिकर्षः संहिता चेदद्रुतायामसंहितम् ।

२ तुल्यः संनिकर्षः ।

३ वर्णकालभूयस्त्वं तु ।

४ द्रुतायां तपरकरणे मध्यमविलम्बितयोरुपसंख्यानं कालभेदात् ।

५ उक्तं वा ।

६ शब्दाविरामे प्रतिवर्णमवसानम् ।

७ ह्रादाविरामे स्पर्शाघोषसंयोगेऽसंनिधानादसंहितम् ।

८ एकेन तुल्यः संनिधिः ।

९ पौर्वापर्यमकालव्यपेतं संहिता चेत्पूर्वापराभावादसंहितम् ।

१० एकैकवर्णवर्तित्वाद्वाच उच्चरितप्रध्वंसित्वाच्च वर्णानाम् ।

विरामोऽवसानम् ॥ ११० ॥

१ अभावेऽवसानलक्षण उपर्यभाववचनम् ।

२ विरामे विरामवचनम् ।

३ अभावेऽवसानसंज्ञिन्युपर्यभाववचनम् ।

४ विरामे विरामवचनम् ।

५ भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न ।

१-२ प. पुस्तके नास्ति ।

६ तत्पर इति वा वर्णस्यावसानम्।
७ वर्णोऽन्त्यो वावसानम्।
८ संहितावसानयोर्लोकविदितत्वात्सिद्धम्।
॥ इति प्रथमाध्यायस्य चतुर्थः पादः॥

अथ द्वितीयोऽध्यायः॥

समर्थः पदविधिः॥ १॥

१ पृथगर्थानामेकार्थीभावः समर्थवचनम्[1]।
२ सुबलोपो व्यवधानं यथेष्टमन्यतरेणासंबन्धः स्वरसंख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषणं चयोगवावचनानर्थक्यं च स्वभावसिद्धत्वात्।
३ संघातस्यैकार्थ्यान्नावयवसंख्यातः सुबुत्पत्तिः
४ परस्परव्यपेक्षां सामर्थ्यमेके।
५ तत्र नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः।
६ प्रचये समासप्रतिषेधः।
७ समर्थतराणां वा।
८ समुदायसामर्थ्याद्वा सिद्धम्[2]।
९ आख्यातं साव्ययकारकविशेषणं वाक्यम्[3]
१० एकतिङ्।
११ समानवाक्ये निघातयुष्मदस्मदादेशाः।
१२ योगे प्रतिषेधश्चादिभिः।
१३ समर्थनिघाते हि समानाधिकरणयुक्तयुक्तेषूपसंख्यानमसमर्थत्वात्।
१४ राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात्।
१५ सिद्धं तु राजविशिष्टायाः गोः क्षीरेण सामर्थ्यात्।
१६ पदविधौ समर्थवचनं वर्णाश्रये शास्त्र आनन्तर्यविज्ञानात्।
१७ समर्थाधिकारस्य विधेयसामानाधिकरण्यान्निर्देशानर्थक्यम्।
१८ सिद्धं तु समर्थानामिति वचनात्।
१९ एकशेषनिर्देशाद्वा।
२० समानाधिकरणेषूपसंख्यानमसमर्थत्वात्।
२१ द्रव्यं पदार्थ इति चेत्।
२२ न वा वचनप्रामाण्यात्।
२३ लुप्ताख्यातेषु च।
२४ तदर्थगतेर्वा।
२५ समासो द्वयोर्द्वयोश्चेद् द्वन्द्वेऽनेकग्रहणम्।
२६ द्वयोर्द्वयोः समास इति चेन्न बहुषु द्वित्वाभावात्।
२७ समासान्तप्रतिषेधश्च।
२८ अविशेषेण बहुव्रीहावनेकपदप्रसङ्गः।
२९ तत्र स्वरसमासान्तपुंवद्भावेषु दोषः।
३० न वावयवतत्पुरुषत्वात्।
३१ तस्यान्तोदात्तत्वं विप्रतिषेधात्।
३२ निमित्तिस्वरबलीयस्त्वाद्वा।
३३ एकशितिपात्स्वरवचनं तु ज्ञापकं निमित्तिस्वरबलीयस्त्वस्य।

---

१ प. पुस्तके इतः परमाधिकम्। अर्थानादेशनात्। तच्च लघ्वर्थम्। असंभवः खल्वप्यर्थादेशनस्य। अप्रवृत्तिः खल्वप्यर्थादेशनस्य। २ प. पुस्तके इतः परमधिकम्। समर्थतराणां वा समुदायसामर्थ्यात्। ३ प. पुस्तके इतः परमधिकम् आख्यातं स विशेषणम्। ४ प. पुस्तके °स्त्वाद्वा।

सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २ ॥

१ आमन्त्रितस्य पराङ्गवद्भावे षष्ठ्यामन्त्रितकारकवचनम् ।

२ तन्निमित्तग्रहणं वा ।

३ अवचने हि सुबन्तमात्रप्रसङ्गः ।

४ सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमननन्तरत्वात् ।

५ स्वरेऽवधारणाच्च ।

६ परमपि च्छन्दसि[1] ।

७ अव्ययप्रतिषेधश्च ।

८ अनव्ययीभावस्य ।

९ स्वरेऽवधारणं सुबलोपार्थम् ।

१० न वा सुबन्तैकान्तत्वात् ।

११ प्रातिपदिकैकान्तस्तु सुब्लोपे ।

प्राक्कडारात्समासः ॥ ३ ॥

१ प्राग्वचनं संज्ञानिवृत्त्यर्थम् ।

सह सुपा ॥ ४ ॥

१ सहवचनं पृथगसमासार्थम् ।

२ इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ।

अव्ययीभावः ॥ ५ ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु ॥ ६ ॥

यथासादृश्ये ॥ ७ ॥

यावदवधारणे ॥ ८ ॥

सुप् प्रतिना मात्रार्थे ॥ ९ ॥

अक्षशलाकासंख्याः परिणा[2] ॥ १० ॥

विभाषा ॥ ११ ॥

अपपरिबहिरञ्चवः पञ्चम्या ॥ १२ ॥

आङ् मर्यादाभिविध्योः ॥ १३ ॥

लक्षणेनाभिप्रती आभिमुख्ये ॥ १४ ॥

अनुर्यत्समया ॥ १५ ॥

यस्य चायामः ॥ १६ ॥

तिष्ठद्गुप्रभृतीनि च ॥ १७ ॥

१ तिष्ठद्गु कालविशेषे ।

२ खलेयवादीनि प्रथमान्तान्यपदार्थे ।

पारे मध्ये षष्ठ्या वा ॥ १८ ॥

१ पारे मध्ये षष्ठ्या वावचनम् ।

२ अवचने हि षष्ठीसमासाभावो यथैकदेशिप्रधाने ।

३ एकारान्तनिपातनं च ।

संख्या वंश्येन ॥ १९ ॥

नदीभिश्च ॥ २० ॥

१ नदीभिः संख्यासमासेऽन्यपदार्थे प्रतिषेधः[3] ।

अन्यपदार्थे च संज्ञायाम् ॥ २१ ॥

तत्पुरुषः ॥ २२ ॥

द्विगुश्च ॥ २३ ॥

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २४ ॥

---

१ प. पुस्तके इतः परमधिकम् । पूर्वस्याङ्गवद्भवतीति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अक्षादयस्तृतीयान्ता पूर्वोक्तस्य यथा न तद् । एकत्वेऽक्षशलाकयोः । कितवव्यवहारे च । ३ प. पुस्तके इतः परमधिकम् । नदीभिः संख्यायाः समाहारेऽव्ययीभावो वक्तव्यः ।

१ श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् ।

२ श्रितादिभिरहीने द्वितीयासमासवचनानर्थक्यं बहुव्रीहिकृतत्वात् ।

३ अहीने द्वितीयास्वरवचनानर्थक्यं च ।

४ जातिस्वरप्रसङ्गस्तु ।

५ तत्र जातादिषु वावचनात्सिद्धम् ।

स्वयं क्तेन ॥ २५ ॥

खट्वा क्षेपे ॥ २६ ॥

सामि ॥ २७ ॥

कालाः ॥२८ ॥

अत्यन्तसंयोगे च ॥ २९ ॥

१ अत्यन्तसंयोगे समासस्याविशेषवचनात् क्तेन समासवचनानर्थक्यम् ।

२ अनत्यन्तसंयोगार्थं तु ।

तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३० ॥

१ तृतीयासमासेऽर्थग्रहणमनर्थकमर्थगतिर्ह्यवचनात् ।

२ निर्देश्यमिति चेत्तृतीयार्थनिर्देशोऽपि ।

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ ३१॥

१ पूर्वादिष्ववरस्योपसंख्यानम् ।

२ सदृशग्रहण उक्तम् ।

कर्तृकरणे कृता बहुलम् ॥ ३२ ॥

१ कर्तृकरणे कृता क्तेन ।

कृत्यैरधिकार्थवचने ॥ ३३ ॥

१ कृत्यैरधिकार्थवचनेऽन्यत्रापि दृश्यते ।

२ साधनं कृतेति वा पादहारकाद्यर्थम्[3] ।

अन्नेन व्यञ्जनम् ॥ ३४ ॥

भक्ष्येण मिश्रीकरणम् ॥ ३५ ॥

१ अन्नेन व्यञ्जनं भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः ।

२ कारकाणां क्रियया सामर्थ्यात् ।

३ वचनप्रामाण्यादिति चेन्नानाकारकाणांप्रतिषेधः ।

४ सिद्धं तु समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च ।

५ षष्ठीसमासश्च युक्तपूर्णान्तः ।

६ न वासमासेऽदर्शनात् ।

७ युक्तार्थसंप्रत्ययाच्च सामर्थ्यम् ।

८ संप्रत्ययाच्च तदर्थाध्यवसानम् ।

९ संप्रतीयमानार्थलोपे ह्यनवस्था ।

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ३६

१ चतुर्थी तदर्थमात्रेण चेत्सर्वप्रसङ्गोऽविशेषात् ।

२ बलिरक्षिताभ्यां चानर्थकं वचनम् ।

३ विकृति प्रकृत्येति चेदश्वघासादीनामुपसंख्यानम् ।

४ अर्थेन नित्यसमासवचनम् ।

५ सर्वलिङ्गता च ।

पञ्चमी भयेन ॥ ३७ ॥

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ।३८।

१ प. पुस्तके नास्ति । २ कृत्यग्रहणे यण्ण्यतोर्ग्रहणमिति प. पुस्तके काशिकास्थ पाठः । ३ प. पुस्तके इतः परमधिकम् । भयभीतभीतिभीभिरिति वक्तव्यम् । भयनिर्गतजुगुप्सुभिरिति वक्तव्यम् ।

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥ ३९ ॥

सप्तमी शौण्डैः ॥ ४० ॥

सिद्धशुष्कपक्वबन्धैश्च ॥ ४१ ॥

ध्वाङ्क्षेण क्षेपे ॥ ४२ ॥

१ ध्वाङ्क्षेणेत्यर्थग्रहणम् ।

कृत्यैर्ऋणे ॥ ४३ ॥

१ कृत्यैर्नियोगे यद्ग्रहणम् ।

संज्ञायाम् ॥ ४४ ॥

क्तेनाहोरात्रावयवाः ॥ ४५ ॥

तत्र ॥ ४६ ॥

क्षेपे ॥ ४७ ॥

१ [१]क्षेपे गतिकारकपूर्व उक्तम् ।

पात्रे[२]संमितादयश्च ॥ ४८ ॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ॥ ४९ ॥

दिक्संख्ये संज्ञायाम् ॥ ५० ॥

तद्धितार्थोत्तरपदसमाहारे च ॥ ५१ ॥

१ द्विगुसंज्ञा प्रत्ययोत्तरपदयोश्चेदितरेतराश्रयत्वादप्रसिद्धिः ।

२ अर्थे चेत्तद्धितानुत्पत्तिर्बहुव्रीहिवत् ।

३ समासतद्धितविधाविति चेदन्यत्र समाससंज्ञाभावः ।

४ सिद्धं तु प्रत्ययोत्तरपदयोश्चेति वचनात् ।

५ द्विगोर्वा लुग्वचनं ज्ञापकं तद्धितोत्पत्तेः ।

६ समाहारसमूहयोरविशेषात्समाहारग्रहणानर्थक्यं तद्धितार्थेन कृतत्वात् ।

७ अभिधानार्थं तु ।

८ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् ।

९ उत्तरपदेन परिमाणिना द्विगोः समासवचनम् ।

१० अन्यत्र समुदायबहुव्रीहित्वादुत्तरपदप्रसिद्धिः ।

११ सर्वत्र मत्वर्थे प्रतिषेधः ।

संख्यापूर्वो द्विगुः ॥ ५२ ॥

कुत्सितानि कुत्सनैः ॥ ५३ ॥

पापाणके कुत्सितैः ॥ ५४ ॥

उपमानानि सामान्यवचनैः ॥ ५५ ॥

१ उपमानसमासे गुणवचनस्य विशेषभाक्त्वात्सामान्यवचनाप्रसिद्धिः ।

२ न वा श्यामत्वस्योभयत्र भावात्तद्वाचकत्वाच्च शब्दस्य सामान्यवचनप्रसिद्धिः ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥

विशेषणं विशेष्येण बहुलम् ॥ ५७ ॥

१ विशेषणविशेष्ययोरुभयाविशेषणत्वादुभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिः ।

२ न वान्यतरस्य प्रधानभावात्तद्विशेषकत्वाच्चापरस्योपसर्जनप्रसिद्धिः ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ ५८ ॥

१ बहुलवचनस्याकृत्स्नत्वादुत्तरत्रानुक्रमणसामर्थ्यम् ।

श्रेण्यादयः कृतादिभिः ॥ ५९ ॥

१ श्रेण्यादिषु च्व्यर्थवचनम् ।

१ प पुस्तके इतः परमधिकम् । शौण्डाभिरिति वक्तव्यम् । २ प. पुस्तके नास्ति । ३ का. °संमिता° ।

क्तेन नञ्विशिष्टेनानञ् ॥ ६०॥

१ नञ्विशिष्टे समानप्रकृतिवचनम् ।

२ नुडिडधिकेन च ।

३ कृतापकृतादीनां चोपसंख्यानम् ।

४ सिद्धं तु क्तेन विसमासावनञ् ।

५ गतप्रत्यागतादीनां चोपसंख्यानम् ।

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ६१

वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥६२॥

कतरकतमौ जातिपरिप्रश्ने ॥ ६३ ॥

किं क्षेपे ॥ ६४ ॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ६५ ॥

प्रशंसावचनैश्च ॥ ६६ ॥

युवा खलतिपलितवलिनजरतीभिः ।६७।

कृत्यतुल्याख्या अजात्या ॥ ६८ ॥

वर्णो वर्णेन ॥ ६९ ॥

१ वर्णेन तृतीयासमास एतप्रतिषेधे वर्णग्रहणम् ।

२ समानाधिकरणे द्विर्वर्णग्रहणम् ।

३ समानाधिकरणाधिकारे प्रधानोपसर्जनानां परं परं विप्रतिषेधेन ।

४ समानाधिकरणसमासाद्बहुव्रीहिः।

५ कदाचित्कर्मधारयः सर्वधनाद्यर्थः ।

६ पूर्वपदातिशय आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थः ।

७ उत्तरपदातिशय आतिशयिको बहुव्रीहेर्वेह्वाढ्यतराद्यर्थः ।

८ समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च[1] ।

कुमारः श्रमणादिभिः ॥ ७० ॥

चतुष्पादो गर्भिण्या ॥ ७१ ॥

मयूरव्यंसकादयश्च ॥ ७२ ॥

लृट् शेषे च ॥ १३ ॥

१ लृटि शेषवचनं क्रियायां प्रतिपदविध्यर्थम् ।

२ अविशेषेण विधाने लृटोऽभावः प्रतिषिद्धत्वात् ।

लृटः सद्वा ॥ १४ ॥

१ सद्विधिर्नित्यमप्रथमासमानाधिकरणे ।

अनद्यतने लुट् ॥ १५ ॥

१ परिदेवने श्वस्तनी भविष्यन्त्यर्थे ।

२ कालप्रकर्षात्तूपमानम् ।

पदरुजविशस्पृशो घञ् ॥ १६ ॥

१ स्पृश उपतापे ।

सृ स्थिरे[3] ॥ १७ ॥

भावे ॥ १८ ॥

१ भावे सर्वलिङ्गो निर्देशः ।

अकर्तरि च कारके संज्ञायाम् ॥ १९ ॥

१ कारकग्रहणमनादेशे स्वार्थविज्ञानात् ।

२ संज्ञाग्रहणानर्थक्यं सर्वत्र घञो दर्शनात् ।

३ अतिप्रसङ्ग इति चेदभिधानलक्षणत्वात्प्रत्ययस्य सिद्धम्[4] ।

परिमाणाख्यायां सर्वेभ्यः ॥ २० ॥

१ सर्वग्रहणमनर्थकं परिमाणाख्यायामिति सिद्धत्वात् ।

२ घञनुक्रमणमजब्विषये ।

३ अवचने हि स्त्रीप्रत्ययानामप्यपवादविज्ञानम् ।

४ दारजारौ कर्तरि णिलुक् च ।

५ करणे वा ।

इङश्च ॥ २१ ॥

१ इङश्चेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् ।

२ शॄ वायुवर्णनिवृतेषु ।

उपसर्गे रुवः ॥ २२ ॥

---

१ प. पुस्तके इतः परमधिकम् । न वा तद्विधानस्यान्यत्राभावात् । भविष्यदधिकारस्य प्रयोजनं यावत् पचति पुरा पचतीत्यनपशब्दत्वाय । २ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । व्याधिमत्स्यबलेष्विति वाच्यम् । ४ प. पुस्तके सिद्धमिति नास्ति ।

सामि युद्रुदुवः ॥ २३ ॥
श्रिणीभुवो ऽनुपसर्गे ॥ २४ ॥
वौ क्षुश्रुवः ॥ २५ ॥
अवोदोर्नियः ॥ २६ ॥
प्रे द्रुस्तुस्रुवः ॥ २७ ॥
निरभ्योः पूल्वोः ॥ २८ ॥
उन्न्योर्ग्रः ॥ २९ ॥
कॄ धान्ये ॥ ३० ॥
यज्ञे समि स्तुवः ॥ ३१ ॥
प्रे स्त्रो ऽयज्ञे ॥ ३२ ॥
प्रथने वावशब्दे ॥ ३३ ॥
छन्दोनाम्नि च ॥ ३४ ॥
उदि ग्रहः ॥ ३५ ॥
समि मुष्टौ ॥ ३६ ॥
१ समि मुष्टावित्यनर्थकं वचनं[1] परिमाणाख्यायामिति सिद्धत्वात् ।
२ अपरिमाणार्थं तु ।
३ उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोः ।
परिन्योर्नीणोर्द्यूताभ्रेषयोः ॥ ३७ ॥
परावनुपात्यय इणः ॥ ३८ ॥
व्युपयोः शेतेः पर्याये ॥ ३९ ॥
हस्तादाने चेरस्तेये ॥ ४० ॥
निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥ ४१ ॥
संघे चानौत्तराधर्ये ॥ ४२ ॥
कर्मव्यतिहारे णच् स्त्रियाम् ॥ ४३ ॥
१ कर्मव्यतिहारे स्त्रीग्रहणं व्यतिपाकार्थम् ।
२ पृथग्ग्रहणं बाधकबाधनार्थम् ।
३ व्यावचोरीव्यावचर्च्यर्थम् ।
४ तत्र व्यतीक्षादिषु दोषः ।
५ सिद्धं तु प्रकृते स्त्रीग्रहणे णज्ग्रहणं णिज्ग्रहणं च ।
अभिविधौ भाव इनुण् ॥ ४४ ॥
१ अभिविधौ भावग्रहणं नपुंसके क्तादिनिवृत्त्यर्थम् ।
२ पृथग्ग्रहणं बाधकबाधनार्थम् ।
३ न तु ल्यटः ।
आक्रोशे ऽवन्योर्ग्रहः ॥ ४५ ॥
प्रे लिप्सायाम् ॥ ४६ ॥
परौ यज्ञे ॥ ४७ ॥
नौ वृ धान्ये ॥ ४८ ॥
उदि श्रयतियौतिपूद्रुवः ॥ ४९ ॥
विभाषाङि रुप्लुवोः ॥ ५० ॥
अवे ग्रहो वर्षप्रतिबन्धे ॥ ५१ ॥
प्रे वणिजाम् ॥ ५२ ॥
रश्मौ च ॥ ५३ ॥
वृणोतेराच्छादने ॥ ५४ ॥
परौ भुवो ऽवज्ञाने ॥ ५५ ॥
एरच् ॥ ५६ ॥
१ अज्विधौ भयस्योपसंख्यानम्[2] ।
२ नपुंसके क्तादिनिवृत्त्यर्थम् ।
३ कल्पादिभ्यश्च[3] प्रतिषेधः ।
४ जवसवौ छन्दसि ।

१ प. पुस्तके वचनमिति नास्ति । २ प. पुस्तके भयादीनामित्यधिकम् । ३ प. पुस्तके 'च' नास्ति ।

ऋदोरप् ॥ ५७ ॥
ग्रहवृदृनिश्चिगमश्च ॥ ५८ ॥
१ अब्विधौ निश्चिग्रहणमनर्थकं स्तेयस्य घञ्विधौ प्रतिषेधात् ।
२ अस्तेयार्थमिति चेन्नानिष्टत्वात् ।
३ वशिरण्योश्चोपसंख्यानम् ।
४ घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् ।
उपसर्गेऽदः ॥ ५९ ॥
णौ ण च ॥ ६० ॥
व्यधजपोरनुपसर्गे ॥ ६१ ॥
स्वनहसोर्वा ॥ ६२ ॥
यमः समुपनिविषु च ॥ ६३ ॥
नौ गदनदपठस्वनः ॥ ६४ ॥
क्वणो वीणायां च ॥ ६५ ॥
नित्यं पणः परिमाणे ॥ ६६ ॥
मदोऽनुपसर्गे ॥ ६७ ॥
प्रमदसंमदौ हर्षे ॥ ६८ ॥
समुदोरजः पशुषु ॥ ६९ ॥
अक्षेषु ग्लहः ॥ ७० ॥
प्रजने सर्तेः ॥ ७१ ॥
ह्वः संप्रसारणं च न्यभ्युपविषु ॥ ७२ ॥
आङि युद्धे ॥ ७३ ॥
निपानमाहावः ॥ ७४ ॥
भावेऽनुपसर्गस्य ॥ ७५ ॥
हनश्च वधः ॥ ७६ ॥
मूर्तौ घनः ॥ ७७ ॥
अन्तर्घनो देशे ॥ ७८ ॥
अगारैकदेशे प्रघणः प्रघाणश्च ॥ ७९ ॥
उद्घनोऽत्याधानम् ॥ ८० ॥
अपघनोऽङ्गम् ॥ ८१ ॥
करणेऽयोविद्रुषु ॥ ८२ ॥
स्तम्बे क च ॥ ८३ ॥
परौ घः ॥ ८४ ॥
उपघ्न आश्रये ॥ ८५ ॥
संघोद्घौ गणप्रशंसयोः ॥ ८६ ॥
निघो निमितम् ॥ ८७ ॥
ड्वितः क्त्रिः ॥ ८८ ॥
ट्वितोऽथुच् ॥ ८९ ॥
यजयाचयतविच्छप्रच्छरक्षो नङ् ॥ ९० ॥
१ यजादिभ्यो नस्य ङित्त्वे संप्रसारणप्रतिषेधः ।
२ अङिति गुणप्रतिषेधः ।
स्वपो नन् ॥ ९१ ॥
उपसर्गे घोः किः ॥ ९२ ॥
कर्मण्यधिकरणे च ॥ ९३ ॥
स्त्रियां क्तिन् ॥ ९४ ॥
१ स्त्रियां क्तिनाबादिभ्यश्च[1] ।
२ निष्ठायां वा सेटोऽकारवचनात् सिद्धम्[2] ।
स्थागापापचो भावे ॥ ९५ ॥
१ स्थादिभ्यः सर्वापवादप्रसङ्गः ।
२ सिद्धं त्वङ्विधाने स्थादिप्रतिषेधात् ।
३ श्रुयजिषिस्तुभ्यः करणे ।
४ ग्लाज्याहाभ्यो निः ।
मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ॥ ९६ ॥

१ प. पुस्तके चेति पदं नास्ति । २ प. पुस्तके सिद्धमिति नास्ति ।

ऊतियूतिजूतिसातिहेतिकीर्तयश्च ॥९७॥

व्रजयजोर्भावे क्यप् ॥ ९८ ॥

१ क्यब्विधिरधिकरणे च ।

संज्ञायां समजनिषदनिपतमनविदषुञ्-शीङ्भृञिणः ॥ ९९ ॥

कृञः श च ॥ १०० ॥

१ कृञः श चेति वावचनं क्तिनर्थम् ।

इच्छा[1] ॥ १०१ ॥

अ प्रत्ययात् ॥१०२ ॥

गुरोश्च हलः ॥ १०३ ॥

षिद्भिदादिभ्यो ऽङ् ॥ १०४ ॥

१ भिदा विदारणे ।

२ छिदा द्वैधीकरणे ।

३ आरा शस्त्र्याम् ।

४ धारा प्रपाते ।

५ गुहा गिर्योषध्योः ।

चिन्तिपूजिकथिकुम्बिचर्चश्च ॥ १०५ ॥

आतश्चोपसर्गे ॥ १०६ ॥

ण्यासश्रन्थो युच् ॥ १०७ ॥

१ युच्प्रकरणे घट्टिवन्दिविदिभ्य उपसंख्यानम् ।

२ इषेरनिच्छार्थस्य ।

३ परेर्वा ।

रोगाख्यायां ण्वुल् बहुलम् ॥ १०८ ॥

१ धात्वर्थनिर्देशे ण्वुल् ।

२ इक्श्तिपौ धातुनिर्देशे ।

३ वर्णात्कारः ।

४ रादिफः ।

५ मत्वर्थाच्छः ।

६ इणजादिभ्यः ।

७ इञ्वपादिभ्यः ।

८ इकृष्यादिभ्यः ।

९ संपदादिभ्यः क्विप् ।

संज्ञायाम् ॥ १०९ ॥

विभाषाख्यानपरिप्रश्नयोरिञ्च ॥११०॥

पर्यायार्हर्णोत्पत्तिषु ण्वुच् ॥ १११ ॥

आक्रोशे नञ्यनिः ॥ ११२ ॥

कृत्यल्युटो बहुलम्[2] ॥ ११३ ॥

नपुंसके भावे क्तः ॥ ११४ ॥

ल्युट् च ॥ ११५ ॥

कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् ॥ ११६ ॥

करणाधिकरणयोश्च ॥ ११७ ॥

पुंसि संज्ञायां घः प्रायेण ॥ ११८ ॥

गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥ ११९ ॥

१ गोचरादीनामग्रहणं प्रायवचनाद्यथा कषो निकष इति ।

अवे तॄस्त्रोर्घञ् ॥ १२० ॥

हलश्च ॥ १२१ ॥

१ घञ्विधाववहाराधारावायानामुपसंख्यानम् ।

अध्यायन्यायोद्यावसंहाराश्च ॥ १२२ ॥

उदङ्को ऽनुदके ॥ १२३ ॥

---

१ प पुस्तके इतः परमधिकम् । इच्छापरिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् । जागर्तेरकारो वा । २ प. पुस्तके इतः परमधिकम् । कृतो बहुलमिति वक्तव्यं पादहारकाद्यर्थम् ।

१ उदङ्कोऽनुदकग्रहणानर्थक्यं च प्रायवचनाद्यथा गोदोहनः प्रसाधन इति।[1]

जालमानायः ॥ १२४ ॥

खनो घ च[2] ॥ १२५ ॥

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥ १२६ ॥

१ अजब्भ्यां स्त्रीखलनाः।

२ स्त्रियाः खलनौ विप्रतिषेधेन।

कर्तृकर्मणोश्च भूकृञोः[3] ॥ १२७ ॥

१ खल्कर्तृकर्मणोश्च्व्यर्थयोः।

२ कर्तृकर्मग्रहणं चोपपदसंज्ञार्थम्।

आतो युच् ॥ १२८ ॥

छन्दसि गत्यर्थेभ्यः ॥ १२९ ॥

अन्येभ्योऽपि दृश्यते ॥ १३० ॥

१ भाषायां शासियुधिदृशिधृषिभ्यो युच्[4]।

वर्तमानसामीप्ये वर्तमानवद्वा ॥ १३१ ॥

१ वर्तमानसामीप्ये वर्तमानवद्वचनं शत्राद्यर्थम्।

आशंसायां भूतवच्च ॥ १३२ ॥

१ आशंसायां भूतवदतिदेशे लङ्लिटोः प्रतिषेधः।

२ न वापवादस्य निमित्ताभावादनद्यतने हि तयोर्विधानम्।

३ आशंसासंभावनयोरविशेषात्तद्विधानस्याप्राप्तिः।

४ न वा संभावनावयवत्वादाशंसायाः।

५ अर्थासंदेहो वालमर्थत्वात्संभावनस्य।

क्षिप्रवचने लृट् ॥ १३३ ॥

१ क्षिप्रवचने लृट आशंसावचने लिङ्प्रतिषेधेन।

२ अनिष्पन्ने निष्पन्नशब्दः शिष्योऽनिष्पन्नत्वात्।

३ सिद्धं तु भविष्यत्प्रतिषेधात्।

४ हेतुभूतकालसंप्रेक्षितत्वाद्वा।

५ अस्त्यर्थानां भवन्त्यर्थे सर्वा विभक्तयः कर्तुर्विद्यमानत्वात्।

६ सिद्धं तु यथास्वं कालसमुच्चारणात्।

७ अवात्वात्।

८ असिद्धविपर्यासश्च।

आशंसावचने लिङ् ॥ १३४ ॥

नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥ १३५ ॥

१ नानद्यतनवत्प्रतिषेधे लङ्लुटोः प्रतिषेधः।

२ अद्यतनवद्वचने हि विधानम्।

३ तत्र लङ्विधिप्रसङ्गः।

४ लुङ्लृटोश्चायथाकालम्।

भविष्यति मर्यादावचनेऽवरस्मिन् ॥ १३६ ॥

१ भविष्यति मर्यादावचनेऽवरस्मिन्नित्याक्रियाप्रबन्धार्थम्।

२ क्रियाप्रबन्धार्थमिति चेद्वचनानर्थक्यम्।

३ अहोरात्रप्रतिषेधार्थमिति चेन्नानिष्टत्वात्।

कालविभागे चानहोरात्राणाम् ॥ १३७ ॥

१ प. पुस्तके वचनानर्थक्यमिति पाठः। २ प. पुस्तके इतः परमधिकम्। खनो डडरेकवकाः। ३ प. पुस्तके चोपपदार्थमिति। ४ प. पुस्तके इतः परमधिकम्। मृषेश्चेति वक्तव्यम्।

१ अनहोरात्राणामिति तद्विभागे प्रतिषेधः ।
२ तैश्च विभागे ।
परस्मिन्विभाषा ॥ १३८ ॥
लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥१३९॥
भूते च ॥ १४० ॥
१ भूते लङुताप्यादिषु ।
वोताप्योः ॥ १४१ ॥
१ विभाषा गर्हाप्रभृतौ प्रागुतापिभ्याम् ।
गर्हायां लडपिजात्वोः ॥ १४२ ॥
१ गर्हायां लड्विधानानर्थक्यं क्रियासमाप्तिविवक्षितत्वात् ।
विभाषा कथमि लिङ् च ॥ १४३ ॥
किंवृत्ते लिङ्लृटौ ॥ १४४ ॥
अनवक्लृप्त्यमर्षयोरकिंवृत्ते ऽपि ॥ १४५॥
१ किंवृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणानर्थक्यम् ।
किंकिलास्त्यर्थेषु लृट् ॥ १४६ ॥
जातुयदोर्लिङ् ॥ १४७ ॥
१ जातुयदोर्लिङ्विधाने यदायदोरुपसंख्यानम् ।
यच्चयत्रयोः ॥ १४८ ॥
गर्हायां च ॥ १४९ ॥
चित्रीकरणे च ॥ १५० ॥
शेषे लडयदौ ॥ १५१ ॥
१ चित्रीकरणे यदि प्रतिषेधानर्थक्यमर्थान्यत्वात् ।
उताप्योः समर्थयोर्लिङ् ॥ १५२ ॥
कामप्रवेदने ऽकच्चिति ॥ १५३ ॥
संभावने ऽलमिति चेत्सिद्धाप्रयोगे॥१५४
विभाषा धातौ संभावनवचने ऽयदि ॥ १५५ ॥
हेतुहेतुमतोर्लिङ् ॥ १५६ ॥
१ हेतुहेतुमतोर्लिङ्[1] ।
२ भविष्यदधिकारे ।
इच्छार्थेषु लिङ्लोटौ ॥ १५७ ॥
१ कामप्रवेदनं चेत् ।
समानकर्तृकेषु तुमुन् ॥ १५८ ॥
लिङ् च ॥ १५९ ॥
इच्छार्थेभ्यो विभाषा वर्तमाने ॥ १६० ॥
विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ १६१ ॥
१ निमन्त्रणादीनामर्थे चेदामन्त्रयै निमन्त्रयै भवन्तमिति प्रत्ययानुपपत्तिः प्रकृत्यभिहितत्वात् ।
२ द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात् ।
३ सिद्धं तु द्वितीयाकाङ्क्षस्य प्रकृते प्रत्ययार्थे प्रत्ययविधानात् ।
लोट् च ॥ १६२ ॥
प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥१६३॥
१ प्रैषादिषु कृत्यानां वचनं नियमार्थमिति चेत्तदनिष्टम् ।
२ विध्यर्थं तु स्त्रियाः प्रागिति वचनात् ।
लिङ् चोर्ध्वमौहूर्तिके ॥ १६४ ॥
स्मे लोट् ॥ १६५ ॥
अधीष्टे च ॥ १६६ ॥
कालसमयवेलासु तुमुन् ॥ १६७ ॥

[1] प. पुस्तके इतः परमधिकम् । प्रथमान्तेष्विति वक्तव्यम् ।

लिङ् यदि ॥ १६८ ॥
अर्हे कृत्यतृचश्च ॥ १६९ ॥
आवश्यकाधमर्ण्ययोर्णिनिः ॥ १७० ॥
कृत्याश्च ॥ १७१ ॥
शकि लिङ् च ॥ १७२ ॥
आशिषि लिङ्लोटौ ॥ १७३ ॥
क्तिच्क्तौ च संज्ञायाम् ॥ १७४ ॥
माङि लुङ् ॥ १७५ ॥
स्मोत्तरे लङ् च ॥ १७६ ॥

इति तृतीयाध्यायस्य तृतीयः पादः ।

धातुसंबन्धे प्रत्ययाः ॥ १ ॥
१ धातुसंबन्धे प्रत्ययस्य यथाकालविधानात्सिद्धम् ।
२ उपपदस्य कालान्यत्वम् ।
क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ॥ २ ॥
१ हिस्वयोः परस्मैपदात्मनेपदग्रहणं लादेशप्रतिषेधार्थम् ।
२ समसंख्यार्थं च ।
३ न वा तध्वमोरादेशवचनं ज्ञापकं पदादेशस्य ।
४ तत्र पदादेशे पित्त्वाटोः प्रतिषेधः ।
५ सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनात् ।
६ योगविभागात्सिद्धम् ।
समुच्चये ऽन्यतरस्याम् ॥ ३ ॥
यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥ ४ ॥
समुच्चये सामान्यवचनस्य ॥ ५ ॥
छन्दसि लुङ्लङ्लिटः ॥ ६ ॥
लिङर्थे लेट् ॥ ७ ॥
उपसंवादाशङ्कयोश्च ॥ ८ ॥
१ उपसंवादाशङ्कयोर्वचनानर्थक्यं लिङर्थत्वात् ।
तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ॥ ९ ॥
प्रयै रोहिष्यै अव्यथिष्यै ॥ १० ॥
दृशे विख्ये च ॥ ११ ॥
शकि णमुल्कमुलौ ॥ १२ ॥
ईश्वरे तोसुन्कसुनौ ॥ १३ ॥
कृत्यार्थे तवैकेन्केन्यत्वनः ॥ १४ ॥
अवचक्षे च ॥ १५ ॥
भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ १६ ॥
सृपितृदोः कसुन् ॥ १७ ॥
अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥ १८ ॥
उदीचां माङो व्यतीहारे ॥ १९ ॥
परावरयोगे च ॥ २० ॥
समानकर्तृकयोः पूर्वकाले[1] ॥ २१ ॥
१ समानकर्तृकयोरिति बहुष्वप्राप्तिः ।
२ सिद्धं तु क्रियाप्रधानत्वात् ।
३ लोकविज्ञानान्न सिध्यति ।
४ अनन्त्यवचनात्तु सिद्धम् ।

---

१ प. पुस्तके इतः परमधिकम् । द्विवचननिर्देशान्नं ।

५ व्यादाय स्वपितीत्युपसंख्यानमपूर्वकालत्वात् ।

६ न वा स्वप्नस्यावरकालत्वात् ।

आभीक्ष्ण्ये णमुल् च ॥ २२ ॥

न यद्यनाकाङ्क्षे ॥ २३ ॥

विभाषाग्रेप्रथमपूर्वेषु ॥ २४ ॥

१ अग्रादिष्वप्राप्तविधेः समासप्रतिषेधः ।

कर्मण्याक्रोशे कृञः खमुञ् ॥ २५ ॥

स्वादुमि णमुल् ॥ २६ ॥

१ स्वादुमि मान्तनिपातनमीकाराभावार्थम् ।

२ च्व्यन्तस्य मकारान्तार्थम् ।

३ आ च तुमनः समानाधिकरणे ।

अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ २७ ॥

यथातथयोरसूयाप्रतिवचने ॥ २८ ॥

कर्मणि दृशिविदोः साकल्ये ॥ २९ ॥

यावति विन्दजीवोः ॥ ३० ॥

चर्मोदरयोः पूरेः ॥ ३१ ॥

वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् ॥ ३२ ॥

चेले क्नोपेः ॥ ३३ ॥

निमूलसमूलयोः कषः ॥ ३४ ॥

शुष्कचूर्णरूक्षेषु पिषः ॥ ३५ ॥

समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥ ३६ ॥

करणे हनः ॥ ३७ ॥

१ हनः करणेऽनर्थकं वचनं हिंसार्थेभ्यो णमुल्विधानात् ।

२ अर्थवत्त्वाहिंसार्थस्य विधानात् ।

३ नित्यसमासार्थं च ।

स्नेहने पिषः ॥ ३८

हस्ते वर्तिग्रहोः ॥ ३९ ॥

स्वे पुषः ॥ ४० ॥

अधिकरणे बन्धः ॥ ४१ ॥

संज्ञायाम् ॥ ४२ ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहोः ॥ ४३ ॥

ऊर्ध्वे शुषिपूरोः ॥ ४४ ॥

उपमाने कर्मणि च ॥ ४५ ॥

कषादिषु यथाविध्यनुप्रयोगः ॥ ४६ ॥

उपदंशस्तृतीयायाम् ॥ ४७ ॥

हिंसार्थानां च समानकर्मकाणाम् ॥४८॥

सप्तम्यां चोपपीडरुधकर्षः ॥ ४९ ॥

समासत्तौ ॥ ५० ॥

प्रमाणे च ॥ ५१ ॥

अपादाने परीप्सायाम् ॥ ५२ ॥

द्वितीयायां च ॥ ५३ ॥

स्वाङ्गेऽध्रुवे ॥ ५४ ॥

परिक्लिश्यमाने च ॥ ५५ ॥

विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥ ५६ ॥

अस्यतितृषोः क्रियान्तरे कालेषु ॥ ५७ ॥

नाम्न्यादिशिग्रहोः ॥ ५८ ॥

अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ॥ ५९ ॥

तिर्यच्यपवर्गे ॥ ६० ॥

स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥ ६१ ॥

नाधार्थप्रत्यये च्व्यर्थे ॥ ६२ ॥

तूष्णीमि भुवः ॥ ६३ ॥

अन्वच्यानुलोम्ये ॥ ६४ ॥

शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥ ६५ ॥

पर्याप्तिवचनेष्वलमर्थेषु ॥ ६६ ॥

कर्तरि कृत् ॥ ६७ ॥

१ कर्तरि कृद्वचनमनादेशे स्वार्थविज्ञानात्।

२ तत्र ल्युनादिप्रतिषेधो नानावाक्यत्वात्।

३ तद्वच्च कृत्येष्ववेकारकरणम् ।

४ तच्च भव्याद्यर्थम् ।

५ ऋषिदेवततयोः कृद्भिः[1] समावेशवचनं ज्ञापकमसमावेशस्य ।

६ एवकारकरणं चार्थे ।

७ तच्च भव्याद्यर्थम् ।

८ तत्र प्रत्ययनियमेऽनिष्टप्रसङ्गः ।

९ संज्ञानियमे सिद्धम् ।

१० विभक्त्यादिषु चाप्राप्तिः प्रकृतेः प्रत्ययपरवचनात् ।

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ॥ ६८ ॥

लः कर्मणि च भावे चाकर्मकेभ्यः ॥ ६९ ॥

१ लग्रहणं सकर्मकनिवृत्त्यर्थम्[2] ।

तयोरेव कृत्यक्तखलर्थाः ॥ ७० ॥

आदिकर्मणि क्तः कर्तरि च ॥ ७१ ॥

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥ ७२ ॥

दाशगोघ्नौ संप्रदाने ॥ ७३ ॥

भीमादयोऽपादाने ॥ ७४ ॥

ताभ्यामन्यत्रोणादयः ॥ ७५ ॥

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥ ७६ ॥

लस्य ॥ ७७ ॥

१ लादेशे सर्वप्रसङ्गोऽविशेषात्[3] ।

२ अर्थवद्ग्रहणात्सिद्धमिति चेन्न वर्णग्रहणेषु ।

३ तस्माद्विशिष्टग्रहणम् ।

४ लादेशो वर्णविधेः पूर्वविप्रतिषिद्धम् ।

५ [4]उक्तं वा ।

तिप् तस् झि सिप् थस् थ मिब्वस् मस् तातां झ थासाथां ध्वमिड्वहिमहिङ् ॥ ७८ ॥

टित आत्मनेपदानां टेरे ॥ ७९ ॥

१ टित एत्व आत्मनेपदेष्वान प्रतिषेधः ।

२ [5]उक्तं वा ।

थासः से ॥ ८० ॥

लिटस्तझयोरेशिरेच् ॥ ८१ ॥

परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ॥ ८२ ॥

१ णलः शित्करणं सर्वादेशार्थम् ।

२ [6]उक्तं वा ।

३ अकारस्य शित्करणं सर्वादेशार्थम् ।

४ अकारवचनं समसंख्यार्थम् ।

५ तस्माच्छित्करणम् ।

विदो लटो वा ॥ ८३ ॥

ब्रुवः पञ्चानामादित आहो ब्रुवः ॥ ८४ ॥

---

१ प. पुस्तके इतः परमधिकम् । कृद्भिरित्यस्य स्थाने कर्तरीति पदम् । २ प. पुस्तके इतः परमधिकम् विप्रतिषेधाद्वानः कर्तरि । सर्वप्रसङ्गस्तु । सर्वत्राप्रसङ्गस्तु । सर्वप्रसङ्गस्तु । ३ प. पुस्तके इतः परमधिकम् अर्थवद्ग्रहणात्सिद्धम् । ४-६ प. पुस्तके नास्ति ।

लोटो लङ्वत् ॥ ८५ ॥
१ लङ्वदतिदेशे जुस्भावप्रतिषेधः ।
२ उत्ववचनात्सिद्धम् ।
एरुः ॥ ८६ ॥
सेर्ह्यपिच्च ॥ ८७ ॥
वा छन्दसि ॥ ८८ ॥
मेर्निः ॥ ८९ ॥
१ हिन्योरुत्वप्रतिषेधः ।
२ न वोच्चारणसामर्थ्यात् ।
आमेतः ॥ ९० ॥
सवाभ्यां वामौ ॥ ९१ ॥
आडुत्तमस्य पिच्च ॥ ९२ ॥
एत ऐ ॥ ९३ ॥
१ एत ऐत्व आड्गुणप्रतिषेधः ।
२ न वा बहिरङ्गलक्षणत्वात् ।
लेटो ऽडाटौ ॥ ९४ ॥
आत ऐ ॥ ९५ ॥
वैतो ऽन्यत्र ॥ ९६ ॥
इतश्च लोपः परस्मैपदेषु ॥ ९७ ॥
स उत्तमस्य ॥ ९८ ॥
नित्यं ङितः ॥ ९९ ॥
इतश्च ॥ १०० ॥
तस्थस्थमिपां तांतंतामः ॥ १०१ ॥
लिङः सीयुट् ॥ १०२ ॥
१ यासुडादेः सीयुट्प्रतिषेधः ।
२ न वा वाक्यापकर्षात् ।
३ सुट्तिथोस्त्वपकर्षविज्ञानात् ।
४ अनादेश्च सुड्वचनम् ।
५ न वा तिथोः प्रधानभावात्तद्विशेषणं लिङ्ग्रहणम् ।

यासुट् परस्मैपदेषूदात्तो ङिच्च ॥ १०३ ॥
१ यासुटो ङिद्वचनं पिदर्थम् ।
२ उदात्तवचनं च ।
३ आगमानुदात्तार्थं वा ।
किदाशिषि ॥ १०४ ॥
झस्य रन् ॥ १०५ ॥
इटो ऽत् ॥ १०६ ॥
सुट् तिथोः ॥ १०७ ॥
झेर्जुस् ॥ १०८ ॥
सिजभ्यस्तविदिभ्यश्च ॥ १०९ ॥
आतः ॥ ११० ॥
१ जुस्याकारग्रहणं नियमार्थमिति चेत्सिज्लुग्ग्रहणम् ।
२ ज्ञापकमिति चेत्प्रत्ययलक्षणप्रतिषेधः ।
३ एवकारकरणं च ।
४ लङ्ग्रहणं च ।
लङः शाकटायनस्यैव ॥ १११ ॥
द्विषश्च ॥ ११२ ॥
तिङ्शित्सार्वधातुकम् ॥ ११३ ॥
आर्धधातुकं शेषः ॥ ११४ ॥
१ आर्धधातुकसंज्ञायां धातुग्रहणम् ।
२ स्वादिप्रतिषेधः ।
३ तद्विधानात्सिद्धम् ।
लिट् च ॥ ११५ ॥
लिङाशिषि ॥ ११६ ॥
छन्दस्युभयथा ॥ ११७ ॥

॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥

चतुर्थोऽध्यायः ।

ङ्याप्प्रातिपदिकात् ॥ १ ॥

१[1] ङ्याप्प्रातिपदिकग्रहणमङ्गभपदसंज्ञार्थम् ।

२ यच्छयोश्च लुगर्थम् ।

३ वृद्धावृद्धावर्णस्वरद्व्यज्लक्षणे च प्रत्ययविधौ तत्संप्रत्ययार्थम् ।

४ ङ्याब्ग्रहणमनर्थकं प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् ।

५ प्रयोजनं सर्वनामस्वरसमासताद्धितविधिलुगलुगर्थम् ।

६ मानिनि च विधिप्रतिषेधार्थम् ।

७ प्रत्ययग्रहणोपचारेषु च ।

८ अतिप्रसङ्ग उपपदविधौ ।

९ यञिञोः फकि ।

१० समासान्तेषु च ।

११ महदात्वे प्रियादिषु ।

१२ ञ्नित्स्वरे ।

१३ राज्ञः स्वरे ब्राह्मणकुमारयोः ।

१४ समाससंघातग्रहणेषु च ।

१५ विभक्तौ[1] चोक्तम् ।

१६ तद्धितविधानार्थं[2] तु ।

१७ विप्रतिषेधाद्धि तद्धितबलीयस्त्वम् ।

१८ तत्र समासान्तेषु दोषः ।

१९ त्यूङोश्च ग्रहणम् ।

२० तदन्तस्य च प्रत्ययार्थेनायोगात्तद्धितानुत्पत्तिः ।

२१ [2]उक्तं वा ।

स्वौ जसमौट्छष्टा भ्याम् भिस् ङेभ्याम् भ्यस् ङसि भ्याम् भ्यस् ङसोसाम् ङ्योस् सुप् ॥ २ ॥

स्त्रियाम्[3] ॥ ३ ॥

१ स्त्रियामिति स्त्र्यर्थाभिधाने चेट्टाबादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः[4] ।

२ स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात्स्त्रियामिति लिङ्गानुपपत्तिः ।

३ स्त्रीसमानाधिकरणादिति चेद्भूतादिष्वतिप्रसङ्गः ।

४ षट्संज्ञकेभ्यश्च प्रतिषेधः ।

५ सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादयः ।

६ गुणवचनस्य चाश्रयतो लिङ्गवचनभावात् ।

७ भावस्य च भावयुक्तत्वात् ।

८ स्त्रीविषये ङ्यापोरप्रसिद्धिरकारान्तादर्शनात् ।

९ सर्वेषां तु स्वरवर्णानुपूर्वीज्ञानार्थ उपदेशः ।

१० तस्मात्सिद्धम् ।

१-२ प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप्प्रसज्यते । नत्वं खरकुटीः पश्य । खट्वावृक्षौ न सिध्यतः । नपुंसकं भवेत्तस्मिन् । तदभावे नपुंसकम् । असत्तु मृगतृष्णावत् । गंधर्वनगरं यथा । आदित्यगतिवत्सन्न । वस्त्रान्तर्हितवच्च तत् । तयोस्तु तत्कृतं दृष्ट्वा । यथाकाशेन ज्योतिषः । अन्योन्यसंश्रयं त्वेतत् । प्रत्यक्षेण विरुध्यते । तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति । संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः । संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान् । तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् । ४ प. पुस्तके इतः परमधिकम् । एकत्वात्स्त्रीत्वस्य ।

अजाद्यतष्टाप् ॥ ४ ॥

१ शूद्रा चामहत्पूर्वा ।

२ जातिः ।

ऋन्नेभ्यो ङीप् ॥ ५ ॥

उगितश्च ॥ ६ ॥

१ धातोरुगितः प्रतिषेधः ।

२ अञ्चतेश्चोपसंख्यानम् ।

३ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ।

वनो र च ॥ ७ ॥

१ वनो न हशः[1] ।

२ रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वात् ।

३ अनो बहुव्रीहिप्रतिषेधे वोपधालोपिनो वावचनम् ।

पादो ऽन्यतरस्याम् ॥ ८ ॥

टावृचि ॥ ९ ॥

न षट्स्वस्रादिभ्यः[2] ॥ १० ॥

मनः ॥ ११ ॥

अनो बहुव्रीहेः ॥ १२ ॥

डाबुभाभ्यामन्यतरस्याम् ॥ १३ ॥

अनुपसर्जनात् ॥ १४ ॥

१ अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदन्तविधिप्रतिषेधात् ।

२ ज्ञापकं तु पूर्वत्र तदन्ताप्रतिषेधस्य ।

३ पूर्वसूत्रनिर्देशो वापिशलमधीत इति ।

४ जातिशब्देभ्यस्त्वतिप्रसङ्गः ।

५ सिद्धं तु जातेरनुपसर्जनत्वात् ।

६ अनुपसर्जनाधिकारे जातेर्ङीण्विधाने सुपर्ण्या उपसंख्यानम् ।

७ न वा समासस्यानुपसर्जनत्वाज्जातिवाचकत्वाच्च शब्दस्य सामान्येन ङीप्विधानम् ।

टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ॥ १५ ॥

१ ढग्रहणे सानुबन्धकस्योपसंख्यानम् ।

२ अननुबन्धकग्रहणे हि न सानुबन्धकस्य ।

३ अञ्ग्रहणमनर्थकं तदन्ताद्धि ङीन्विधानम् ।

४ न वा जात्यधिकारात् ।

५ अनधिकारे हि पुंयोगादाख्यायां ङीन्प्रसङ्गः[3] ।

६ ख्युन उपसंख्यानम् ।

यञश्च[4] ॥ १६ ॥

प्राचां ष्फ तद्धितः ॥ १७ ॥

१ तद्धितवचनं षितः प्रातिपदिकादीकारार्थम् ।

सर्वत्र लोहितादिकतन्तेभ्यः ॥ १८ ॥

१ लोहितादिषु शाकल्यस्योपसंख्यानम्[5] ।

कौरव्यमाण्डूकाभ्यां च ॥ १९ ॥

१ कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम् ।

२ छश्च[6] ।

---

१ प. पुस्तके इतः परमधिकम् । बहुलं छन्दसि । २ प. पुस्तके इतः परमधिकम् । षट्संज्ञानामन्ते लुप्ते टाबुत्पत्तिः कस्मान्न स्यात् । प्रत्याहाराचापा सिद्धम् । दोषस्त्विव्वे । तस्मान्नोभौ । ३ प. पुस्तके इतः परमधिकम् । नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् । ४ प. पुस्तके इतः परमधिकम् । अपत्यग्रहणं द्वीपाद्यञः प्रतिषेधार्थम् । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । कण्वात्तु शकलः पूर्वः । कतादुत्तर इष्यते । पूर्वोत्तरौ तदन्तादी । ष्फाणौ तत्र प्रयोजनम् । ६ प. पुस्तके इतःपरमधिकम् । वयस्यचरम इति वक्तव्यम् ।

वयसि प्रथमे ॥ २० ॥
द्विगोः ॥ २१ ॥
अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि ॥ २२ ॥
काण्डान्तात्क्षेत्रे ॥ २३ ॥
पुरुषात्प्रमाणेऽन्यतरस्याम् ॥ २४ ॥
बहुव्रीहेरूधसो ङीष् ॥ २५ ॥

१ ऊधसो नकारो लिङ्गाधिकारे ।
२ न वा समासान्ताधिकारे स्त्रीग्रहणात्[1] ।
३ इतरथा हि कब्विधिप्रसङ्गः ।

संख्याव्ययादेर्ङीप् ॥ २६ ॥
दामहायनान्ताच्च ॥ २७ ॥

१ दामहायनान्तात्संख्यादेः ।
२ तत्पुरुषविज्ञानाद्वा सिद्धम्[2] ।

अन उपधालोपिनोऽन्यतरस्याम् ॥२८॥
नित्यं संज्ञाछन्दसोः ॥ २९ ॥
केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ॥ ३० ॥
रात्रेश्चाजसौ[3] ॥ ३१ ॥
अन्तर्वत्पतिवतोर्नुक् ॥ ३२ ॥

१ अन्तर्वत्पतिवदिति गर्भभर्तृसंयोगे[4] ।

पत्युर्नो यज्ञसंयोगे ॥ ३३ ॥
विभाषा सपूर्वस्य ॥ ३४ ॥

१ पत्युः सपूर्वादुपसर्जनसमास उपसंख्यानम् ।
२ सिद्धं तु पत्युः प्रातिपदिकविशेषणत्वात् ।

नित्यं सपत्न्यादिषु ॥ ३५ ॥
पूतक्रतोरै च ॥ ३६ ॥

१ पूतक्रत्वादीनां पुंयोगप्रकरणे वचनम् ।
२ लिङ्गसंनियोगेन सर्वत्रागमादेशानां वचने लिङ्गलुकि तत्कृतप्रसङ्गः ।
३ सिद्धं त्वागमादेशानामङ्गतः स्त्रीप्रकरणे वचनात् ।
४ लिङ्गलुकि वा प्रकृतिप्रत्यापत्तिवचनम् ।

वृषाकप्यग्निकुसितकुसीदानामुदात्तः ३७
मनोरौ वा ॥ ३८ ॥
वर्णादनुदात्तात्तोपधात्तो नः ॥ ३९ ॥

१ असितपलितयोः प्रतिषेधः ।
२ छन्दसि क्नमेके ।
३ वर्णान्ङीब्विधाने पिशङ्गादुपसंख्यानम् ।

अन्यतो ङीष् ॥ ४० ॥
षिद्गौरादिभ्यश्च ॥ ४१ ॥
जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ॥ ४२ ॥

१ नीलादोष[illegible] ।
२ प्राणिनि [illegible]व ।
३ वा संज्ञा[illegible]याम् ।

शोणात्प्रा[illegible]याम् ॥ ४३ ॥
वोतो गुण[illegible]वचनात् ॥ ४४ ॥

१ गुण[illegible]वचनान्ङीवाद्युदात्तार्थम् ।

---

१ प. पुस्तके समासान्ताधिकारे इत्यस्य स्थाने समासान्ते इति पाठः । २ प. पुस्तके इतःपरमधिकम् । हायनो वयसि स्मृतः । ३ प. पुस्तके इतः परमधिकम् । अजसादि[illegible]ति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । अन्तर्वत्पतिवतोस्तु मतुब्वत्वे निपातनात् । गर्भिण्यां जीवप[illegible]त्यां च । वा च छन्दसि नुग्भवेत् ।

२ खरुसंयोगोपधप्रतिषेधश्च ।

बह्वादिभ्यश्च ॥ ४५ ॥

नित्यं छन्दसि ॥ ४६ ॥

भुवश्च ॥ ४७ ॥

पुंयोगादाख्यायाम्[1] ॥ ४८ ॥

१ पुंयोगादाख्यायां तद्धितलुग्वचनम् ।
२ लुवन्तसमासवचनाच्चाकारान्तानुपपत्तिः ।
३ सिद्धं तु स्त्रियाः पुंशब्देनाभिधानात् ।
४ गतिकारकोपपदानां कृद्भिः सह समासवचनम् ।
५ प्रयोजनं क्तादल्पाख्यायाम् ।
६ जातेर्ङीष्विधानम् ।
७ समासान्तस्य णत्वे ।
८ कृदन्तात्तद्धिते वृद्धिस्वरौ च ।
९ अवदातायां तु ङीप्प्रसंगः[2] ।

इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् ॥ ४९ ॥

१ हिमारण्ययोर्महत्त्वे ।
२ यवाद्दोषे ।
३ यवनाल्लिप्याम् ।
४ उपाध्यायमातुलाभ्यां वा ।
५ मुद्गलाच्छन्दसि लिच्च ।
६ आचार्यादणत्वं च ।
७ अर्यक्षत्रियाभ्यां वा ।

क्रीतात्करणपूर्वात् ॥ ५० ॥

क्तादल्पाख्यायाम् ॥ ५१ ॥

बहुव्रीहेश्चान्तोदात्तात् ॥ ५२ ॥

१ अन्तोदात्ते जातप्रतिषेधः ।
२ पाणिगृहीत्यादीनां विशेषे ।
३ बहुलं तणि ।
४ [4]प्रवद्धविलूनाद्यर्थम् ।
५ अन्तोदात्तादबह्वन्स्नुकालसुखादिपूर्वात्
६ जातिपूर्वाद्वा ।

अस्वाङ्गपूर्वपदाद्वा ॥ ५३ ॥

स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ५४ ॥

१ उपसर्जनग्रहणमनर्थकं बहुव्रीह्यधिकारात् ।
२ बह्वजर्थमिति चेत्स्वाङ्गग्रहणात्सिद्धम् ।
३ अनन्तोदात्तार्थमिति चेत्सहादिकृतत्वात्सिद्धम् ।
४ स्वाङ्गसमुदायप्रतिषेधार्थं तु ।

नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च ॥ ५५ ॥

१ नासिकादीनां विभाषायां पुच्छाच्च[5] ।
२ कबरमणिविषशरेभ्यो नित्यम् ।
३ उपमानात्पक्षाच्च ।
४ नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन ।

न क्रोडादिबह्वचः ॥ ५६ ॥

सहनञ्विद्यमानपूर्वाच्च ॥ ५७ ॥

नखमुखात्संज्ञायाम् ॥ ५८ ॥

दिर्घजिह्वी च च्छन्दसि ॥ ५९ ॥

दिक्पूर्वपदान्ङीप् ॥ ६० ॥

१ दिक्पूर्वपदान्ङीपोऽनुदात्तत्वम् ।

१ प. पुस्तके इतःपरमधिकम् । गोपालिकादीनां प्रतिषेधः । २ प. पुस्तके ङीप्प्रतिषेधः इति पाठः ३ प. पुस्तके इतः परमधिकम् । सूर्याद्देवतायां चाब्वक्तव्यः । ४ प पुस्तके प्रवृद्ध° इति पाठः । ५ प. पुस्तके पुच्छाच्चेत्यधिकम् ।

२ ङीब्विधाने ह्यन्यत्रापि ङीष्विषयान्ङी-
प्प्रसङ्गः ।

वाहः ॥ ६१ ॥

सख्यशिश्वीति भाषायाम् ॥ ६२ ॥

जातेरस्त्रीविषयादयोपधात् ॥ ६३ ॥

१ योपधप्रतिषेधे गवयहयमुकयमनुष्यम-
त्स्यानामप्रतिषेधः ।

**पाककर्णपर्णपुष्पफलमूलबालोत्तरप-
दाच्च ॥ ६४ ॥**

१ सदक्काण्डप्रान्तशतैकेभ्यः पुष्पात् प्रति-
षेधः ।

२ समंस्त्राजिनशणपिण्डेभ्यः फलात् ।

३ त्रेश्च ।

४ मूलान्नञः ।

इतो मनुष्यजातेः ॥ ६५ ॥

१ इतो मनुष्यजातेरिञ उपसंख्यानम् ।

ऊङुतः ॥ ६६ ॥

१ ऊङ्प्रकरणेऽप्राणिजातेश्चारज्ज्वादीनाम्

बाह्वन्तात्संज्ञायाम् ॥ ६७ ॥

पङ्गोश्च ॥ ६८ ॥

ऊरूत्तरपदादौपम्ये ॥ ६९ ॥

संहितशफलक्षणवामादेश्च[1] ॥ ७० ॥

कद्रुकमण्डल्वोश्छन्दसि[2] ॥ ७१ ॥

संज्ञायाम् ॥ ७२ ॥

शार्ङ्गरवाद्यञो ङीन् ॥ ७३ ॥

यङश्चाप् ॥ ७४ ॥

१ षाच्च यञश्चाप् ।

आवट्याच्च ॥ ७५ ॥

१ अन उपधालोपिन ऊधसो ङीष् पूर्व-
विप्रतिषिद्धम् ।

२ आवट्याद्यञः ष्फश्चापः ।

तद्धिताः ॥ ७६ ॥

यूनस्तिः ॥ ७७ ॥

**अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्
गोत्रे[3] ॥ ७८ ॥**

१ ष्यङ्यनादेशे यलोपवचनम् ।

२ द्विरण्विधिः ।

३ आदेशे नलोपवचनम् ।

४ न वा ष्यङो लोपनिमित्तत्वात्[5] ।

---

१ प. पुस्तके इतः परमधिकम्। श्वेताच्च। २ प. पुस्तके इतः परमधिकम्। साहितसहाभ्यां चेति वक्तव्यम्। ३ प. पुस्तके इतः परमधिकम्। कद्रुकमण्डलुगुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम्। ४ प. पुस्तके इतः परमधिकम्। प्रकर्षे चोत्तमं कृत्वा दाक्ष्या नोपोत्तमं गुरु। आम्विधिः केन ते न स्यात्प्रकर्षे यद्ययं तमः। उद्गतस्य प्रकर्षोऽयं गतशब्दोऽत्र लुप्यते। नाव्ययार्थप्रकर्षोऽस्ति धात्वर्थोऽत्र प्रकृष्यते। उद्गतोऽपेक्षते किंचित् त्रयाणां द्वौ किलोद्गतौ। चतुष्प्रभृति कर्तव्यो वाराह्यायां न सिध्यति। भिद्यतेऽस्य स्वरस्तेन विधिश्चामो न लक्ष्यते। शब्दान्तरमिदं विद्यादष्टमभ्यन्तरं त्रिषु। ५ प. पुस्तके इतः परमधिकम्। अनुबन्धौ त्वया कार्यौ। चावर्थं टाब्विधिर्मम। उक्तेऽपि हि भवन्त्येते। तेन जिन्न भविष्यति। अरथानिवत्त्वे दोषस्ते वृद्धिरत्र न सिध्यति। त्वयाप्यत्र विशेषार्थं कर्तव्यं स्याद्विशेषणम्। पाश्यायां ते कथं न स्यात्। एको मे स्याद्विशेषणम्। अन्यस्मिन्सूत्रभेदः स्यात्। षिति लिङ्गं प्रसज्यते। ङिति चेत्क्रियते दोषः। व्यवधानान्न दुष्यति। योऽनन्तरो न धातुः सः। यो धातुः सोऽननन्तरः। न चेदुभयतः साम्यमुभयत्र प्रसज्यते। यद्वा विशेष्येत यदीह धातुर्यङ् धातुना वा यदि तुल्यमेतत्। उभौ प्रधानं यदि नात्र दोषः। तथा प्रसार्येत तु वाक्पतिस्ते। धातुप्रकरणस्येह न स्थानमिति निश्चयः। आत्वार्थं यदि कर्तव्यं तत्रैवैतत्करिष्यते। उपदेशे यदेजन्तं तस्य चेदात्वमिष्यते। उद्देशो रूढिशब्दानां तेन गोर्न भविष्यति।

गोत्रावयवात् ॥ ७९ ॥

१ गोत्रावयवादगोत्रार्थमिति चेत्तदनिष्टम् ।

२ गोत्रादिति चेद्वचनानर्थक्यम् ।

३ अगुरूपोत्तमार्थमिति चेत्सर्वेषामवयवत्वात्सर्वप्रसङ्गः ।

४ सिद्धं तु रौढ्यादिषूपसंख्यानम् ।

क्रौड्यादिभ्यश्च ॥ ८० ॥

दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्यो ऽन्यतरस्याम् ॥ ८१ ॥

समर्थानां प्रथमाद्वा ॥ ८२ ॥

१ समर्थवचनमनर्थकं न ह्यसमर्थेनार्थाभिधानम् ।

२ प्रथमवचनमनर्थकं न ह्यप्रथमेनार्थाभिधानम् ।

३ [1]वावचने चोक्तम् ।

प्राग्दीव्यतो ऽण् ॥ ८३ ॥

१ प्राग्वचनं सकृद्विधानार्थम् ।

२ अधिकारात्सिद्धमिति चेदपवादविषयेऽणप्रसङ्गः ।

३ तस्मात्प्राग्वचनम् ।

४ न वा क्वचिद्वावचनात् ।

अश्वपत्यादिभ्यश्च ॥ ८४ ॥

दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ।८५।

१ वाक्पतिपितृमतां छन्दस्युपसंख्यानम् ।

२ पृथिव्या ञाञौ ।

३ देवस्य यञञौ ।

४ बहिषष्टिलोपो यञ्च ।

५ ईकक्च ।

६ ईकञ्छन्दसि ।

७ स्थाम्नोऽकारः ।

८ लोम्नोऽपत्येषु बहुषु ।

९ सर्वत्र गोरजादिप्रसङ्गे यत् ।

१० ण्यादयोऽर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धम् ।

उत्सादिभ्यो ऽञ् ॥ ८६ ॥

१ अञ्प्रकरणे ग्रीष्मादच्छन्दसि ।

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ॥ ८७ ॥

१ नञ्स्नञौ भवनादिति[2] चेद्वत्यर्थे प्रतिषेधः ।

२ वतेः प्रागिति चेद्भाव उपसंख्यानम् ।

द्विगोर्लुगनपत्ये ॥ ८८ ॥

१ द्विगोर्लुकि तन्निमित्तग्रहणम् ।

२ अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपि ।

गोत्रे ऽलुगचि ॥ ८९ ॥

१ [3]गोत्रेऽलुगचीति चेदितरेतराश्रयत्वादप्रसिद्धिः ।

२ विप्रतिषेधात्तु लुकश्छविधानम्[4] ।

३ गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक् ।

४ एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतीति पदं नास्ति । ३ प. पुस्तके इदं नास्ति । ४ प. पुस्तके इतः परमधिकम् । भूम्नीति च लुक्प्राप्तो बाह्ये चार्थे विधीयतेऽजादिः । बहिरङ्गमन्तरङ्गाद्विप्रतिषेधादयुक्तं स्यात् । भूम्नि प्राप्तस्य लुको यदजादौ तद्धितेऽलुकं शास्ति । एतद्ब्रवीति कुर्वन्समानकालावलुग्लुक्च ॥ यदि वा लुकः प्रसङ्गे भवत्यलुक् छस्तथा प्रसिद्धोऽस्य । लुग्वालुकः प्रसङ्गं प्रतीक्षते छेऽलुगस्य तथा ।

५ गर्गभार्गविकाग्रहणं वा नियमार्थम् ।

६ उक्तं वा[1] ।

यूनि लुक् ॥ ९० ॥

१ यूनि लुगचीति चेत्प्रत्ययस्यायथेष्टप्रसङ्गः ।

२ सिद्धं त्वविशेषेण लुग्वचनं हलि च प्रतिषेधः ।

३ प्रयोजनं सौवीरगोत्रेभ्यो णठक्छाः ।

४ इञ्ण्यौ सर्वत्र ।

५ प्राग्दीव्यतोऽधिकारे यूनो वृद्धवदतिदेशः[2] ।

फक्फिञोरन्यतरस्याम् ॥ ९१ ॥

तस्यापत्यम्[3] ॥ ९२ ॥

१ तद्धितार्थनिर्देशे लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात् ।

२ सर्वनामनिर्देशे विशेषासंप्रत्ययः सामान्यनिर्देशात् ।

३ सामान्यचोदनास्तु विशेषेषु ।

४ अपत्याभिधाने स्त्रीपुंलिङ्गस्याप्रसिद्धिर्नपुंसकत्वात् ।

५ सिद्धं तु प्रजनस्य विवक्षितत्वात् ।

६ एकार्थे शब्दान्यत्वादृष्टं लिङ्गान्यत्वम् ।

७ अवयवान्यत्वाच्च ।

एको गोत्रे ॥ ९३ ॥

१ उत्पादयितारं प्रत्यपत्ययोगात्तस्य च विवक्षितत्वादेकवचनं गोत्रे ।

२ तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो गोत्रे नियतत्वात् ।

३ परमप्रकृतेश्चोत्पत्तिः ।

४ स्त्रियां चानियमः ।

५ यूनि चान्तर्हितेऽप्राप्तिः ।

६ सर्वेषामपत्ययोगात्प्रत्ययान्ताद्गोत्रे प्रतिषेधार्थमेको गोत्रे ।

७ नियमानुपपत्तिश्च ।

८ न ह्येकस्मिन्नपत्येऽनेकप्रत्ययप्राप्तिः ।

९ अपत्यान्तरे शब्दान्तरात्प्रत्ययान्तरप्राप्तिः[4] ।

१० तस्मात्प्रतिषेधः ।

११ संज्ञाकारिभ्यो वा प्रत्ययोत्पत्तिः ।

१२ गोत्राद्यूनीति च ।

१३ तच्च जात्यादिनिवृत्त्यर्थम् ।

गोत्राद्यून्यस्त्रियाम् ॥ ९४ ॥

अत इञ् ॥ ९५ ॥

१ इञो वृद्धावृद्धाभ्यां फिञ्फिनौ विप्रतिषेधेन ।

२ तद्राजश्च ।

बाह्वादिभ्यश्च ॥ ९६ ॥

१ बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः ।

२ संबन्धिशब्दप्रत्ययानां तत्सदृशात्प्रतिषेधः ।

सुधातुरकङ् च ॥ ९७ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । राजन्याद्वुञ्मनुष्याच्च ज्ञापकं लौकिकं परम् । ३ प. पुस्तके इतः परमधिकम् । तस्येदमित्यपत्येऽपि । बाधनार्थं तु कृतं भवेत् । उत्सर्गः शेष एवासौ । वृद्धान्यस्य प्रयोजनम् । ४ प. पुस्तके इतः परमधिकम् । अपत्यं समुदायश्चोऽनियमोऽत्र समीक्षितः । तस्मिन् सुबह्वः प्राप्ता नियमोऽस्य भविष्यति ।

१ सुधातृव्यासयोः ।

गोत्रे कुञ्जादिभ्यश्च्फञ् ॥ ९८ ॥

नडादिभ्यः फक् ॥ ९९ ॥

हरितादिभ्योऽञः ॥ १०० ॥

यञिञोश्च ॥ १०१ ॥

शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु ॥ १०२ ॥

द्रोणपर्वतजीवन्तादन्यतरस्याम् ॥ १०३ ॥

अनृष्यानन्तर्ये विदादिभ्योऽञ् ॥ १०४ ॥

१ अनृष्यानन्तर्यवचनमनर्थकं संज्ञागोत्राधिकारात् ।

गर्गादिभ्यो यञ् ॥ १०५ ॥

मधुबभ्रोर्ब्राह्मणकौशिकयोः ॥ १०६ ॥

कपिबोधादाङ्गिरसे ॥ १०७ ॥

वतण्डाच्च ॥ १०८ ॥

लुक् स्त्रियाम् ॥ १०९ ॥

अश्वादिभ्यः फञ् ॥ ११० ॥

भर्गात्त्रैगर्ते ॥ १११ ॥

शिवादिभ्योऽण् ॥ ११२ ॥

अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः ॥ ११३ ॥

ऋष्यन्धकवृष्णिकुरुभ्यश्च ॥ ११४ ॥

१ ऋषिस्त्र्यणो ढग्ढकौ विप्रतिषेधेन ।

२ द्व्यचो ढको ढ्रग्ढञौ ।

३ न वर्ष्यणः पुनर्वचनमन्यनिवृत्त्यर्थम् ।

४ तस्मादृषिभ्योऽण्विधानेऽञ्यादिप्रतिषेधः ।

५ ढकः पुनर्वचनमन्यानिवृत्त्यर्थम् ।

६ तस्मात्तन्नामिकाण्यद्व्यचः ।

७ ऋष्यन्धकवृष्णिकुर्वणः सेनान्ताण्ण्यः[2] ।

मातुरुत् संख्यासंभद्रपूर्वायाः ॥ ११५ ॥

कन्यायाः कनीन च ॥ ११६ ॥

विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ॥ ११७ ॥

पीलाया वा ॥ ११८ ॥

ढक् च मण्डूकात् ॥ ११९ ॥

स्त्रीभ्यो ढक् ॥ १२० ॥

द्व्यचः ॥ १२१ ॥

इतश्चानिञः ॥ १२२ ॥

शुभ्रादिभ्यश्च ॥ १२३ ॥

विकर्णकुषीतकात्काश्यपे ॥ १२४ ॥

भ्रुवो वुक् च ॥ १२५ ॥

कल्याण्यादीनामिनङ् च ॥ १२६ ॥

कुलटाया वा ॥ १२७ ॥

चटकाया ऐरक् ॥ १२८ ॥

१ चटकायाः पुंलिङ्गनिर्देशः ।

२ स्त्रियामपत्ये लुक् ।

गोधाया ढ्रक् ॥ १२९ ॥

आरगुदीचाम् ॥ १३० ॥

१ आरग्वचनमनर्थकं रका सिद्धत्वात् ।

क्षुद्राभ्यो वा ॥ १३१ ॥

पितृष्वसुश्छण् ॥ १३२ ॥

ढकि लोपः ॥ १३३ ॥

मातृष्वसुश्च ॥ १३४ ॥

चतुष्पाद्भ्यो ढञ् ॥ १३५ ॥

---

१ प. पुस्तके इतः परमधिकम् । सुधातृव्यासवरुडनिषादचण्डालबिम्बानामिति वक्तव्यम् । २ प पुस्तके इतः परमधिकम् । वडवाया वृषे वाच्ये । अणू कुञ्चाकोकिलात्स्मृतः । आरक् पुंसि ततोऽन्यत्र गोधाया ढ्रग्विधौ स्मृत

गृष्ट्यादिभ्यश्च ॥ १३६ ॥

राजश्वशुराद्यत् ॥ १३७ ॥

१ राज्ञोऽपत्ये जातिग्रहणम् ।

क्षत्राद्घः ॥ १३८ ॥

कुलात्खः ॥ १३९ ॥

अपूर्वपदादन्यतरस्यां यड्ढकञौ ॥१४०॥

महाकुलादञ्खञौ ॥ १४१ ॥

दुष्कुलाड्ढक् ॥ १४२ ॥

स्वसुश्छः ॥ १४३ ॥

भ्रातुर्व्यच्च ॥ १४४ ॥

व्यन्सपत्ने ॥ १४५ ॥

१ व्यन्वचनमनर्थकं प्रत्ययार्थाभावात् ।

रेवत्यादिभ्यष्ठक् ॥ १४६ ॥

गोत्रस्त्रियाः कुत्सने ण च ॥ १४७ ॥

१ गोत्रस्त्रियाः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य ।

२ लुगर्थमिति चेन्न लुक्प्रतिषेधात्[1] ।

३ व्यवहितत्वादप्रतिषेध इति चेन्न पुंवद्भावात् ।

४ फिनर्थं तु ।

५ पुंवद्भावप्रतिषेधार्थं च ।

६ गोत्राद्यून्यस्त्रियामिति वचनादप्रयोजनम् ।

७ अवश्यत्वाद्वा स्त्रियाः प्रयोजनम् ।

वृद्धाट्ठक् सौवीरेषु बहुलम् ॥ १४८ ॥

फेश्छ च ॥ १४९ ॥

फाण्टाहृतिमिमताभ्यां णफिञौ । १५०॥

१ फाण्टाहृतेः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य ।

२ पुंवद्भावप्रतिषेधार्थं तु ।[2]

३ उक्तं वा ।

कुर्वादिभ्यो ण्यः ॥ १५१ ॥

१ वामरथस्य कण्वादिवत्स्वरवर्जम् ।

सेनान्तलक्षणकारिभ्यश्च ॥ १५२॥

उदीचामिञ् ॥ १५३ ॥

१ उदीचामिञ्विधौ तक्ष्णोऽण्वचनम् ।

२ शिवादिरिति चेण्ण्यविधिः ।

३ सिद्धं तूदीचां वा ण्यवचनात् ।

तिकादिभ्यः फिञ् ॥ १५४ ॥

कौसल्यकार्मार्याभ्यां च ॥ १५५ ॥

१ फिञ्प्रकरणे दगुकोसलकर्मारच्छागवृषाणां युट्[3] च ।

अणो द्व्यचः ॥ १५६ ॥

उदीचां वृद्धादगोत्रात् ॥ १५७ ॥

वाकिनादीनां कुक् च ॥ १५८ ॥

१ कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात् ।

२ पूर्वान्ते नलोपवचनम् ।

३ सिद्धं त्वादिष्टस्य कुड्वचनात् ।

४ कारिभ्य इञोऽगोत्रात्फिञ्विप्रतिषेधेन ।

पुत्रान्तादन्यतरस्याम् ॥ १५९ ॥

प्राचामवृद्धात् फिन् बहुलम् ॥ १६० ॥

मनोर्जातावञ्यतौ षुक् च[4] ॥ १६१ ॥

---

१ प. पुस्तके इतः परमधिकम् । व्यवहितत्वादप्रतिषेधः । २ इदं प. पुस्तके नास्ति । ३ प. पुस्तके इतः परमधिकम् । सिद्धं त्वादिष्टस्य युड्वचनात् । ४ प. पुस्तके इतःपरमधिकम् । अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः ।

अपत्यं पौत्रप्रभृति गोत्रम् ॥ १६२ ॥

१ पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृतिसंज्ञाकरणम् ।

२ जीवद्वंश्यं च[1] कुत्सितम् ।

जीवति तु वंश्ये युवा ॥ १६३ ॥

१ जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं च ।

२ तच्च दैवदत्त्यर्थम् ।

३ वृद्धस्य च पूजायाम्[2] ।

४ आपत्यो वा गोत्रम् ।

५ परमप्रकृतेश्चापत्यः ।

६ आपत्याज्जीवद्वंश्यात्स्वार्थे द्वितीयो युवसंज्ञः ।

७ स चास्त्रियाम् ।

८ एको गोत्रग्रहणानर्थक्यं च ।

९ बहुवचनलोपिषु च सिद्धम् ।

भ्रातरि च ज्यायसि ॥ १६४ ॥

वान्यस्मिन्सपिण्डे स्थविरतरे जीवति[3] ॥ १६५ ॥

जनपदशब्दात्क्षत्रियादञ् ॥ १६६ ॥

१ क्षत्रियादेकराजात्संघप्रतिषेधार्थम् ।

२ क्षत्रियग्रहणानर्थक्यं चोक्तम्[4] ।

३ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्[5] ।

साल्वेयगान्धारिभ्यां च ॥ १६७ ॥

द्व्यञ्मगधकलिङ्गसूरमसादण् ॥ १६८ ॥

१ अणो व्यङ्ण्यञो विप्रतिषेधेन ।

२ व्यङः कुरुनादिभ्यो ण्यः ।

वृद्धेत्कोसलाजादाञ्ञ्यङ् ॥ १६९ ॥

कुरुनादिभ्यो ण्यः ॥ १७० ॥

साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् ॥ १७१ ॥

ते तद्राजाः ॥ १७२ ॥

कम्बोजाल्लुक् ॥ १७३ ॥

१ कम्बोजादिभ्यो लुग्वचनं चोडाद्यर्थम्[6] ।

स्त्रियामवन्तिकुन्तिकुरुभ्यश्च ॥ १७४ ॥

अतश्च ॥ १७५ ॥

१ अत इति तदन्ताग्रहणमवन्त्यादिभ्यो लुग्वचनात् ।

२ यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादिलुकः[7] ।

न प्राच्यभर्गादियौधेयादिभ्यः ॥ १७६ ॥

इति चतुर्थाध्यायस्य प्रथमः पादः ।

---

१ प. पुस्तके च स्थाने तु इति पाठः । २ वृद्धस्य च पूजायाम् । यूनश्च कुत्सायाम् । इति द्वयं वैदिकपुस्तके काशिकापुस्तके च सूत्रद्वयत्वेन परिगृहीतम् । चौ. पुस्तके तथैव गृहीतम् किंतु ( ) इति चिह्नान्तर्गतं प्रदर्शितम् । वस्तुतस्तु द्वयमिदं वार्तिकम् । भाष्ये तथैव परिग्रहणात् । सर्वेषु पुस्तकेषु (प. बा. प्र. कं) वार्तिकत्वेनैव तयो कथनम् । प. पुस्तके वार्तिकद्वयस्य 'जीवति तु वंश्ये युवा' इति स्थलं प्रदर्शितम् । किंतु महाभाष्ये वृद्धस्य पूजायामित्येकमेव पूर्वोक्तस्थले लभ्यते । यूनश्च कुत्सयामिति तु नोपलभ्यते । अस्माभिर्वार्तिकपाठ एव ग्रहणं कृतम् । अत एव सूत्रत्वेनैतयोरग्रहः । ३ प. पुस्तके इतः परमाधिकम् । गोत्रयुनोः समावेशे को दोपस्तात्कृतं भवेत् । यस्कादिषु न दोषोऽस्ति न यूनीत्यनुवर्तनात् । दोषोऽत्रिविदग्धाला न यूनीत्यनुवर्तनात् । कण्वादिषु न दोषोऽस्ति न ग्यून्यस्ति ततः परम् । एको गोत्रे प्रतिपदम् । गोत्राद्यूनि च तत्स्मरेत् । राजन्यादुन्मनुष्याच्च ज्ञापकं लौकिकं परम् । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । पूरोरण्वक्तव्यः । पाण्डोर्ड्यण्वक्तव्यः । ६ प. पुस्तके चोलाद्यर्थम् । ७ प. पुस्तके इतः परमधिकम् । पर्श्वादिभ्यो लुग्वक्तव्यः ।

तेन रक्तं रागात् ॥ १ ॥

१ रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाध्यानर्थक्यम् ।

लाक्षारोचनाट्ठक् ॥ २ ॥

१ ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् ।

२ नील्या अन् ।

३ पीतात्कन् ।

४ हरिद्रामहारजनाभ्यामञ् ।

नक्षत्रेण युक्तः कालः ॥ ३ ॥

१[1] नक्षत्रेण चन्द्रमसो योगात्तद्युक्तात्काले प्रत्ययविधानम् ।

२ तत्रोत्तरपदलोपः ।

३ लिङ्गवचनानुपपत्तिश्च ।

४ कालयोगात्सिद्धम् ।

५ तथा च संप्रत्ययः ।

लुबविशेषे ॥ ४ ॥

संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ ५ ॥

द्वन्द्वाच्छः ॥ ६ ॥

दृष्टं साम ॥ ७ ॥

१ दृष्टं साम कलेर्ढक् ।

कलेर्ढक् ॥ ८ ॥

वामदेवाड्ड्यड्ड्यौ ॥ ९ ॥

परिवृतो रथः ॥ १० ॥

१ परिवृतो रथ इति तदेकान्तग्रहणम् ।

पाण्डुकम्बलादिनिः ॥ ११ ॥

द्वैपवैयाघ्रादञ् ॥ १२ ॥

कौमारापूर्ववचने ॥ १३ ॥

१ कौमारापूर्ववचन इत्युभयतः स्त्रिया अपूर्वत्वे[2] ।

२ पुंयोगात्स्त्र्यभिधानम् ।

तत्रोद्धृतममत्रेभ्यः ॥ १४ ॥

स्थण्डिलाच्छयितरि व्रते ॥ १५ ॥

संस्कृतं भक्षाः ॥ १६ ॥

शूलोखाद्यत् ॥ १७ ॥

दध्नष्ठक् ॥ १८ ॥

उदश्वितो ऽन्यतरस्याम् ॥ १९ ॥

क्षीराड्ढञ् ॥ २० ॥

सास्मिन्पौर्णमासीति ॥ २१ ॥

१ सास्मिन्पौर्णमासीति संज्ञाग्रहणम् ।

२ असंज्ञायां गरीयानुपसंयोगः ।

आग्रहायण्यश्वत्थाट्ठक् ॥ २२ ॥

विभाषा फाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः ॥ २३ ॥

सास्य देवता ॥ २४ ॥

कस्येत् ॥ २५ ॥

शुक्राद्घन् ॥ २६ ॥

अपोनप्त्रपांनप्तृभ्यां घः ॥ २७ ॥

छ च ॥ २८ ॥

१ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम् ।

२ शतरुद्राद्घ च ।

महेन्द्राद्घाणौ च ॥ २९ ॥

१ प. पुस्तके इतः परमधिकम् । सर्वत्राग्निकलिभ्यां ढक् । दृष्टे सामनि जाते चाण् डिद्द्विर्वा विधीयते । तीयादीकक् न विद्यायाः गोत्रादङ्कवदिष्यते । २ प. पुस्तके इतः परमधिकम् । कौमारापूर्ववचने कुमार्या अण्विधीयते । अपूर्वत्वं यदा तस्याः कुमार्या भवतीति वा ।

सोमाट्ट्यण् ॥ ३० ॥

वाय्वृतुपित्रुषसो यत् ॥ ३१ ॥

द्यावापृथिवीशुनासीरमरुत्वदग्नीषोम-
वास्तोष्पतिगृहमेधाच्छ च ॥ ३२ ॥

अग्नेर्ढक् ॥ ३३ ॥

कालेभ्यो भववत् ॥ ३४ ॥

१ कालेभ्यो भवे प्रत्ययमात्रप्रसङ्गः ।

२ यः कालेभ्यो भवे तस्य विधाने प्राति-
पदिकमात्रात्प्रसङ्गः ।

३ सिद्धं तूभयनिर्देशात् ।

महाराजप्रोष्ठपदाट्ठञ् ॥ ३५ ॥

१ ठञ्प्रकरणे तदस्मिन्वर्तत इति नवयज्ञा-
दिभ्य उपसंख्यानम् ।

२ पूर्णमासादण ।

पितृव्यमातुलमातामहपितामहाः ॥ ३६ ॥

१ पितृमातृभ्यां भ्रातरि व्यड्डुलचौ ।

२ मातृपितृभ्यां पितरि डामहच् ।

३ मातरि पिच्च ।

४ महो वा छन्दस्यानङोऽवग्रहदर्शनात् ।

५ अवेर्दुग्धे सोढदूसमरीसचः ।

६ तिलान्निष्फलात्पिञ्जपेजौ ।

७ पिञ्जश्छन्दसि डिच्च ।

तस्य समूहः ॥ ३७ ॥

भिक्षादिभ्योऽण् ॥ ३८ ॥

१ भिक्षादिषु युवतिग्रहणानर्थक्यं पुंवद्भा-
वस्य सिद्धत्वात् प्रत्ययविधौ ।

गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्स-
मनुष्याजाद्वुञ्[1] ॥ ३९ ॥

१ अणो वुञ्पूर्वविप्रतिषिद्धम् ।

२ ठक्तु विप्रतिषेधात् ।

केदाराद्यञ् च[2] ॥ ४० ॥

ठञ् कवचिनश्च ॥ ४१ ॥

ब्राह्मणमाणववाडवाद्यन् ॥ ४२ ॥

१ यन्प्रकरणे पृष्ठादुपसंख्यानम् ।

ग्रामजनबन्धुभ्यस्तल्[3] ॥ ४३ ॥

१ अह्नः खः ।

२ क्रतौ ।

३ पर्श्वाः सण्[4] ।

अनुदात्तादेरञ् ॥ ४४ ॥

खण्डिकादिभ्यश्च[5] ॥ ४५ ॥

१ अञ्प्रकरणे क्षुद्रकमालवात्सेनासंज्ञायाम् ।

चरणेभ्यो धर्मवत् ॥ ४६ ॥

अचित्तहस्तिधेनोष्ठक् ॥ ४७ ॥

केशाश्वाभ्यां यञ्छावन्यतरस्याम् ॥ ४८ ॥

पाशादिभ्यो यः ॥ ४९ ॥

१ पृथग्वातादर्शनादसमूहः ।

२ शीघ्रत्वे तु ।

खलगोरथात् ॥ ५० ॥

इनित्रकट्यचश्च ॥ ५१ ॥

---

१ प. पुस्तके इतः परमधिकम् । वृद्धाच्चेति वक्तव्यम् । २ प. पुस्तके इतःपरमधिकम् । गणिकायाश्चेति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । गजसहायाभ्यां चेति वक्तव्यम् । ४ प. पुस्तके सण्स्थाने 'णस्' पाठः । ५ प. पुस्तके इतः परमधिकम् । अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात् । गोत्राद्वुञ् न च तद्गोत्रम् । तदन्तान्न स सर्वतः । ज्ञापकं स्यात्तदन्तत्वे । तथा चापिशलेर्विधिः । सेनायां नियमार्थं वा । यथा बाध्येत चाञ्वुञा ।

१ खलादिभ्य इनिः ।

विषयो देशे ॥५२॥

१ विषयाभिधाने जनपदे लुब्बहुवचनविषयात् ।

२ गान्धार्यादिभ्यो वा ।

३ राजन्यादिभ्यो वा वुञ् ।

४ बैल्ववनादिभ्यो नित्यम् ।

५ न वाभिधेयस्य निवासविषयत्वान्निवासविवक्षायां लुब्विषयविवक्षायां प्रत्ययः।

राजान्यादिभ्यो वुञ् ॥ ५३ ॥

भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ॥ ५४ ॥

सो ऽस्यादिरिति च्छन्दसः प्रगाथेषु ॥ ५५ ॥

१ छन्दसः प्रत्ययविधाने नपुंसकात्स्वार्थ उपसंख्यानम् ।

संग्रामे प्रयोजनयोद्धृभ्यः ॥ ५६ ॥

तदस्यां प्रहरणमिति क्रीडायां णः ॥५७॥

घञः सास्यां क्रियेति ञः ॥ ५८ ॥

तदधीते तद्वेद ॥ ५९ ॥

क्रतूक्थादिसूत्रान्ताट्ठक्[1] ॥ ६० ॥

क्रमादिभ्यो वुन् ॥ ६१ ॥

अनुब्राह्मणादिनिः ॥ ६२ ॥

वसन्तादिभ्यष्ठक् ॥ ६३ ॥

प्रोक्ताल्लुक् ॥ ६४ ॥

सूत्राच्च कोपधात्[2] ॥ ६५ ॥

छन्दोब्राह्मणानि च तद्विषयाणि ॥ ६६ ॥

१ अन्यत्राभिधेयस्यानित्यत्वाच्छन्दोब्राह्मणानां तद्विषयवचनम् ।

२ तत्र यथाधिकारं तद्विषयप्रसङ्गः ।

३ सिद्धं तु प्रोक्ताधिकारे तद्विषयवचनात् ।

४ याज्ञवल्क्यादिभ्यः प्रतिषेधः ।

५ इनिर्वा प्रोक्ते तद्विषयः ।

६ काश्यपकौशिकग्रहणं च कल्पे नियमार्थम् ।

तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ ६७ ॥

तेन निर्वृत्तम् ॥ ६८ ॥

तस्य निवासः ॥ ६९ ॥

अदूरभवश्च ॥ ७० ॥

ओरञ् ॥ ७१ ॥

१ ओरञ्विधेर्नद्यां मतुब्विप्रतिषिद्धम् ।

मतोश्च बह्वजङ्गात् ॥ ७२ ॥

बह्वचः कूपेषु ॥ ७३ ॥

उदक्च विपाशः ॥ ७४ ॥

संकलादिभ्यश्च ॥ ७५ ॥

स्त्रीषु सौवीरसाल्वप्राक्षु ॥ ७६ ॥

सुवास्त्वादिभ्यो ऽण् ॥ ७७ ॥

रोणी ॥ ७८ ॥

कोपधाच्च ॥ ७९ ॥

वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठको ऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्ष-

१ प. पुस्तके इतः परमधिकम् । तस्येदंप्रत्ययाल्लुक् । तस्येदंप्रत्ययस्य च । विद्यालक्षणकल्पसूत्रान्तादकल्पादेरिकक् स्मृतः । विद्या चानङ्गक्षत्रधर्मत्रिपूर्वा । आख्यानाख्यायिकेतिहासपुराणेभ्यश्च । अनुसूर्लक्ष्यलक्षणे च । सर्वसादेर्द्विगोश्च लः । इकन्पदोत्तरपदात् । शतषष्टेः षिकन्पथः । २प. पुस्तके इतः परमधिकम् । संख्याप्रकृतेरिति वक्तव्यम् ।

कर्णसुतंगमप्रगदिवराहकुमुदादिभ्यः ॥ ८० ॥

जनपदे लुप् ॥ ८१ ॥

वरणादिभ्यश्च ॥ ८२ ॥

शर्कराया वा ॥ ८३ ॥

ठक्छौ च ॥ ८४ ॥

नद्यां मतुप् ॥ ८५ ॥

१ नद्यां मतुब्वचनं मत्वर्थेऽण्विधानात् ।

२ निर्वृत्ताद्यर्थं च ।

मध्वादिभ्यश्च ॥ ८६ ॥

कुमुदनडवेतसेभ्यो ड्मतुप् ॥ ८७ ॥

नडशादाड्ड्वलच् ॥ ८८ ॥

शिखाया वलच् ॥ ८९ ॥

उत्करादिभ्यश्छः ॥ ९० ॥

नडादीनां कुक् च ॥ ९१ ॥

१ कुटि प्रत्ययादेरादेशानुपपत्तिरनादित्वात् ।

२ पूर्वान्ते ह्रस्वत्वम् ।

३ सिद्धं त्वादिष्टस्य कुड्वचनात् ।

४ संनियोगात्सिद्धम् ।

शेषे ॥ ९२ ॥

१ शेषवचनं घादीनामपत्यादिष्वप्रसङ्गार्थम् ।

२ तस्येदंवचनात्प्रसङ्गः ।

३ विप्रतिषेधात्सिद्धम् ।

४ न वा परत्वाद् घादीनाम् ।

५ अणपवादत्वाच्चाण्विषये घादिप्रसङ्गः ।

राष्ट्रावारपाराद्घखौ ॥ ९३ ॥

१ अवारपाराद्विगृहीतादपि ।

२ विपरीताच्च ।

ग्रामाद्यखञौ ॥ ९४ ॥

कत्र्यादिभ्यो ढकञ् ॥ ९५ ॥

कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु ॥ ९६ ॥

नद्यादिभ्यो ढक् ॥ ९७ ॥

दक्षिणापश्चात्पुरसस्त्यक् ॥ ९८ ॥

कापिश्याः ष्फक् ॥ ९९ ॥

रङ्कोरमनुष्ये ऽण् च ॥ १०० ॥

१ रङ्कोरमनुष्यग्रहणानर्थक्यं मनुष्यतत्स्थयोर्वुञ्विधानात् ।

२ अमनुष्ये मनुष्यस्थे ष्फगणोर्ज्ञापकमिति चेन्नानिष्टत्वात् ।

३ अण्ग्रहणं च कच्छादिभ्योऽण्वचनात् ।

द्युप्रागपागुदक्प्रतीचो यत् ॥ १०१ ॥

कन्थायाष्ठक् ॥ १०२ ॥

वर्णौ वुक् ॥ १०३ ॥

अव्ययात् त्यप् ॥ १०४ ॥

१ अव्ययात्त्यप्याविष्ट्यस्योपसंख्यानं छन्दसि ।

२ अव्ययतीररूप्योत्तरपदोदीच्यग्रामकोपधविधेर्वृद्धाच्छो विप्रतिषेधेन ।

३ तेभ्यष्ठञ्ञिठौ ।

---

१ प. पुस्तके इतः परमधिकम् । महिष्याच्चेति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । ग्रामाच्चेति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । कुलस्यापत्यं कुक्षिग्रीवासु कन्ढञः । ४ प. पुस्तके इतः परमधिकम् । बाह्युर्दिपदिभ्यश्चेति वक्तव्यम् । ५ प. पुस्तके इतः परमधिकम् । अमेहक्कतसित्रेभ्यस्त्यब्विधिर्योऽव्ययात्स्मृतः । त्यब्नेर्ध्रुवे । निसो गते । अरण्याण्ण्यः । दूरादेत्यः । उत्तरादाहञ् ।

४ न वा ठञादीनां छापवादत्वात्तद्विषये चाभावादितरेषाम् ।
५ कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम् ।
६ तस्मादन्तोदात्ते कोपधप्रतिषेधः ।
७ छादोर्देशे कालाट्ठञ् ।
८ नक्षत्रादण् ।
९ अव्ययाद् ट्युट्युलौ ।
१० शरीरावयवाद्यत् ।
११ वर्गान्ताच्चाशब्दे यत्खौ ।
१२ बह्वचोऽन्तोदात्ताट्ठञ् ।
१३ आयस्थानेभ्यष्ठक् ।
१४ विद्यायोनिसंबन्धेभ्यो वुञ् ।
१५ ऋतष्ठञ् ।
१६ रूप्यमयटौ ।
१७ अचित्ताट्ठक् ।
१८ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ।
१९ णिनिरन्तेवासिब्राह्मणेभ्यः ।
२० पत्रपूर्वादञ् ।
२१ द्वन्द्वाद्वुन्वैरिमैथुनिकयोः ।
२२ गोत्रचरणाद्वुञ् ।
२३ कण्वादीञोऽण्विधेः ।
२४ ठञ्ञिठाभ्यामोर्देशे ठञ् ।
२५ न वा ठञोऽनवकाशत्वात् ।
२६ योपधाप्रस्थादीनां वुञ् ।
२७ ओश्च ठञः ।
२८ जनपदानामकाणौ ।
२९ न वा वुञपवादत्वादणः ।
३१ कोपधादणोऽकान्ताच्छः ।
३१ धन्ववुञश्च ।
३२ न वा छस्य पुनर्वचनं छापवादनिवृत्त्यर्थम् ।

एषमोह्यःश्वसो ऽन्यतरस्याम् ॥ १०५ ॥
तीररूप्योत्तरपदादञ्ञौ ॥ १०६ ॥
दिक्पूर्वपदादसंज्ञायां ञः ॥ १०७ ॥
मद्रेभ्यो ऽञ् ॥ १०८ ॥
उदीच्यग्रामाच्च बह्वचो ऽन्तोदात्तात् ॥ १०९ ॥
प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥ ११० ॥
कण्वादिभ्यो गोत्रे ॥ १११ ॥
इञश्च ॥ ११२ ॥
न द्व्यचः प्राच्यभरतेषु ॥ ११३ ॥
वृद्धाच्छः ॥ ११४ ॥
भवतष्ठक्छसौ ॥ ११५ ॥
काश्यादिभ्यष्ठञ्ञिठौ ॥ ११६ ॥
वाहीकग्रामेभ्यश्च ॥ ११७ ॥
विभाषोशीनरेषु ॥ ११८ ॥
ओर्देशे ठञ् ॥ ११९ ॥
वृद्धात्प्राचाम् ॥ १२० ॥
धन्वयोपधाद्वुञ् ॥ १२१ ॥
प्रस्थपुरवहान्ताच्च ॥ १२२ ॥
रोपधेतोः प्राचाम् ॥ १२३ ॥
जनपदतदवध्योश्च ॥ १२४ ॥

१ जनपदतदवध्योर्वुञ्विधानेऽवयवमात्रात् प्रसङ्गः ।
२ जनपदादिति चेद्वचनानानर्थक्यम् ।

अवृद्धादपि बहुवचनविषयात् ॥ १२५ ॥
कच्छाग्निवक्त्रवर्तोत्तरपदात् ॥ १२६ ॥

धूमादिभ्यश्च ॥ १२७ ॥
नगरात्कुत्सनप्रावीण्ययोः ॥ १२८ ॥
अरण्यान्मनुष्ये[1] ॥ १२९ ॥
विभाषा कुरुयुगंधराभ्याम् ॥ १३० ॥
१ कुरुयुगंधरेभ्यो वावचनान्मनुष्यतत्स्थयोर्वुञ्विधानम् ।
मद्रवृज्योः कन् ॥ १३१ ॥
कोपधादण् ॥ १३२ ॥
कच्छादिभ्यश्च ॥ १३३ ॥
१ साल्वानां कच्छादिषु पाठोऽण्विधानार्थः।
२ न वापदातिगोयवागूग्रहणमवधारणार्थम् ।
मनुष्यतत्स्थयोर्वुञ् ॥ १३४ ॥
अपदातौ साल्वात् ॥ १३५ ॥
गोयवाग्वोश्च ॥ १३६ ॥
गर्तोत्तरपदाच्छः ॥ १३७ ॥
१ गर्तोत्तरपदाच्छविधेर्जनपदाद्वुञ्पूर्वविप्रतिषिद्धम् ।
गहादिभ्यश्च ॥ १३८ ॥
१ गहादिषु पृथिवीमध्यस्य मध्यमभावः ।
२ चरणसंबधेन निवासलक्षणोऽण्[2] ।
प्राचां कटादेः ॥ १३९ ॥
राज्ञः क च ॥ १४० ॥
वृद्धादकेकान्तखोपधात् ॥ १४१ ॥
१ अकेकान्तग्रहणे कोपधग्रहणं सौसुकाद्यर्थम् ।
कन्थापलदनगरग्रामह्रदोत्तरपदात् १४२
पर्वताच्च ॥ १४३ ॥
विभाषामनुष्ये ॥ १४४ ॥
कृकणपर्णाद्भारद्वाजे[3] ॥ १४५ ॥

इति चतुर्थाध्यायस्य द्वितीयः पादः ।

युष्मदस्मदोरन्यतरस्यां खञ् च ॥ १ ॥
१ युष्मदस्मद्भ्यां प्रत्ययविधाने योगविभागः ।
२ समसंख्याप्रतिषेधार्थः ।
तस्मिन्नणि च युष्माकास्माकौ ॥ २ ॥
१ आदेशवचने च ।
२ तत्र पुनः खञ्ग्रहणम् ।
तवकममकावेकवचने ॥ ३ ॥
१ एकार्थग्रहणं च ।
अर्धाद्यत् ॥ ४ ॥
१ अर्धाद्यद्विधाने सपूर्वाट्ठञ् ।
२ दिक्पूर्वपदाद्यच्च ।
परावराधमोत्तमपूर्वाच्च ॥ ५ ॥
दिक्पूर्वपदाट्ठञ् च ॥ ६ ॥
ग्रामजनपदैकदेशादञ्ठञौ ॥ ७ ॥
मध्यान्मः ॥ ८ ॥
अ सांप्रतिके ॥ ९ ॥
द्वीपादनुसमुद्रं यञ् ॥ १० ॥
कालाट्ठञ् ॥ ११ ॥
श्राद्धे शरदः ॥ १२ ॥
विभाषा रोगातपयोः ॥ १३ ॥

१ प. पुस्तके इतः परमधिकम् । पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम् । वा गोमयेष्विति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । ऐकान्तादर्पाति वक्तव्यम् । ३ बो. अ. क. पुस्तकेषु 'भरद्वाजे' इति पाठः ।

निशाप्रदोषाभ्यां च ॥ १४ ॥

श्वसस्तुट् च ॥ १५ ॥

१ श्वसस्तुड्वादेशानुपपत्तिरनादित्वात् ।

२ पूर्वान्ते कप्रतिषेधः ।

३ सिद्धं त्वादिष्टस्य तुड्वचनात् ।

४ संनियोगाद्वा ।

संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ १६ ॥

प्रावृष एण्यः ॥ १७ ॥

वर्षाभ्यष्ठक् ॥ १८ ॥

छन्दसि ठञ् ॥ १९ ॥

वसन्ताच्च ॥ २० ॥

हेमन्ताच्च ॥ २१ ॥

सर्वत्राण् च तलोपश्च ॥ २२ ॥

१ हेमन्तस्याणि तलोपवचनानर्थक्यं हेम्नः प्रकृत्यन्तरत्वात् ।

२ अलोपदर्शनाच्च ।

सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ २३ ॥

१ सायचिरयोर्मकारान्तत्वं प्रत्ययसंनियुक्तम्[1] ।

२ प्राह्णप्रगयोरेकारान्तत्वम् ।

३ तुटयुक्तम् ।

४ पूर्वान्ते विसर्जनीयः ।

५ सिद्धं त्वादिष्टस्य तुड्वचनात् ।

६ [2]संनियोगाद्वा ।

विभाषा पूर्वाह्णापराह्णाभ्याम् ॥ २४ ॥

१ पूर्वाह्णापराह्णाभ्यां सुबन्तवचनं सप्तमीश्रवणार्थम् ।

२ अलुग्वचनं ज्ञापकमिति चेदव्ययात्सप्तमीप्रसङ्गः ।

तत्र जातः ॥ २५ ॥

१ तत्र जातादिषु वचनं नियमार्थम् ।

प्रावृषष्ठप् ॥ २६ ॥

संज्ञायां शरदो वुञ् ॥ २७ ॥

पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् ॥ २८ ॥

पथः पन्थ च ॥ २९ ॥

अमावास्याया वा ॥ ३० ॥

अ च ॥ ३१ ॥

सिन्ध्वपकराभ्यां कन् ॥ ३२ ॥

अणञौ च ॥ ३३ ॥

श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् ॥ ३४ ॥

१ लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ।

२ फल्गुन्यषाढाभ्यां टानौ ।

३ श्रविष्ठाषाढाभ्यां छण् ।

४ न वा नक्षत्रेभ्यो बहुलं लुग्वचनात् ।

स्थानान्तगोशालखरशालाच्च ॥ ३५ ॥

वत्सशालाभिजिदश्वयुक्छतभिषजो वा ॥ ३६ ॥

नक्षत्रेभ्यो बहुलम् ॥ ३७ ॥

---

१ प. पुस्तके इतः परमधिकम् । चिरपरुत्परारिभ्यस्त्नः । प्रगस्य छन्दसि गलोपश्च । अग्रादिपश्चाड्डिमच् । अन्ताच्च । २ प. पुस्तके इतः परमधिकम् । सायमोऽह्ने मलोपः । तरे च । वा सप्तम्याम् । ३ इदं प. पुस्तके नास्ति ।

कृतलब्धक्रीतकुशलाः ॥ ३८ ॥
प्रायभवः ॥ ३९ ॥

१ प्रायभवग्रहणमनर्थकं तत्रभवेन कृतत्वात् ।

२ अनित्यभवः प्रायभव इति चेन्मुक्तसंशयेन तुल्यम् ।

उपजानूपकर्णोपनीवेष्ठक् ॥ ४० ॥
संभूते ॥ ४१ ॥
कोशाड्ढञ् ॥ ४२ ॥

१ विकारे कोशाड्ढञ् ।

२ संभूते ह्यर्थानुपपत्तिः ।

कालात्साधुपुष्प्यत्पच्यमानेषु ॥ ४३ ॥
उप्ते च ॥ ४४ ॥
आश्वयुज्या वुञ् ॥ ४५ ॥
ग्रीष्मवसन्तादन्यतरस्याम् ॥ ४६ ॥
देयमृणे ॥ ४७ ॥
कलाप्यश्वत्थयवबुसाद्वुन् ॥ ४८ ॥
ग्रीष्मावरसमाद्वुञ् ॥ ४९ ॥
संवत्सराग्रहायणीभ्यां ठञ् च ॥ ५० ॥
व्याहरति मृगः ॥ ५१ ॥
तदस्य सोढम् ॥ ५२ ॥
तत्र भवः ॥ ५३ ॥

१ तत्रप्रकरणे तत्रेति पुनर्वचनं कालनिवृत्त्यर्थम् ।

दिगादिभ्यो यत् ॥ ५४ ॥
शरीरावयवाच्च ॥ ५५ ॥
दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् ॥ ५६ ॥
ग्रीवाभ्योऽण् च ॥ ५७ ॥
गम्भीराञ्ञ्यः ॥ ५८ ॥

१ ञ्यप्रकरणे परिमुखादिभ्य उपसंख्यानम् ।

२ अव्ययीभावाद्विधान उपकूलादिभ्यः प्रतिषेधः ।

अव्ययीभावाच्च ॥ ५९ ॥
अन्तःपूर्वपदाट्ठञ् ॥ ६० ॥
ग्रामात्पर्यनुपूर्वात् ॥ ६१ ॥
जिह्वामूलाङ्गुलेश्छः ॥ ६२ ॥
वर्गान्ताच्च ॥ ६३ ॥
अशब्दे यत्खावन्यतरस्याम् ॥ ६४ ॥
कर्णललाटात्कनलंकारे ॥ ६५ ॥
तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः ॥ ६६ ॥

१ भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः ।

२ कृतनिर्देशौ हि तौ ।

३ तत्र व्याख्यातव्यनाम्नो ग्रहणं भवार्थम् ।

४ व्याख्याने ह्यवचनात्सिद्धम् ।

५ भवे मन्त्रेषु लुग्वचनम् ।

६ कल्पे च व्याख्याने ।

७ न वा तादर्थ्यात्ताच्छब्द्यम् ।

बह्वचोऽन्तोदात्ताट्ठञ् ॥ ६७ ॥
क्रतुयज्ञेभ्यश्च[1] ॥ ६८ ॥

१ प. पुस्तके इतः परमधिकम् । बर्हिर्देवपञ्चजनेभ्यश्चेति वक्तव्यमिति काशिका । समानस्य तदादेश्च अध्यात्मादिषु चेष्यते । ऊर्ध्वंदमाच्च देहाच्च । लोकोत्तरपदस्य च । मुखपार्श्वतसोरीयः । कुग्जनस्य परस्य च । ईयः कार्योऽथ मध्यस्य । मण्मीयौ चापि प्रत्ययौ । मध्य मध्यं दिनण्चास्मात् । स्थाम्नो लुगजिनात्तथा ।

अध्यायेष्वेवर्षेः ॥ ६९ ॥
पौरोडाशपुरोडाशात् ष्ठन् ॥ ७० ॥
छन्दसो यदणौ ॥ ७१ ॥
द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ॥ ७२ ॥
१ नामाख्यातग्रहणं संघातविगृहीतार्थम्।
अणृगयनादिभ्यः ॥ ७३ ॥
तत आगतः ॥ ७४ ॥
ठगायस्थानेभ्यः ॥ ७५ ॥
शुण्डिकादिभ्यो ऽण् ॥ ७६ ॥
विद्यायोनिसंबन्धेभ्यो वुञ् ॥ ७७ ॥
ऋतष्ठञ् ॥ ७८ ॥
पितुर्यच्च ॥ ७९ ॥
गोत्रादङ्कवत् ॥ ८० ॥
हेतुमनुष्येभ्यो ऽन्यतरस्यां रूप्यः ॥ ८१ ॥
मयट् च ॥ ८२ ॥
प्रभवति ॥ ८३ ॥
विदूराञ्ञ्यः ॥ ८४ ॥
तद्गच्छति पथिदूतयोः ॥ ८५ ॥
अभिनिष्क्रामति द्वारम् ॥ ८६ ॥
अधिकृत्य कृते ग्रन्थे ॥ ८७ ॥
१ अधिकृत्य कृते ग्रन्थे लुबाख्यायिकाभ्यो बहुलम्।
शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः ॥ ८८ ॥
१ द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः।
सो ऽस्य निवासः ॥ ८९ ॥

अभिजनश्च ॥ ९० ॥
आयुधजीविभ्यश्छः पर्वते ॥ ९१ ॥
शण्डिकादिभ्यो ञ्यः ॥ ९२ ॥
सिन्धुतक्षशिलादिभ्यो ऽणञौ ॥ ९३ ॥
तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ॥ ९४ ॥
भक्तिः ॥ ९५ ॥
अचित्ताददेशकालाट्ठक् ॥ ९६ ॥
महाराजाट्ठञ् ॥ ९७ ॥
वासुदेवार्जुनाभ्यां वुन् ॥ ९८ ॥
गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ ९९ ॥
जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ १०० ॥
१ सर्ववचनं प्रकृतिनिर्ह्रासार्थम्।
२ तच्च मद्रवृज्यर्थम्।
तेन प्रोक्तम् ॥ १०१ ॥
१ प्रोक्तग्रहणमनर्थकं तत्रादर्शनात्।
२ ग्रन्थे च दर्शनात्।
३ छन्दोऽर्थमिति चेत्तुल्यम्।
तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥ १०२ ॥
काश्यपकौशिकाभ्यामृषिभ्यां णिनिः ॥ १०३ ॥
कलापिवैशंपायनान्तेवासिभ्यश्च ॥ १०४ ॥
१ प्रत्यक्षकारिग्रहणम्।
२ कलापिखाडायनग्रहणं ज्ञापकं वैशम्पायनान्तेवासिषु प्रत्यक्षकारिग्रहणस्य।

१ प. पुस्तके इतः परमधिकम्। चालवायो विदूरं च। प्रत्ययान्तरमेव वा। न वै तत्रेति चेद्ब्रूयाज्जित्वरीवदुपाचरेत्।

३ छन्दोग्रहणं चेतरथा ह्यतिप्रसङ्गः ।

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ॥ १०५ ॥

१ पुराणप्रोक्तेषु ब्राह्मणकल्पेषु याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात् ।

शौनकादिभ्यश्छन्दसि ॥ १०६ ॥

कठचरकाल्लुक् ॥ १०७ ॥

कलापिनोऽण् ॥ १०८ ॥

छगलिनो ढिनुक् ॥ १०९ ॥

पराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः ॥ ११० ॥

कर्मन्दकृशाश्वादिनिः ॥ १११ ॥

तेनैकदिक् ॥ ११२ ॥

तसिश्च ॥ ११३ ॥

उरसो यच्च ॥ ११४ ॥

उपज्ञाते ॥ ११५ ॥

कृते ग्रन्थे ॥ ११६ ॥

१ कृते ग्रन्थे मक्षिकादिभ्योऽण् ।

२ तद्विशेषेभ्यश्च ।

३ योगविभागात्सिद्धम् ।

संज्ञायाम् ॥ ११७ ॥

कुलालादिभ्यो वुञ् ॥ ११८ ॥

क्षुद्राभ्रमरवटरपादपादञ् ॥ ११९ ॥

तस्येदम् ॥ १२० ॥

१ तस्येदमित्यसंनिहितेऽप्रासिरिदमः प्रत्यक्षवाचित्वात् ।

२ सिद्धं तु यद्योगा षष्ठी तत्र ।

३ अनन्तरादिषु च प्रतिषेधः ।

४ सिद्धं तु परिगणनात् ।

५ स्वे ग्रामजनपदमनुष्येभ्यः ।

६ पत्त्राद्वाह्ये ।

७ रथाद्रथाङ्गे ।

८ वहेस्तुरणिट ।

९ अग्नीधः शरणे रञ् भं च ।

१० समिधामाधाने षेण्यण् ।

११ चरणाद्धर्माम्नाययोः ।

रथाद्यत् ॥ १२१ ॥

पत्त्रपूर्वादञ् ॥ १२२ ॥

पत्त्राध्वर्युपरिषदश्च ॥ १२३ ॥

हलसीराट्ठक् ॥ १२४ ॥

द्वन्द्वाद्वुन् वैरमैथुनिकयोः ॥ १२५ ॥

१ वैरे देवासुरादिभ्यः प्रतिषेधः ।

गोत्रचरणाद्वुञ् ॥ १२६ ॥

संघाङ्कलक्षणेष्वञ्यञिञामण् ॥ १२७ ॥

१ संघादिषु घोषग्रहणम् ।

२ संघादिषु प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य ।

३ लिङ्गपुंवद्भावप्रतिषेधार्थं तु ।

शाकलाद्वा ॥ १२८ ॥

छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥ १२९ ॥

न दण्डमाणवान्तेवासिषु ॥ १३० ॥

रैवतिकादिभ्यश्छः ॥ १३१ ॥

---

१ प. पुस्तके नास्ति । २ अत्रत्यं वार्तिकद्वयं न सूत्रद्वयं यतस्तथा महाभाष्ये रैवतिकादिभ्यश्छः (४।३।१३१) इति सूत्र उपलम्भः । प्रथमस्य सूत्रपाठे ग्रहणमपाणिनीयमिति कैयटः । द्वितीयं सूत्रमिति कैयटः। इदमपि वार्तिकमेवेति हरदत्त इति विवरणम् । सूत्रत्वे चकारेण वार्तिकस्थस्याणः संग्रहस्यः क्लिष्टत्वादस्य वार्तिकत्वमेव युक्तम् । अस्माभिरत एव वार्तिकपाठ इदं द्वयं संगृहीतम् ।

१ कौपिञ्जलहास्तिपदादण् ।

२ आथर्वणिकस्येकलोपश्च ।

तस्य विकारः ॥ १३२ ॥

१ तस्यप्रकरणे[1] तस्यपुनर्वचनं शैषिकनिवृत्त्यर्थम् ।

२ तस्येदंवचनात्प्रसङ्गः[2] ।

३ न वा संप्रत्ययः ।

४ अवयवे च प्राण्योषधिवृक्षेभ्योऽनिवृत्तिः ।

५ अणमयटोश्च विप्रतिषेधानुपपत्तिर्मयडुत्सर्गात् ।

६ अनुवृत्तौ हि छ्[3]ोत्सर्गापवादविप्रतिषेधान्मयट् ।

अवयवे च प्राण्योषधिवृक्षेभ्यः ॥ १३३ ॥

१ [4]विकारावयवयोरुक्तम् ।

बिल्वादिभ्यो ऽण् ॥ १३४ ॥

१ बिल्वादिषु गवीधुका[5]ग्रहणं मयट्प्रतिषेधार्थम् ।

कोपधाच्च ॥ १३५ ॥

त्रपुजतुनोः षुक् ॥ १३६ ॥

ओरञ् ॥ १३७ ॥

अनुदात्तादेश्च ॥ १३८ ॥

पलाशादिभ्यो वा ॥ १३९ ॥

शम्याः ष्लञ् ॥ १४० ॥

१ अनुदात्तादेरञो विधान आद्युदात्तान्ङीष उपसंख्यानम् ।

२ पदस्य ह्यनुदात्तादित्वम् ।

३ न वा समर्थस्यानुदात्तादित्वात् ।

४ पदग्रहणं परिमाणार्थम् ।

मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ १४१ ॥

१ मयड्वैतयोर्वचनमपवादविषयेऽनिवृत्त्यर्थम् ।

२ एतयोरित्यर्थनिर्देशः ।

नित्यं वृद्धशरादिभ्यः ॥ १४२ ॥

गोश्च पुरीषे ॥ १४३ ॥

पिष्टाच्च ॥ १४४ ॥

संज्ञायां कन् ॥ १४५ ॥

व्रीहेः पुरोडाशे ॥ १४६ ॥

असंज्ञायां तिलयवाभ्याम् ॥ १४७ ॥

द्व्यचश्छन्दसि ॥ १४८ ॥

नोत्वद्वर्ध्रबिल्वात् ॥ १४९ ॥

तालादिभ्यो ऽण् ॥ १५० ॥

जातरूपेभ्यः परिमाणे ॥ १५१ ॥

प्राणिरजतादिभ्यो ऽञ् ॥ १५२ ॥

ञितश्च तत्प्रत्ययात् ॥ १५३ ॥

१ विकारावयवयोर्विकारावयवयुक्तत्वान्मयट्प्रतिषेधार्थं ञितश्च तत्प्रत्ययादञो विधानम् ।

२ न वा दृष्टो ह्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दस्तस्मान्मयडभावः ।

४ विकारावयवशब्दात्प्रसङ्ग इति चेन्न तेनानभिधानात् ।

---

१ प. पुस्तके °प्रकरणे इत्यस्य स्थाने °ग्रहणे इति । २ प. पुस्तके इतः परमधिकम् । बाधनार्थं कृतं भवेत् । उत्सर्गः शेष एवासौ । ३ प. पुस्तके छस्यो° इति पाठः । ४ प. पुस्तके नास्ति । ५ प. पुस्तके गवेधुका° इति पाठः ।

५ अभिधाने ह्यन्यतोऽपि मयट्प्रसङ्गः ।
६ तस्मात्तत्प्रत्ययान्ताल्लुग्वचनम् ।
क्रीतवत्परिमाणात् ॥ १५४ ॥
१ क्रीतवत्परिमाणादङ्ग च ।
२ अणो वृद्धान्मयट् ।
३ ओरञोऽनुदात्तादेरञश्च ।
४ मयटः प्राण्यञ्विप्रतिषेधेन ।
५ न वानवकाशत्वादपवादो मयट् ।
६ प्राण्यञश्च ।
७ तस्मान्मयड्विधाने प्राणिप्रतिषेधः ।
८ अनुदात्तादेरञः प्राण्यञ्विप्रतिषेधेन ।
उष्ट्राद्वुञ् ॥ १५५ ॥
उमोर्णयोर्वा ॥ १५६ ॥
एण्या ढञ् ॥ १५७ ॥
गोपयसोर्यत् ॥ १५८ ॥
द्रोश्च ॥ १५९ ॥
माने वयः ॥ १६० ॥
फले लुक् ॥ १६१ ॥
१ फले लुग्वचनानर्थक्यं प्रकृत्यन्तरत्वात् ।
२ एकान्तदर्शनात्प्रसङ्ग इति चेद्वृक्षे लुग्वचनम् ।
प्लक्षादिभ्यो ऽण् ॥ १६२ ॥
जम्ब्वा वा ॥ १६३ ॥
लुप् च ॥ १६४ ॥
१ लुप्प्रकरणे फलपाकशुषामुपसंख्यानम् ।
२ पुष्पमूलेषु च बहुलम् ।
हरीतक्यादिभ्यश्च ॥ १६५ ॥
कंसीयपरशव्ययोर्यञञौ लुक् च ॥ १६६ ॥

इति चतुर्थाध्यायस्य तृतीयः पादः ॥

प्राग्वहतेष्ठक् ॥ १ ॥
१ ठक्प्रकरणे तदाहेति माशब्दादिभ्य उपसंख्यानम् ।
२ आहौ प्रभूतादिभ्यः
३ पृच्छतौ सुस्नातादिभ्यः ।
४ गच्छतौ परदारादिभ्यः ।
तेन दीव्यति खनति जयति जितम् ॥ २ ॥
संस्कृतम् ॥ ३ ॥
कुलत्थकोपधादण् ॥ ४ ॥
तरति ॥ ५ ॥
गोपुच्छाट्ठञ् ॥ ६ ॥
नौद्व्यचष्ठन् ॥ ७ ॥
चरति ॥ ८ ॥
आकर्षात् ष्ठल्[1] ॥ ९ ॥
पर्पादिभ्यः ष्ठन् ॥ १० ॥
श्वगणाट्ठञ् च ॥ ११ ॥
वेतनादिभ्यो जीवति ॥ १२ ॥
वस्नक्रयविक्रयाट्ठन् ॥ १३ ॥
आयुधाच्छ च ॥ १४ ॥
हरत्युत्सङ्गादिभ्यः ॥ १५ ॥
भस्त्रादिभ्यः ष्ठन् ॥ १६ ॥
विभाषा विवधात्[2] ॥ १७ ॥

---

१ प. पुस्तके इतः परमधिकम् । आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च । आवसथात्किसरादेः षितः षडेते ठगधिकारे । २ प. पुस्तके अत्र वीवधाच्चेत्यधिकम् ।

अण् कुटिलिकायाः ॥ १८ ॥
निर्वृत्तेऽक्षद्यूतादिभ्यः ॥ १९ ॥
त्रेर्मम्नित्यम् ॥ २० ॥
१ त्रेर्मब्नित्यवचनं विषयार्थम् ।
२ तत्र यथाधिकारं तद्विषयप्रसङ्गः ।
अपमित्ययाचिताभ्यां कक्कनौ ॥ २१ ॥
संसृष्टे ॥ २२ ॥
चूर्णादिनिः ॥ २३ ॥
लवणाल्लुक् ॥ २४ ॥
१ लवणाल्लुग्वचनानर्थक्यं रसवाचित्वात् ।
२ असंसृष्टे च दर्शनात् ।
३ संसृष्टे चादर्शनात् ।
मुद्गादण् ॥ २५ ॥
व्यञ्जनैरुपसिक्ते ॥ २६ ॥
ओजःसहोऽम्भसा वर्तते ॥ २७ ॥
तत्प्रत्यनुपूर्वमीपलोमकूलम् ॥ २८ ॥
परिमुखं च ॥ २९ ॥
प्रयच्छति गर्ह्यम् ॥ ३० ॥
१ प्रयच्छति गर्ह्याय ।
२ मेस्यालोपो वा ।
३ वृद्धेर्वृधुषिभावः ।
कुसीददशैकादशात् ष्ठन्ष्ठचौ ॥ ३१ ॥
उञ्छति ॥ ३२ ॥
रक्षति ॥ ३३ ॥
शब्ददर्दुरं करोति ॥ ३४ ॥
पक्षिमत्स्यमृगान् हन्ति ॥ ३५ ॥
परिपन्थं च तिष्ठति ॥ ३६ ॥
माथोत्तरपदपदव्यनुपदं धावति ॥ ३७ ॥
आक्रन्दाट्ठञ् च ॥ ३८ ॥
पदोत्तरपदं गृह्णाति ॥ ३९ ॥
प्रतिकन्थार्थललामं च ॥ ४० ॥
धर्मं चरति ॥ ४१ ॥
१ अधर्माच्च ।
प्रतिपथमेति ठंश्च ॥ ४२ ॥
समवायान् समवैति ॥ ४३ ॥
परिषदो ण्यः ॥ ४४ ॥
सेनाया वा ॥ ४५ ॥
संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ४६ ॥
तस्य धर्म्यम् ॥ ४७ ॥
अण् महिष्यादिभ्यः ॥ ४८ ॥
ऋतोऽञ् ॥ ४९ ॥
१ नृनराभ्यामञ्वचनम् ।
२ विशसितुरिड्लोपश्च ।
३ विभाजयितुर्णिलोपश्च ।
अवक्रयः ॥ ५० ॥
तदस्य पण्यम् ॥ ५१ ॥
लवणाट्ठञ् ॥ ५२ ॥
किसरादिभ्यः ष्ठन् ॥ ५३ ॥
शलालुनोऽन्यतरस्याम् ॥ ५४ ॥
शिल्पम् ॥ ५५ ॥
मड्डुकझर्झरादणन्यतरस्याम् ॥ ५६ ॥
प्रहरणम् ॥ ५७ ॥
परश्वधाट् ठञ् च ॥ ५८ ॥
शक्तियष्ट्योरीकक् ॥ ५९ ॥
अस्ति नास्ति दिष्टं मतिः ॥ ६० ॥
शीलम् ॥ ६१ ॥

[1] प. पुस्तके इतः परमधिकम् । भावप्रत्ययान्तादिमब्वक्तव्यः ।

छत्रादिभ्यो णः ॥ ६२ ॥
कर्माध्ययने वृत्तम् ॥ ६३ ॥
वह्वच्पूर्वपदाट्ठच् ॥ ६४ ॥
हितं भक्षाः ॥ ६५ ॥
१ हितं भक्षा इति चतुर्थीनिर्देशः ।
२ इतरथा ह्यनिर्देशः ।
तदस्मै दीयते नियुक्तम् ॥ ६६ ॥
श्राणामांसौदनाट्टिठन् ॥ ६७ ॥
भक्तादणन्यतरस्याम् ॥ ६८ ॥
तत्र नियुक्तः ॥ ६९ ॥
अगारान्ताट्ठन् ॥ ७० ॥
अध्यायिन्यदेशकालात् ॥ ७१ ॥
कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति ॥ ७२ ॥
निकटे वसति ॥ ७३ ॥
आवसथात् छल् ॥ ७४ ॥
प्राग्घिताद्यत् ॥ ७५ ॥
तद्वहति रथयुगप्रासङ्गम् ॥ ७६ ॥
१ वहत्यभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधानानर्थक्यं विहितत्वात् ।
२ शब्दभेदादविधानमिति चेदर्थाश्रयत्वात्प्रत्ययविधानस्यार्थसामान्यात्सिद्धम् ।[1]
धुरो यड्ढकौ ॥ ७७ ॥
खः सर्वधुरात् ॥ ७८ ॥
एकधुराल्लुक् च ॥ ७९ ॥
शकटादण् ॥ ८० ॥
हलसीराट्ठक् ॥ ८१ ॥
संज्ञायां जन्याः ॥ ८२ ॥
१ जन्या इति निपातनानर्थक्यं पञ्चमीनिर्देशात् ।
विध्यत्यधनुषा ॥ ८३ ॥
१ विध्यत्यकरणेन ।
२ इतरथा ह्यतिप्रसङ्गः ।
धनगणं लब्धा ॥ ८४ ॥
अन्नाण्णः ॥ ८५ ॥
वशं गतः ॥ ८६ ॥
पदमस्मिन् दृश्यम् ॥ ८७ ॥
मूलमस्यावर्हि ॥ ८८ ॥
संज्ञायां धेनुष्या ॥ ८९ ॥
गृहपतिना संयुक्ते ञ्यः ॥ ९० ॥
नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ॥ ९१ ॥
धर्मपथ्यर्थन्यायादनपेते ॥ ९२ ॥
छन्दसो निर्मिते ॥ ९३ ॥
उरसोऽण् च ॥ ९४ ॥
हृदयस्य प्रियः ॥ ९५ ॥
बन्धने चर्षौ ॥ ९६ ॥
मतजनहलात् करणजल्पकर्षेषु ॥ ९७ ॥
तत्र साधुः ॥ ९८ ॥
प्रतिजनादिभ्यः खञ् ॥ ९९ ॥
भक्ताण्णः ॥ १०० ॥
परिषदो ण्यः ॥ १०१ ॥
कथादिभ्यष्ठक् ॥ १०२ ॥
गुडादिभ्यष्ठञ् ॥ १०३ ॥
पथ्यतिथिवसतिस्वपतेर्ढञ् ॥ १०४ ॥

[1] प. पुस्तके इतः परमधिकम् । शब्दभेदादविधानम् ।

सभाया यः ॥ १०५ ॥
ढश्छन्दसि ॥ १०६ ॥
समानतीर्थे वासी ॥ १०७
समानोदरे शयित ओ चोदात्तः ॥१०८॥
सोदराद्यः ॥ १०९ ॥
भवे छन्दसि ॥ ११० ॥
पाथोनदीभ्यां ड्यण् ॥ १११ ॥
वेशन्तहिमवद्भ्यामण् ॥ ११२ ॥
स्रोतसो विभाषा ड्यड्ड्यौ ॥ ११३ ॥
सगर्भसयूथसनुताद्यन् ॥ ११४ ॥
तुग्राद्घन् ॥ ११५ ॥
अग्राद्यत् ॥ ११६ ॥
घच्छौ च ॥ ११७ ॥
समुद्राभ्राद्घः ॥ ११८ ॥
बर्हिषि दत्तम् ॥ ११९ ॥
दूतस्य भागकर्मणी ॥ १२० ॥
रक्षोयातूनां हननी ॥ १२१ ॥
रेवतीजगतीहविष्याभ्यः प्रशस्ये ॥१२२॥
असुरस्य स्वम् ॥ १२३ ॥
मायायामण् ॥ १२४ ॥
तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ॥ १२५ ॥
अश्विमानण् ॥ १२६ ॥
वयस्यासु मूर्ध्नो मतुप् ॥ १२७ ॥
मत्वर्थे मासतन्वोः ॥ १२८ ॥

१ मासतन्वोरनन्तरार्थे वा ।
२ लुगकारेकाररेफाश्च ।

मधोर्ञ च ॥ १२९ ॥
ओजसोऽहनि यत्खौ ॥ १३० ॥
वेशोयशआदेर्भगाद्यल् ॥ १३१ ॥
ख च ॥ १३२ ॥
पूर्वैः कृतमिनियौ च ॥ १३३ ॥
अद्भिः संस्कृतम् ॥ १३४ ॥
सहस्रेण संमितौ घः ॥ १३५ ॥
मतौ च ॥ १३६ ॥
सोममर्हति यः ॥ १३७ ॥
मये च ॥ १३८ ॥
मधोः ॥ १३९ ॥
वसोः समूहे च ॥ १४० ॥

१ अक्षरसमूहे छन्दस उपसंख्यानम् ।
२ छन्दसि बहुभिर्वसव्यैरुपसंख्यानम् ।
३ अग्निरीशे वसव्यस्य ।
४ स्वार्थविज्ञानात्सिद्धम् ।

नक्षत्राद्घः ॥ १४१ ॥
सर्वदेवात् तातिल् ॥ १४२ ॥
शिवशमरिष्टस्य करे ॥ १४३ ॥
भावे च ॥ १४४ ॥

चतुर्थाध्यायस्य चतुर्थः पादः

पञ्चमोऽध्यायः

प्राक्क्रीताच्छः ॥ १ ॥

१ [1]प्राग्वचन उक्तम् ।

उगवादिभ्यो यत् ॥ २ ॥

१ यञ्ञ्यावञः पूर्वविप्रतिषिद्धं सनङ्गूपानहौ प्रयोजनम् ।

---

१ इदं प. पुस्तके नास्ति ।

२ ढञ्च ।

३ हविरपूपादिभ्यो विभाषाया यत् ।

४ अन्नविकारेभ्यश्च ।

५ नाभेर्नभभावे प्रत्ययानुपपत्तिः प्रकृत्यभावात् ।

६ सिद्धं तु शाखादिषु वचनाद्ध्रस्वत्वं च ।

७ नभ्यात्तु लुग्वचनम् ।

कम्बलाच्च संज्ञायाम् ॥ ३ ॥

१ हविरपूपादिभ्योऽप्राप्ते ।

विभाषा हविरपूपादिभ्यः ॥ ४ ॥

तस्मै हितम् ॥ ५ ॥

शरीरावयवाद्यत् ॥ ६ ॥

१ यत्प्रकरणे रथाच्च ।

खलयवमाषतिलवृषब्रह्मणश्च ॥ ७ ॥

अजाविभ्यां थ्यन् ॥ ८ ॥

आत्मन्विश्वजनभोगोत्तरपदात्खः ॥ ९ ॥

१ भोगोत्तरपदात्खविधानेऽनिर्देशः पूर्वपदार्थहितत्वात् ।

२ भोगीनरिति चेद्वावचनम् ।

३ राजाचार्याभ्यां नित्यम् ।

४ खविधाने पञ्चजनादुपसंख्यानम् ।

५ सर्वजनाट्ठञ्च ।

६ महाजनान्नित्यम् ।

सर्वपुरुषाभ्यां णढञौ ॥ १० ॥

१ सर्वाण्णस्य वावचनम् ।

२ पुरुषाद्वधे ।

माणवचरकाभ्यां खञ् ॥ ११ ॥

तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥

१ तदर्थमिति कृत्यनामभ्यष्ठञ् ।

२ न वा प्रयोजनेन कृतत्वात् ।

छदिरुपधिबलेर्ढञ् ॥ १३ ॥

१ उपध्यर्थमिति प्रत्ययानुपपत्तिरुपध्यभावात् ।

२ सिद्धं तु कृदन्तस्य स्वार्थेऽञ्वचनात् ।

ऋषभोपानहोर्ञ्यः ॥ १४ ॥

चर्मणोऽञ् ॥ १५ ॥

तदस्य तदस्मिन्स्यादिति ॥ १६ ॥

परिखाया ढञ् ॥ १७ ॥

प्राग्वतेष्ठञ् ॥ १८ ॥

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ॥ १९ ॥

१ ठगादयः प्रागर्हाच्चेदर्हे तद्विधिः[3] ।

२ वस्ने वचनात्सिद्धमिति चेन्मांसौदनिकादिष्वप्राप्तिः ।

३ आर्हाच्चेद्भोजनादिष्वतिप्रसङ्गः ।

४ उक्तं[4] वा ।

असमासे निष्कादिभ्यः ॥ २० ॥

१ निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्तात्प्रतिषेधस्य ।

२ प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि ।

शताच्च ठन्यतावशते ॥ २१ ॥

---

१ प. पुस्तके °विकारसमूहतेनकृतेषु इत्यधिकम् । २ प. पुस्तके इतः परमधिकम् । ऊर्ध्वमानं किलोन्मानम् । परिमाणं तुः सर्वतः । आयामस्तु प्रमाणं स्यात् । संख्या बाह्या तु सर्वतः । भेदमात्रं ब्रवीत्येषा नैषा मानं कुतश्चन । ३ प. पुस्तके इतः परमधिकम् । वस्नेवचनात्सिद्धम् । ४ प. पुस्तके नास्ति ।

१ शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः ।

संख्याया अतिशदन्तायाः कन् ॥२२॥

१ तिप्रतिषेधाड्डतिग्रहणमिति चेदर्थवद्ग्रहणात्सिद्धम् ।

वतोरिड्वा ॥ २३ ॥

विंशतित्रिंशद्भ्यां ड्वुनसंज्ञायाम् ॥ २४ ॥

कंसाट्टिठन् ॥ २५ ॥

१ टिठन्नर्धाच्च ।

२ कार्षापणाद्वा प्रतिषेधश्च ।

शूर्पादञन्यतरस्याम् ॥ २६ ॥

शतमानविंशतिकसहस्रवसनादण् ॥२७॥

अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥ २८ ॥

१ [1]द्विगोर्लुक्युक्तम् ।

२ संज्ञाप्रतिषेधानर्थक्यं च तन्निमित्तत्वाल्लोपस्य ।

३ उक्तं संख्यात्वे प्रयोजनं तस्मादिहाध्यर्धग्रहणानर्थक्यम् ।

विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥

१ कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानम् ।

द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥

बिस्ताच्च ॥ ३१ ॥

१ द्वित्रिभ्यां द्वैयोग्यम् ।

२ तत्र च बहुग्रहणम् ।

विंशतिकात्खः ॥ ३२ ॥

खार्या ईकन् ॥ ३३ ॥

१ खार्या ईकन्केवलायाश्च ।

२ काकिण्याश्चोपसंख्यानम् ।

३ केवलायाश्च ।

पणपादमाषशताद्यत् ॥ ३४ ॥

शाणाद्वा ॥ ३५ ॥

१ शतशाणाभ्यां वा ।

२ द्वित्रिपूर्वादण्च ।

द्वित्रिपूर्वादण् च ॥ ३६ ॥

तेन क्रीतम् ॥ ३७ ॥

१ तेन क्रीतमिति करणात् ।

२ अकर्तैकान्तात् ।

३ संख्यैकवचनाद्द्विगोश्चोपसंख्यानम् ।

४ [3]उक्तं वा ।

तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥

१ तस्यनिमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम् ।

२ संनिपाताच्च ।

गोद्व्यचो ऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥

१ यत्प्रकरणे ब्रह्मवर्चसाच्च ।

पुत्राच्छ च ॥ ४० ॥

सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥

तस्येश्वरः ॥ ४२ ॥

तत्रविदित इति च ॥ ४३ ॥

लोकसर्वलोकाट्ठञ् ॥ ४४ ॥

तस्य वापः ॥ ४५ ॥

पात्रात् ष्ठन् ॥ ४६ ॥

तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥

१ तदस्मिन्दीयतेऽस्मा इति च ।

---

१ प. पुस्तके तिग्रहणात् । २–३ प. पुस्तके नास्ति ।

पूरणार्धाट्ठन् ॥ ४८ ॥
१ ठन्प्रकरणेऽनन्तादुपसंख्यानम् ।
२ तत्पचतीति द्रोणादण्च ।
भागाद्यच्च ॥ ४९ ॥
तद्धरति वहत्या वहति भाराद्वंशादिभ्यः ॥ ५० ॥
वस्नद्रव्याभ्यां ठन्कनौ ॥ ५१ ॥
संभवत्यवहरति पचति ॥ ५२ ॥
१ तत्पचतीति द्रोणादण्च ।
आढकाचितपात्रात् खो ऽन्यतरस्याम् ॥ ५३ ॥
द्विगोः ष्ठंश्च ॥ ५४ ॥
कुलिजाल्लुक्खौ च ॥ ५५ ॥
१ कुलिजाच्चेति सिद्धे लुग्खग्रहणानर्थक्यं पूर्वस्मिन्त्रिकभावात् ।
सो ऽस्यांशवस्नभृतयः ॥ ५६ ॥
तदस्य परिमाणम् ॥ ५७ ॥
संख्यायाः संज्ञासंघसूत्राध्ययनेषु । ५८ ।
१ संज्ञायां स्वार्थे ।
२ ततः परिमाणिनि ।
३ जीवितपरिमाणे चोपसंख्यानम् ।
४ जीवितपरिमाणे चेत्यनर्थकं वचनं कालादिति सिद्धत्वात् ।
५ इह वचने हि लुक्प्रसङ्गः ।
६ अन्येभ्योऽपि दृश्यते खारशताद्यर्थम् ।
७ उक्तं वा ।
८ स्तोमे डविधिः पञ्चदशाद्यर्थः ।
पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥
१ विंशत्यादयो दशदर्थे चेत्समासवचनानुपपत्तिः ।
२ परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानम् ।
३ षष्ठीवचनविधिश्च ।
४ अनारम्भो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु ।
पञ्चद्दशतौ वर्गे वा ॥ ६० ॥
सप्तनो ऽञ् छन्दसि ॥ ६१ ॥
त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥
तदर्हति ॥ ६३ ॥
छेदादिभ्यो नित्यम् ॥ ६४ ॥
शीर्षच्छेदाद्यच्च ॥ ६५ ॥
दण्डादिभ्यो यः ॥ ६६ ॥
छन्दसि च ॥ ६७ ॥
१ छेदादिपाथिभ्यो विग्रहदर्शनान्नित्यग्रहणानर्थक्यम् ।
२ विकारार्थमिति चदकङ्गादिभिस्तुल्यम् ।
पात्राद्घंश्च ॥ ६८ ॥
कडङ्करदक्षिणाच्छ च ॥ ६९ ॥
स्थालीबिलात् ॥ ७० ॥
यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥
१ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम् ।
पारायणतुरायणचान्द्रायणं वर्तयति ॥ ७२ ॥
१ तद्वर्तयतीत्यनिर्देशस्तत्रादर्शनात् ।
२ इड्यज्योश्च दर्शनात् ।

१–२ प. पुस्तके नास्ति ।

संशयमापन्नः ॥ ७३ ॥

योजनं गच्छति ॥ ७४ ॥

१ योजनं गच्छतीति क्रोशशतयोजनशतयोरुपसंख्यानम् ।

२ ततोऽभिगमनमर्हतीति च ।

पथः ष्कन् ॥ ७५ ॥

पन्थो ण नित्यम् ॥ ७६ ॥

उत्तरपथेनाहृतं च ॥ ७७ ॥

१ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम् ।

२ अजपथशङ्कुपथाभ्यां च ।

३ मधुकमरिचयोरण्स्थलात् ।

कालात् ॥ ७८ ॥

तेन निर्वृत्तम् ॥ ७९ ॥

तमधीष्टो भृतो भूतो भावी ॥ ८० ॥

१ अधीष्टभृतयोर्द्वितीयानिर्देशोऽनर्थकस्तत्रादर्शनात् ।

२ सिद्धं तु चतुर्थीनिर्देशात् ।

मासाद्वयसि यत्खञौ ॥ ८१ ॥

द्विगोर्यप् ॥ ८२ ॥

षण्मासाण्ण्यच्च ॥ ८३ ॥

अवयसि ठंश्च ॥ ८४ ॥

१ अवयसि ठंश्चेत्यनन्तरस्यानुकर्षः ।

समायाः खः ॥ ८५ ॥

द्विगोर्वा ॥ ८६ ॥

रात्र्यहःसंवत्सराच्च ॥ ८७ ॥

वर्षाल्लुक् च ॥ ८८ ॥

चित्तवति नित्यम् ॥ ८९ ॥

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ९० ॥

१ षष्टिके संज्ञाग्रहणम् ।

२ उक्तं वा ।

वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥

संपरिपूर्वात्ख च ॥ ९२ ॥

तेन परिजय्यलभ्यकार्यसुकरम् ॥ ९३ ॥

तदस्य ब्रह्मचर्यम् ॥ ९४ ॥

१ तदस्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानम् ।

२ तच्चरतीति च ।

३ अवान्तरदीक्षादि[2]भ्यो डिनिः ।

४ अष्टाचत्वारिंशतो ड्वुंश्च ।

५ चातुर्मास्यानां यलोपश्च ।

६ चतुर्मासाण्ण्यो यज्ञे तत्र भवे ।

७ संज्ञायामण् ।

त[3]स्य दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥

तत्र च दीयते कार्यं भववत् ॥ ९६ ॥

१ कार्यग्रहणमनर्थकं तत्रभवेन कृतत्वात् ।

व्युष्टादिभ्यो ऽण् ॥ ९७ ॥

१ अण्प्रकरणे ऽग्निपदादिभ्य उपसंख्यानम् ।

तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥

संपादिनि ॥ ९९ ॥

कर्मवेषाद्यत् ॥ १०० ॥

तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥

योगाद्यच्च ॥ १०२ ॥

कर्मण उकञ् ॥ १०३ ॥

१ प. पुस्तके नास्ति । २ प. पुस्तके °दीक्षाभ्यो डिनिः । ३ का. वा. प्र. पुस्तकेषु तस्य चेति चकारोऽधिकः

समयस्तदस्य प्राप्तम् ॥ १०४ ॥
ऋतोरण् ॥ १०५ ॥
छन्दसि घस् ॥ १०६ ॥
कालाद्यत् ॥ १०७ ॥
प्रकृष्टे ठञ् ॥ १०८ ॥
प्रयोजनम् ॥ १०९ ॥
विशाखाषाढादण् मन्थदण्डयोः ॥ ११० ॥
अनुप्रवचनादिभ्यश्छः ॥ १११ ॥
१ छप्रकरणे विशिपूरिपदिरुहिप्रकृतेरनात्सपूर्वपदादुपसंख्यानम् ।
२ स्वर्गादिभ्यो यत् ।
३ पुण्याहवाचनादिभ्यो लुक् ।
समापनात्सपूर्वपदात् ॥ ११२ ॥
ऐकागारिकट् चौरे ॥ ११३ ॥
१ एकागारान्निपातनानर्थक्यं ठञ्प्रकरणात् ।
आकालिकडाद्यन्तवचने ॥ ११४ ॥
१ आकालान्निपातनानर्थक्यं ठञ्प्रकरणात् ।
२ आकालाट्ठंश्च ।
तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥
तत्र तस्येव ॥ ११६ ॥
तदर्हम् ॥ ११७ ॥
उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥
१ स्त्रीपुंसाभ्यां वत्युपसंख्यानम् ।
तस्य भावस्त्वतलौ ॥ ११९ ॥
१ स्त्रीपुंसाभ्यां त्वतलोरुपसंख्यानम् ।
२ वावचनं च ।
३ अपवादसमावेशाद्वा सिद्धम् ।
४ तस्य भाव इत्यभिप्रायादिष्वतिप्रसङ्गः ।
५ सिद्धं तु यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ ।
६ यद्वा सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावस्तदभिधाने ।
७ उक्तं वा ।
८ त्वतलभ्यां नञ्समासः पूर्वविप्रतिषिद्धं त्वतलोः स्वरसिद्ध्यर्थम् ।
९ वा छन्दसि ।
१० नञ्समासादन्यो भाववचनः स्वरोत्तरपदवृद्ध्यर्थम् ।
आ च त्वात् ॥ १२० ॥
१ आ च त्वादिति चकारकरणमपवादसमावेशार्थम् ।
न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः ॥ १२१ ॥
१ न नञ्पूर्वादित्युत्तरस्य प्रतिषेधः ।
पृथ्वादिभ्य इमनिज्वा ॥ १२२ ॥
१ पृथ्वादिभ्यो वावचनमण्समावेशार्थम् ।
वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥
गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥
१ ब्राह्मणादिषु चातुर्वर्ण्यादीनामुपसंख्यानम् ।
२ अर्हतो नुम् च ।
स्तेनाद्यन्नलोपश्च ॥ १२५ ॥
सख्युर्यः ॥ १२६ ॥
कपिज्ञात्योर्ढक् ॥ १२७ ॥
पत्यन्तपुरोहितादिभ्यो यक् ॥ १२८ ॥

१–२ प. पुस्तके नास्ति । ३ वा. क. प्र. लि. वै. पुस्तकेषु युधस्थाने 'युध' इति ।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यो ऽञ् ॥ १२९ ॥
हायनान्तयुवादिभ्यो ऽण् ॥ १३० ॥
१ अण्प्रकरणे श्रोत्रियस्य घलोपश्च ।
इगन्ताच्च लघुपूर्वात् ॥ १३१ ॥
योपधाद्गुरूपोत्तमाद्वुञ् ॥ १३२ ॥
द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥
गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥
होत्राभ्यश्छः ॥ १३५ ॥
ब्रह्मणस्त्वः ॥ १३६ ॥

इति पञ्चमाध्यायस्य प्रथमः पादः ॥

धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥
व्रीहिशाल्योर्ढक् ॥ २ ॥
यवयवकषष्टिकाद्यत् ॥ ३ ॥
विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥
१ तिलादिभ्यः खञ् ।
२ उमाभङ्गयोरधान्यत्वात् ।
सर्वचर्मणः कृतः खखञौ ॥ ५ ॥
यथामुखसंमुखस्य दर्शनः खः ॥ ६ ॥
१ संमुखेति समस्यान्तलोपः ।
तत्सर्वादेः पथ्यङ्गकर्मपत्त्रपात्रं व्याप्नोति ॥ ७ ॥
आप्रपदं प्राप्नोति ॥ ८ ॥
अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥
परोऽवरपरंपरपुत्रपौत्रमनुभवति ॥ १० ॥
१ परोवरेति परस्योत्ववचनम् ।
२ परपरतराणां परंपरभावः ।
अवारपारात्यन्तानुकामं गामी ॥ ११ ॥
समां समां विजायते ॥ १२ ॥
१ समां समां विजायत इति यलोपवचनादलुग्विज्ञानम् इति चेदुत्तरपदस्य लुग्वचनम् ।
२ सिद्धं तु पूर्वपदस्य यलोपवचनात् ।
३ अनुसत्यावुत्तरपदस्य च वावचनम् ।
अद्यश्वीनावष्टब्धे ॥ १३ ॥
आगवीनः ॥ १४ ॥
१ गोराङ्पूर्वादा तस्य गोः प्रतिदानात्कारिणि खः ।
अनुग्वलंगामी ॥ १५ ॥
अध्वनो यत्खौ ॥ १६ ॥
अभ्यमित्राच्छ च ॥ १७ ॥
गोष्ठात् खञ् भूतपूर्वे ॥ १८ ॥
अश्वस्यैकाहगमः ॥ १९ ॥
शालीनकौपीने अधृष्टाकार्ययोः ॥ २० ॥
व्रातेन जीवति ॥ २१ ॥
साप्तपदीनं सख्यम् ॥ २२ ॥
हैयंगवीनं संज्ञायाम् ॥ २३ ॥
१ ह्योगोदोहस्य हियङ्ग्वादेशः संज्ञायां तस्य विकारे ।
तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥

१ प. पुस्तके इतः परमधिकम् । 'सहायाद्वा' इति काशिका ।

पक्षात्तिः ॥ २५ ॥
तेन वित्तश्चुञ्चुप्चणपौ ॥ २६ ॥
विनञ्भ्यां नानाञौ न सह ॥ २७ ॥
वेः शालच्छङ्कटचौ ॥ २८ ॥
संप्रोदश्च कटच् ॥ २९ ॥

१ कटच्प्रकरणेऽलाबूतिलोमाभ्यो रजस्युपसंख्यानम् ।

२ भङ्गायाश्च ।

३ गोष्ठादयः स्थानादिषु पशुनामादिभ्यः ।

४ उपमानाद्वा सिद्धम् ।

अवात् कुटारच् च ॥ ३० ॥
नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥ ३१ ॥
नेर्बिडज्बिरीसचौ ॥ ३२ ॥
इनच्पिटच् चिकचि च ॥ ३३ ॥

१ इनच्पिटच्काश्चिकचिचिकादेशाश्च ।

२ क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी[2] ।

उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥ ३४ ॥
कर्मणि घटोऽठच् ॥ ३५ ॥
तदस्य संजातं तारकादिभ्य इतच् ॥ ३६ ॥
प्रमाणे द्वयसज्दघ्नञ्मात्रचः[3][4] ॥ ३७ ॥

१ वत्वन्तात्स्वार्थे द्वयसज्मात्रचौ बहुलम् ।

पुरुषहस्तिभ्यामण् च ॥ ३८ ॥
यत्तदेतेभ्यः परिमाणे वतुप्[5] ॥ ३९ ॥

१ वतुप्प्रकरणे युष्मदस्मद्भ्यां सादृश्य उपसंख्यानम् ।

किमिदम्भ्यां वो घः ॥ ४० ॥
किमः संख्यापरिमाणे डति च ॥ ४१ ॥
संख्याया अवयवे तयप् ॥ ४२ ॥

१ अवयवविधानेऽवयविनि प्रत्ययः ।

द्वित्रिभ्यां तयस्यायज्वा ॥ ४३ ॥
उभादुदात्तो नित्यम् ॥ ४४ ॥
तदस्मिन्नधिकमिति दशान्ताड्डः[6] ॥ ४५ ॥

१ डविधाने परिमाणशब्दानामाधिक्यस्याधिकरणाभावादनिर्देशः ।

२ सिद्धं तु पञ्चमीनिर्देशात् ।

शदन्तविंशतेश्च ॥ ४६ ॥

१ शद्ग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात्स तदादेरधिकार्थम् ।

२ संख्याग्रहणं च ।

३ विंशतेश्च ।

संख्याया गुणस्य निमाने मयट् ॥ ४७ ॥

१ निमाने गुणिनि ।

---

१ प. पुस्तके इतः परमधिकम् । संघाते कटच् । गुणादिभ्यो ग्रामच् का. । कमलादिभ्यः षण्डच् का. । नरकरितुरंगाणां स्कन्धच् का. । पूर्वादिभ्यः काण्डच् वा. । विस्तारे पटच् । द्वित्वे गोयुगच् । पट्त्वे पङ्क्तिच् का. । विकारे स्नेहने तैलच् । भवने क्षेत्रे शाकटशाकिनौ । २ प. पुस्तके इतः परमधिकम् । क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी । चुल् च वक्तव्यः । ३ वै. प्र. वा. नि. क. पुस्तकेषु °घ्नञ्मा° इति पाठः । ४ प. पुस्तके इमानि भाष्यकारवचनानि वार्तिकत्वेन संगृहीतानि । प्रमाणं प्रत्ययार्थो न । तद्धति । अस्येति वर्तनात् । प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम । प्रमाणे लः । द्विगोर्नित्यम् । डट् स्तोमे । शच्छनोर्डिनिः । विंशतेश्च । प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये । ५ प. पुस्तके इतः परमधिकम् । डावतावर्थवैशेष्यान्निर्देशः पृथगुच्यते । मात्राद्यप्रतिघाताय । भावः सिद्धश्च डावतोः । ६ प. पुस्तके इतः परमधिकम् । अधिके समानजातौ । इष्टं शतसहस्रयोः । यस्य संख्या तदाधिक्ये डः कर्तव्यो मतो मम ।

२ भूयसः ।
३ एकोऽन्यतरः ।
४ समानानाम् ।
५ निमेये चापि दृश्यते ।

तस्य पूरणे डट् ॥ ४८ ॥
१ तस्य पूरण इत्यतिप्रसङ्गः ।
२ सिद्धं तु संख्यापूरण इति वचनात् ।
३ यस्य वा भावादन्यसंख्यात्वं तत्र ।

नान्तादसंख्यादेर्मट् ॥ ४९ ॥
१ मडादिषु यस्यादिस्तन्निर्देशः ।
२ प्रत्ययान्तरे हि स्वरे दोषः ।

थट् च च्छन्दसि ॥ ५० ॥

षट्कतिकतिपयचतुरां थुक् ॥ ५१ ॥
१ चतुरश्छयतावाद्यक्षरलोपश्च ।
२ थट्थुकोः पृथक्करणं पदान्तविधिप्रतिषेधार्थम् ।

बहुपूगगणसंघस्य तिथुक् ॥ ५२ ॥
१ बहुकतिपयवतूनां लिङ्गविशिष्टादुत्पत्तिः सिद्धा ।
२ पुंवद्वचनं च ।

वतोरिथुक् ॥ ५३ ॥

द्वेस्तीयः ॥ ५४ ॥

त्रेः संप्रसारणं च ॥ ५५ ॥

विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥५६॥

नित्यं शतादिमासार्धमाससंवत्सराच्च ॥ ५७ ॥

षष्ट्यादेश्चासंख्यादेः ॥ ५८ ॥

मतौ छः सूक्तसाम्नोः ॥ ५९ ॥
१ छप्रकरणेऽनेकपदादपि ।
२ सिद्धं तु प्रातिपदिकविज्ञानात् ।
३ 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति वचनात् ।
४ आम्नायशब्दानामान्यभाव्यं स्वरवर्णानुपूर्वीदेशकालनियतत्वात् ।
५ पदैकदेशस्तुल्लोपदर्शनाच्च ।

अध्यायानुवाकयोर्लुक् ॥ ६० ॥
१ अध्यायानुवाकाभ्यां वा लुक् ।

विमुक्तादिभ्योऽण् ॥ ६१ ॥

गोषदादिभ्यो वुन् ॥ ६२ ॥

तत्र कुशलः पथः ॥ ६३ ॥

आकर्षादिभ्यः कन् ॥ ६४ ॥

धनहिरण्यात्कामे ॥ ६५ ॥
१ धनहिरण्यात्कामाभिधाने ।
२ षष्ठ्यर्थे ह्यनिष्टप्रसङ्गः ।

स्वाङ्गेभ्यः प्रसिते ॥ ६६ ॥

उदराट्ठगाद्यूने ॥ ६७ ॥

सस्येन परिजातः ॥ ६८ ॥

अंशं हारी ॥ ६९ ॥

तन्त्रादचिरापहृते ॥ ७० ॥

ब्राह्मणकोष्णिके संज्ञायाम् ॥ ७१ ॥

शीतोष्णाभ्यां कारिणि ॥ ७२ ॥

अधिकम् ॥ ७३ ॥

अनुकाभिकाभीकः कमिता ॥ ७४ ॥

पार्श्वेनान्विच्छति ॥ ७५ ॥

अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ७६॥

तावतिथं ग्रहणमिति लुग्वा ॥ ७७ ॥
१ तावतिथं ग्रहणमिति लुग्वावचनानर्थक्यं विभाषाप्रकरणात् ।

२ तावतिथेन गृह्णातीति लुक्च ।

स एषां ग्रामणीः ॥ ७८ ॥

शृङ्खलमस्य बन्धनं करभे ॥ ७९ ॥

१ शृङ्खलमस्य बन्धनं करभ इत्यनिर्देशः ।

२ सिद्धं तु तद्बन्निर्देशाल्लुक्च ।

उत्क उन्मनाः ॥ ८० ॥

कालप्रयोजनाद्रोगे ॥ ८१ ॥

तदस्मिन्नन्नं प्राये संज्ञायाम् ॥ ८२ ॥

१ प्राये संज्ञायां वटकेभ्य इनिः ।

कुल्माषादञ् ॥ ८३ ॥

श्रोत्रियंश्छन्दो ऽधीते ॥ ८४ ॥

१ श्रोत्रियंश्छन्दोऽधीत इति वाक्यार्थे पदवचनम् ।

२ छन्दसो वा श्रोत्रभावस्तदधीत इति घंश्च ।

श्राद्धमनेन भुक्तमिनिठनौ ॥ ८५ ॥

१ इनिठनोः समानकालग्रहणम् ।

२ उक्तं वा ।

पूर्वादिनिः ॥ ८६ ॥

सपूर्वाच्च ॥ ८७ ॥

इष्टादिभ्यश्च ॥ ८८ ॥

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥ ८९ ॥

अनुपद्यन्वेष्टा ॥ ९० ॥

साक्षाद्द्रष्टरि संज्ञायाम् ॥ ९१ ॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ९२ ॥

१ क्षेत्रियः श्रोत्रियवत् ।

२ परक्षेत्राद्वा तत्र चिकित्स्य इति परलोपो घच्च ।

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ९३ ॥

तदस्यास्त्यस्मिन्निति मतुप् ॥ ९४ ॥

१ मतुप्प्रभृतयः सन्मात्रे चेदतिप्रसङ्गः[2] ।

२ उक्तं[3] वा ।

३ गुणवचनेभ्यो मतुपो लुक् ।

४ अव्यतिरेकात्सिद्धमिति चेद्दृष्टो व्यतिरेकः ।

५ तथा च लिङ्गवचनसिद्धिः ।

रसादिभ्यश्च ॥ ९५ ॥

१ रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम् ।

प्राणिस्थादातो लजन्यतरस्याम्[4] ॥ ९६ ॥

सिध्मादिभ्यश्च ॥ ९७ ॥

१ लजन्यतरस्यामिति समुच्चयः ।

२ पिच्छादिभ्यस्तुन्दादीनां नानायोगकरणं ज्ञापकमसमावेशस्य ।

३ वस्यचपुनर्वचनं सर्वविभाषार्थम्[5] ।

वत्सांसाभ्यां कामबले ॥ ९८ ॥

फेनादिलच् च ॥ ९९ ॥

लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ १०० ॥

१ नप्रकरणे दद्रा ह्रस्वत्वं च ।

२ विष्वगित्युत्तरपदलोपश्चाकृतसंधेः ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । तस्माद्भूमादिग्रहणम् । भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः । ३ प. पुस्तके इतः परमधिकम् । सन्मात्रे चर्षिदर्शनात् । ४ प. पुस्तके इतः परमधिकम् । प्राण्यङ्गादिति वक्तव्यम् । ५ प. पुस्तके चकारो नास्ति ।

प्रज्ञाश्रद्धार्चाभ्यो णः ॥ १०१ ॥

१ वृत्तेश्च[1] ।

तपःसहस्राभ्यां विनीनी ॥ १०२ ॥

अण् च ॥ १०३ ॥

१ तपसो विन्वचनमण्विधानात् ।

२ अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम् ।

सिकताशर्कराभ्यां च ॥ १०४ ॥

देशे लुबिलचौ च ॥ १०५ ॥

दन्त उन्नत उरच् ॥ १०६ ॥

ऊषसुषिमुष्कमधो रः ॥ १०७ ॥

१ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्[2] ।

द्युद्रुभ्यां मः ॥ १०८ ॥

केशाद्वो ऽन्यतरस्याम् ॥ १०९ ॥

१ वप्रकरणे मणिहिरण्याभ्यामुपसंख्यानम् ।

२ छन्दसीवनिपौ च ।

३ मेधारथाभ्यामिरनिरचौ[3] ।

गाण्ड्यजगात्संज्ञायाम् ॥ ११० ॥

काण्डाण्डादीरन्नीरचौ ॥ १११ ॥

रजःकृष्यासुतिपरिषदो वलच् ॥ ११२ ॥

१ वलच्प्रकरणे अन्येभ्योऽपि दृश्यते ।

दन्तशिखात्संज्ञायाम् ॥ ११३ ॥

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वल-गोमिन्मलिनमलीमसाः ॥ ११४ ॥

अत इनिठनौ ॥ ११५ ॥

१ इनिठनोरेकाक्षरात्प्रतिषेधः[4] ।

व्रीह्यादिभ्यश्च ॥ ११६ ॥

१ शिखायवखदादिभ्यो नियमस्यावचनं निवर्तकत्वात् ।

तुन्दादिभ्य इलच् च ॥ ११७ ॥

एकगोपूर्वाट्ठञ् नित्यम् ॥ ११८ ॥

शतसहस्रान्ताच्च निष्कात् ॥ ११९ ॥

रूपादाहतप्रशंसयोर्यप् ॥ १२० ॥

१ यप्प्रकरणे अन्येभ्योऽपि दृश्यते ।

अस्मायामेधास्रजो विनिः ॥ १२१ ॥

बहुलं छन्दसि ॥ १२२ ॥

१ छन्दोविन्प्रकरणे ऽष्ट्रामेखलाद्वयोभय-रुजाहृदयानां दीर्घश्च[5] ।

२ सर्वत्रामयस्य ।

३ शृङ्गवृन्दाभ्यामारकन् ।

४ फलबर्हाभ्यामिनच् ।

५ हृदयाच्चालुरन्यतरस्याम् ।

६ शीतोष्णतृप्रेभ्यस्तन्न सहते ।

७ हिमाच्चेलुः ।

८ बलाच्चोलः ।

९ वातात्समूहे च ।

१० पर्वमरुद्भ्यां तप् ।

११ ददातिवृत्तं वा[5] ।

१ वै. का. पुस्तकयोः °र्चावृत्तिभ्य इति पाठः । २ प. पुस्तके इतः परमधिकम् । नगपांसुपाण्डु-भ्यश्च काशिका । कच्छ्वा ह्रस्वत्वं च काशिका । ३ प. पुस्तके इतः परमधिकम् । वप्रकरणे अन्येभ्योऽपि दृश्यत इति वक्तव्यम् । ४ प. पुस्तके इतः परमधिकम् । एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ । शिखादिभ्य इनिर्वाच्य इकन्यवखदादिषु । ५ प. पुस्तके इतः परमधिकम् । मर्मणश्चेति वक्तव्यम् ।

ऊर्णाया युस् ॥ १२३ ॥
वाचो ग्मिनिः ॥ १२४ ॥
आलजाटचौ बहुभाषिणि[1] ॥ १२५ ॥
स्वामिन्नैश्वर्ये ॥ १२६ ॥
अर्शआदिभ्यो ऽच् ॥ १२७ ॥
द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः॥१२८॥
वातातीसाराभ्यां कुक् च[2] ॥ १२९ ॥
वयसि पूरणात् ॥ १३० ॥
सुखादिभ्यश्च ॥ १३१ ॥
धर्मशीलवर्णान्ताच्च ॥ १३२ ॥
हस्ताज्जातौ ॥ १३३ ॥
वर्णाद्ब्रह्मचारिणि ॥ १३४ ॥
पुष्करादिभ्यो देशे ॥ १३५ ॥

१ इनिप्रकरणे बलाद्बाहूरुपूर्वपदादुपसंख्यानम् ।
२ सर्वादेश्च ।
३ अर्थाच्चासंनिहिते ।
४ तदन्ताच्च ।

बलादिभ्यो मतुबन्यतरस्याम् ॥ १३६ ॥
संज्ञायां मन्माभ्याम् ॥ १३७ ॥
कंशम्भ्यां बभयुस्तितुतयसः ॥ १३८ ॥
तुन्दिवलिवटेर्भः ॥ १३९ ॥
अहंशुभमोर्युस् ॥ १४० ॥

॥ इति पञ्चमाध्यायस्य द्वितीयः पादः ॥

प्राग्दिशो विभक्तिः ॥ १ ॥

१ विभक्तित्वे प्रयोजनमित्प्रतिषेधः ।
२ तौ[3] चोक्तम् ।
३ इदमो विभक्तिस्वरश्च ।
४ त्यदादिविधयश्च ।

किंसर्वनामबहुभ्यो ऽद्व्यादिभ्यः ॥ २ ॥

१ बहुग्रहणे संख्याग्रहणम् ।
२ द्व्यादिप्रतिषेधात्किम उपसंख्यानम् ।

इदम इश् ॥ ३ ॥
एतेतौ रथोः ॥ ४ ॥
एतदो[4] ऽन् ॥ ५ ॥

१ एतद इति योगविभागः ।
२ एतदश्च थम उपसंख्यानम् ।

सर्वस्य सो ऽन्यतरस्यां दि ॥ ६ ॥
पञ्चम्यास्तसिल् ॥ ७ ॥
तसेश्च ॥ ८ ॥

१ तसेस्तसिल्वचनं स्वरार्थम् ।

पर्यभिभ्यां च ॥ ९ ॥

१ पर्यभिभ्यां च सर्वोभयार्थे ।

सप्तम्यास्त्रल् ॥ १० ॥

१ तसिलादयो विभक्त्यादेशाश्चेत्सुब्लुक्स्वरगुणदीर्घैत्त्वौत्त्वस्माय्यादिविधिप्रतिषेधः ।
२ पञ्चमीनिर्देशात्सिद्धम् ।
३ अनादेशे स्वार्थविज्ञानात्समानशब्दाप्रतिषेधः ।

इदमो हः ॥ ११ ॥
किमो ऽत् ॥ १२ ॥
वा ह च च्छन्दसि ॥ १३ ॥
इतराभ्यो ऽपि दृश्यन्ते[5] ॥ १४ ॥
सर्वैकान्यकिंयत्तदः काले दा ॥ १५ ॥
इदमो र्हिल् ॥ १६ ॥

---

१ प. पुस्तके इतः परमधिकम् । कुत्सित इति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । पिशाचाच्चेति वक्तव्यम् । ३ प. पुस्तके नास्ति । ४ काशिकापुस्तके °दोऽश् इति पाठः । ५ प. पुस्तके इतः परमधिकम् । भवदादियोग इति वक्तव्यम् ।

अधुना ॥ १७ ॥

दानीं च ॥ १८ ॥

१ दानीमिति निपातनात्स्वरसिद्धिः ।

२ उक्तं वा ।

तदो दा च ॥ १९ ॥

१ तदो दावचनमनर्थकं विहितत्वात् ।

तयोर्दार्हिलौ च च्छन्दसि ॥ २० ॥

१ तयोरिति प्रातिपदिकनिर्देशः ।

अनद्यतने र्हिलन्यतरस्याम् ॥ २१ ॥

सद्यः परुत् परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२ ॥

१ समानस्य सभावो द्यश्चाहनि ।

२ पूर्वपूर्वतरयोः परभाव उदारी च संवत्सरे ।

३ इदमः समसण् ।

४ परस्मादेद्यव्यहनि ।

५ इदमोऽश्भावो द्यश्च ।

६ पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युसुच् ।

७ द्युश्चोभयात् ।

प्रकारवचने थाल् ॥ २३ ॥

इदमस्थमुः ॥ २४ ॥

किमश्च ॥ २५ ॥

था हेतौ च च्छन्दसि ॥ २६ ॥

दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७ ॥

दक्षिणोत्तराभ्यामतसुच् ॥ २८ ॥

विभाषा परावराभ्याम् ॥ २९ ॥

अञ्चेर्लुक् ॥ ३० ॥

उपर्युपरिष्टात् ॥ ३१ ॥

१ ऊर्ध्वस्योपभावो रिल्रिष्टातिलौ च ।

पश्चात् ॥ ३२ ॥

१ अपरस्य पश्चभावो आतिश्च प्रत्ययः ।

२ दिक्पूर्वपदस्य च ।

३ अर्धोत्तरपदस्य च समासे ।

४ अर्धे च ।

पश्चा पश्चा च च्छन्दसि ॥ ३३ ॥

उत्तराधरदक्षिणादातिः ॥ ३४ ॥

एनबन्यतरस्यामदूरे ऽपञ्चम्याः ॥ ३५ ॥

१ अपञ्चम्या इति प्रागसः[1] ।

दक्षिणादाच् ॥ ३६ ॥

आहि च दूरे ॥ ३७ ॥

उत्तराच्च ॥ ३८ ॥

पूर्वाधरावराणामसि पुरधवश्चैषाम् । ३९ ।

अस्ताति च ॥ ४० ॥

विभाषावरस्य ॥ ४१ ॥

संख्याया विधार्थे धा ॥ ४२ ॥

१ धाविधानं धात्वर्थपृथग्भावे ।

अधिकरणविचाले च ॥ ४३ ॥

एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥

१ सहभावे ध्यमुञ् ।

द्वित्र्योश्च धमुञ् ॥ ४५ ॥

१ धमुञन्तात्स्वार्थे [2]डदर्शनम् ।

एधाच्च च ॥ ४६ ॥

याप्ये पाशप् ॥ ४७ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके डविधानमिति पाठः ।

१ पाशपि कुत्सितग्रहणम् ।

पूरणाद्भागे तीयादन् ॥ ४८ ॥

प्रागेकादशभ्योऽच्छन्दसि ॥ ४९ ॥

षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥

मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥

एकादाकिनिच् चासहाये ॥ ५२ ॥

१ एकादाकिनिचि द्विबह्वर्थे प्रत्ययविधानम्

२ सिद्धं तु संख्यादेशवचनात् ।

३ असाहयस्य वा ।

भूतपूर्वे चरट् ॥ ५३ ॥

षष्ठ्या रूप्य च ॥ ५४ ॥

अतिशायने तमबिष्ठनौ ॥ ५५ ॥

१ अतिशायने बहुव्रीहावुक्तम् ।

२ शुक्लतरस्य शुक्लभावात्प्रकृतेः प्रत्यय-विज्ञानम् ।

३ तदन्ताच्च स्वार्थे छन्दसि दर्शनं श्रेष्ठ-तमायेति ।

तिङश्च ॥ ५६ ॥

द्विवचनविभज्योपपदे तरबीयसुनौ ॥५७॥

१ तरबीयसुनोरेकद्रव्यस्योत्कर्षापकर्षयोरु-पसंख्यानम् ।

२ सिद्धं तु गुणप्रधानत्वात् ।

अजादी गुणवचनादेव ॥ ५८ ॥

तुश्छन्दसि ॥ ५९ ॥

प्रशस्यस्य श्रः ॥ ६० ॥

ज्य च ॥ ६१ ॥

वृद्धस्य च ॥ ६२ ॥

अन्तिकबाढयोर्नेदसाधौ ॥ ६३ ॥

युवाल्पयोः कनन्यतरस्याम् ॥ ६४ ॥

विन्मतोर्लुक् ॥ ६५ ॥

प्रशंसायां रूपप् ॥ ६६ ॥

१ प्रकृतेर्लिङ्गवचनाभावात्तिङ्प्रकृतेरम्भाव-वचनम् ।

२ सिद्धं तु क्रियाप्रधानत्वात् ।

३ वृषलादिभ्य उपसंख्यानम् ।

४ सिद्धं तु प्रकृत्यर्थवैस्पष्टवचनात् ।

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ६७॥

१ ईषदसमाप्तौ क्रियाप्रधानत्वाल्लिङ्गवचना नुपपत्तिः ।

२ प्रकृत्यर्थविशेषणत्वात्सिद्धम् ।

३ प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिः ।

४ सिद्धं तु तत्संबंध उत्तरपदार्थे प्रत्यय-वचनात् ।

५ क्तान्तात्प्रत्ययविधानानुपपत्तिः क्तस्य भूतकाललक्षणत्वात्[२]कल्पादीनां चासमाप्ति-वचनात् ।

६ सिद्धं त्वाशंसायां भूतवद्वचनात् ।

विभाषा सुपो बहुच् पुरस्तात्तु ॥ ६८ ॥

१ बहुचि सुब्ग्रहणात्पूर्वत्र तिङो विधानम् ।

२ स्वरः प्रातिपदिकत्वात् ।

३ तुग्रहणं नित्यपूर्वार्थम् ।

४ तमादिभ्यः कल्पादयो विप्रतिषेधेन ।

५ तमादिरिषत्प्रधानात् ।

प्रकारवचने जातीयर् ॥ ६९ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके कल्पबादीनामिति पाठः ।

प्रागिवात् कः ॥ ७० ॥

अव्ययसर्वनाम्नामकच् प्राक् टेः ॥ ७१ ॥

कस्य च दः ॥ ७२ ॥

१ अकच्प्रकरणे तूष्णीमः काम् ।

२ शीले को मलोपश्च ।

३ अम्बहुजकक्षु नानादेशत्वादुत्सर्गप्रतिषेधः ।

४ कविधेस्तमादयः पूर्वविप्रतिषिद्धम् ।

५ कदाचिच्छिन्नकतरादयः ।

६ एकदेशिप्रधानश्च समासः ।

७ उत्तरपदार्थप्रधानश्च संज्ञायां कन्विध्यर्थम् ।

८ कदाचिद्द्वन्द्वः ।

अज्ञाते ॥ ७३ ॥

कुत्सिते ॥ ७४ ॥

१ कुत्सितादीनामर्थे चेल्लिङ्गवचनानुपपत्तिः।

२ कुत्सितादिसमानाधिकरणादिति चेदतिप्रसङ्गो यथा टावादिषु ।

३ सिद्धं तु येन कुत्सितादिवचनं तद्युक्तात्स्वार्थे प्रत्ययविधानात् ।

संज्ञायां कन् ॥ ७५ ॥

अनुकम्पायाम् ॥ ७६ ॥

नीतौ च तद्युक्तात् ॥ ७७ ॥

बह्वचो मनुष्यनाम्नष्ठज्वा ॥ ७८ ॥

घनिलचौ च ॥ ७९ ॥

प्राचामुपादेरडज्वुचौ च ॥ ८० ॥

जातिनाम्नः कन् ॥ ८१ ॥

अजिनान्तस्योत्तरपदलोपश्च ॥ ८२ ॥

ठाजादावूर्ध्वं द्वितीयादचः ॥ ८३ ॥

१ ठग्रहणमुको द्वितीयत्वे कविधानार्थम् ।

२ अजादिलक्षणे हि माथितिकादिवत्प्रसङ्गः ।

३ द्वितीयादचो लोपे संध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम् ।

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ८४ ॥

१ वरुणादीनां च तृतीयात्स चाकृतसंधीनाम् ।

२ षडिके जश्त्व उक्तम् ।

३ वाचिकादिषु पदवृत्तप्रतिषेधः ।

४ सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनात् ।

५ षषष्ठाजादिवचनात्सिद्धम् ।

अल्पे ॥ ८५ ॥

ह्रस्वे ॥ ८६ ॥

संज्ञायां कन् ॥ ८७ ॥

कुटीशमीशुण्डाभ्यो रः ॥ ८८ ॥

१ कुटीशमीशुण्डाभ्यः प्रत्ययसंनियोगेन पुंवद्वचनम् ।

२ उक्तं वा ।

कुत्वा डुपच् ॥ ८९ ॥

कासूगोणीभ्यां ष्टरच् ॥ ९० ॥

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥ ९१ ॥

१ वत्सादिभ्यस्तनुत्वे कार्श्ये प्रतिषेधः ।

---

१ प. पुस्तके इतः परमधिकम् । अनोकारसकारभकारादाविति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । चतुर्थात् । अनजादौ च । लोपः पूर्वपदस्य च । अप्रत्यये तथैवेष्टः । उवर्णाल्ल इलस्य च । ३ प. पुस्तके नास्ति

कियत्तदो निर्धारणे द्वयोरेकस्य डतरच्
॥ ९२ ॥
वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९३ ॥
१ किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यम् ।
एकाच्च प्राचाम् ॥ ९४ ॥
१ प्राग्वचनानर्थक्यं च विभाषाप्रकरणात् ।
अवक्षेपणे कन् ॥ ९५ ॥
इवे प्रतिकृतौ ॥ ९६ ॥
संज्ञायां च ॥ ९७ ॥
लुम्मनुष्ये ॥ ९८ ॥
१ लिङ्गसिद्ध्यर्थं लुम्मनुष्ये ।
जीविकार्थे चापण्ये ॥ ९९ ॥
देवपथादिभ्यश्च ॥ १०० ॥
वस्तेर्ढञ् ॥ १०१ ॥
शिलाया ढः ॥ १०२ ॥
शाखादिभ्यो यत् ॥ १०३ ॥
द्रव्यं च भव्ये ॥ १०४ ॥
कुशाग्राच्छः ॥ १०५ ॥
समासाच्च तद्विषयात् ॥ १०६ ॥
शर्करादिभ्योऽण् ॥ १०७ ॥
अङ्गुल्यादिभ्यष्ठक् ॥ १०८ ॥
एकशालायाष्ठजन्यतरस्याम् ॥ १०९ ॥
कर्कलोहितादीकक् ॥ ११० ॥
प्रत्नपूर्वविश्वेमात् थाल् छन्दसि ॥ १११ ॥
पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ११२ ॥
व्रातच्फञोरस्त्रियाम् ॥ ११३ ॥

आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराजन्यात् ॥ ११४ ॥
वृकाट्टेण्यण् ॥ ११५ ॥
दामन्यादित्रिगर्तषष्ठाच्छः ॥ ११६ ॥
पर्श्वादियौधेयादिभ्यो[1] ऽणञौ ॥ ११७ ॥
अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् ॥ ११८ ॥
१ अणो गोत्राद्गोत्रवचनम् ।
ञ्यादयस्तद्राजाः ॥ ११९ ॥

॥ इति पञ्चमाध्यायस्य तृतीयः पादः ॥

पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ॥ १ ॥
१ पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात् ।
दण्डव्यवसर्गयोश्च ॥ २ ॥
स्थूलादिभ्यः प्रकारवचने कन् ॥ ३ ॥
१ कन्प्रकरणे चञ्चद्बृहतोरुपसंख्यानम् ।
अनत्यन्तगतौ क्तात् ॥ ४ ॥
१ अनत्यन्तगतौ क्तान्तात्तमादयः पूर्वविप्रतिषिद्धम् ।
२ तदन्ताच्च स्वार्थे कन्वचनम् ।
न सामिवचने ॥ ५ ॥
१ सामिवचने प्रतिषेधानर्थक्यं प्रकृत्याभिहितत्वात् ।
बृहत्या आच्छादने ॥ ६ ॥
अपडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ॥ ७ ॥

---

१ °दिभ्यामिति क्वचित्कोऽपपाठः ।

१ अध्युत्तरपदात्प्रत्ययविधानानुपपत्तिर्विग्रहाभावात् ।

२ तस्मात्तत्रेदमिति सधीनर् ।

विभाषाश्वेरदिक्स्त्रियाम् ॥ ८ ॥

जात्यन्ताच्छ बन्धुनि ॥ ९ ॥

स्थानान्ताद्विभाषा सस्थानेनेति चेत् ॥ १० ॥

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥ ११ ॥

अमु च च्छन्दसि ॥ १२ ॥

अनुगादिनष्ठक् ॥ १३ ॥

णचः स्त्रियामञ् ॥ १४ ॥

अणिनुणः ॥ १५ ॥

विसारिणो मत्स्ये ॥ १६ ॥

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ १७ ॥

द्वित्रिचतुर्भ्यः सुच् ॥ १८ ॥

एकस्य सकृच्च ॥ १९ ॥

विभाषा बहोर्धाविप्रकृष्टकाले ॥ २० ॥

तत्प्रकृतवचने मयट् ॥ २१ ॥

समूहवच्च बहुषु ॥ २२ ॥

अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ २३ ॥

देवतान्तात्तादर्थ्ये यत् ॥ २४ ॥

पादार्घाभ्यां च ॥ २५ ॥

अतिथेर्ञ्यः ॥ २६ ॥

देवात्तल् ॥ २७ ॥

१ तलि स्त्रीलिङ्गवचनम् ।

२ उक्तं वा ।

अवेः कः ॥ २८ ॥

यावादिभ्यः कन् ॥ २९ ॥

लोहितान्मणौ ॥ ३० ॥

१ लोहिताल्लिङ्गबाधनं वा ।

२ अक्षरसमूहे छन्दस उपसंख्यानम् ।

३ छन्दसि बहुभिर्वसव्यैरुपसंख्यानम् ।

४ अग्निरीशे वसव्यस्येति ।

५ उक्तं वा[1] ।

६ नवस्य नू त्नप्तनखाश्च ।

७ नश्च पुराणे प्रात् ।

वर्णे चानित्ये ॥ ३१ ॥

रक्ते ॥ ३२ ॥

कालाच्च ॥ ३३ ॥

विनयादिभ्यष्ठक् ॥ ३४ ॥

वाचो व्याहृतार्थायाम् ॥ ३५ ॥

तद्युक्तात्कर्मणोऽण् ॥ ३६ ॥

१ अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दसि ।

२ भागरूपनामभ्यो धेयः ।

३ मित्राश्छन्दसि ।

४ अणमित्राच्च[2] ।

५ आग्नीध्रसाधारणादञ् ।

६ अयवसमरुद्भ्यां छन्दसि ।

७ नवसूरमर्तयविष्ठेभ्यो यत् ।

८ क्षेमाद्यः ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । अपओककविक्षेमवर्चोनिष्केवलोक्थजनपूर्वनवयविष्ठेभ्यो यत् । ३ प. पुस्तके इतः परमधिकम् । सांनाय्यानुजावरानुपूकचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसांतपनानि ।

ओपधेरजातौ ॥ ३७ ॥
प्रज्ञादिभ्यश्च ॥ ३८ ॥
मृदस्तिकन् ॥ ३९ ॥
सस्नौ प्रशंसायाम् ॥ ४० ॥
वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि ॥ ४१ ॥
बह्वल्पार्थाच्छस् कारकादन्यतरस्याम् ॥ ४२ ॥

१ बह्वल्पार्थान्मङ्गलामङ्गलवचनम् ।

संख्यैकवचनाच्च वीप्सायाम् ॥ ४३ ॥
प्रतियोगे पञ्चम्यास्तसिः ॥ ४४ ॥

१ तसिप्रकरण आद्यादिभ्य उपसंख्यानम् ।

अपादाने चाहीयरुहोः ॥ ४५ ॥
अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥ ४६ ॥
हीयमानपापयोगाच्च ॥ ४७ ॥
षष्ठ्या व्याश्रये ॥ ४८ ॥
रोगाच्चापनयने ॥ ४९ ॥
कृभ्वस्तियोगे संपद्यकर्तरि च्विः ॥ ५० ॥

१ च्विविधावभूततद्भावग्रहणम् ।
२ प्रकृतिविवक्षाग्रहणं च ।
३ समीपादिभ्य उपसंख्यानम् ।

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५१ ॥
विभाषा साति कार्त्स्न्ये ॥ ५२ ॥
अभिविधौ संपदा च ॥ ५३ ॥
तदधीनवचने ॥ ५४ ॥
देये त्रा च ॥ ५५ ॥
देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥ ५६ ॥
अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् ॥ ५७ ॥

१ डाचि चित्करणं विशेषणार्थम् ।

कृञो द्वितीयतृतीयशम्बबीजात्कृषौ ५८
संख्यायाश्च गुणान्तायाः ॥ ५९ ॥
समयाच्च यापनायाम् ॥ ६० ॥
सपत्रनिष्पत्रादतिव्यथने ॥ ६१ ॥
निष्कुलान्निष्कोषणे ॥ ६२ ॥
सुखप्रियादानुलोम्ये ॥ ६३ ॥
दुःखात्प्रातिलोम्ये ॥ ६४ ॥
शूलात्पाके ॥ ६५ ॥
सत्यादशपथे ॥ ६६ ॥
मद्रात्परिवापणे[1] ॥ ६७ ॥
समासान्ताः ॥ ६८ ॥

१ प्रयोजनमव्ययीभाव द्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः ।

न पूजनात् ॥ ६९ ॥

१ पूजायां स्वतिग्रहणम् ।
२ प्राग्बहुव्रीहिग्रहणं च ।

किमः क्षेपे ॥ ७० ॥
नञस्तत्पुरुषात् ॥ ७१ ॥
पथो विभाषा ॥ ७२ ॥
बहुव्रीहौ संख्येये डजबहुगणात् ॥ ७३ ॥

१ डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थम् ।
२ अन्यत्राधिकलोपात्[2] ।

१ प. पुस्तके इतः परमधिकम् । भद्राच्चेति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अव्ययादेरिति वक्तव्यम् ।

ऋक्पूरब्धूःपथामानक्षे ॥ ७४ ॥
अच् प्रत्यन्ववपूर्वात्सामलोम्नः ॥ ७५ ॥
अक्ष्णोऽदर्शनात् ॥ ७६ ॥
अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ ७७ ॥

१ चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम्।

ब्रह्महस्तिभ्यां वर्चसः ॥ ७८ ॥
अवसमन्धेभ्यस्तमसः ॥ ७९ ॥
श्वसो वसीयःश्रेयसः ॥ ८० ॥
अन्ववतप्ताद्रहसः ॥ ८१ ॥
प्रतेरुरसः सप्तमीस्थात् ॥ ८२ ॥
अनुगवमायामे ॥ ८३ ॥
द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥
उपसर्गादध्वनः ॥ ८५ ॥
तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ।८६।
अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ।८७

१ अहर्ग्रहणं द्वन्द्वार्थम्[२] ।

अह्नोऽह्न एतेभ्यः ॥ ८८ ॥

१ अह्नोऽह्नवचनानर्थक्यं चाह्नष्टखोर्नियमवचनात्[३] ।

न संख्यादेः समाहारे ॥ ८९ ॥
उत्तमैकाभ्यां च ॥ ९० ॥
राजाहःसखिभ्यष्टच् ॥ ९१ ॥
गोरतद्धितलुकि ॥ ९२ ॥
अग्राख्यायामुरसः ॥ ९३ ॥
अनोऽश्मायःसरसां जातिसंज्ञयोः ॥९४॥
ग्रामकौटाभ्यां च तक्ष्णः ॥ ९५ ॥
अतेः शुनः ॥ ९६ ॥
उपमानादप्राणिषु ॥ ९७ ॥
उत्तरमृगपूर्वाच्च सक्थ्नः ॥९८ ॥
नावो द्विगोः ॥ ९९ ॥
अर्धाच्च ॥ १०० ॥
खार्याः प्राचाम् ॥ १०१ ॥
द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥
अनसन्तान्नपुंसकाच्छन्दसि[१] ॥ १०३ ॥
ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥
कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥
द्वन्द्वाच्चुदषहान्तात्समाहारे ॥ १०६ ॥
अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥
अनश्च ॥ १०८ ॥
नपुंसकादन्यतरस्याम् ॥ १०९ ॥
नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥
झयः ॥ १११ ॥
गिरेश्च सेनकस्य ॥ ११२ ॥
बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ११३

१ षचि प्रत्ययान्तरकरणमनन्तोदात्तार्थम् ।

अङ्गुलेर्दारुणि ॥ ११४ ॥
द्वित्रिभ्यां ष मूर्ध्नः ॥ ११५ ॥

---

१ प. पुस्तके इतः परमधिकम् । पल्यराजभ्यां चेति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । तत्पुरुषाभावात् । ३ प. पुस्तके इतः परमधिकम् । अनसन्तान्नपुंसकाच्छन्दसि वेति वक्तव्यम् ।

१ मूर्ध्नश्च षवचनम् ।

अप् पूरणीप्रमाण्योः ॥ ११६ ॥

१ अपि प्रधानपूरणीग्रहणम् ।

२ नेतुर्नक्षत्र उपसंख्यानम् ।

३ छन्दसि च ।

४ मासाद्भृति प्रत्ययपूर्वपदाट्ठज्विधिः ।

अन्तर्बहिर्भ्यां च लोम्नः ॥ ११७ ॥

अच्नासिकायाः संज्ञायां नसं चास्थूलात्[1] ॥ ११८ ॥

उपसर्गाच्च[3] ॥ ११९ ॥

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ १२० ॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥

नित्यमसिच् प्रजामेधयोः ॥ १२२ ॥

बहुप्रजाश्छन्दसि ॥ १२३ ॥

धर्मादनिच् केवलात् ॥ १२४ ॥

जम्भा सुहरिततृणसोमेभ्यः १२५ ॥

दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥

इच् कर्मव्यतिहारे ॥ १२७ ॥

द्विदण्ड्यादिभ्यश्च ॥ १२८ ॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥

ऊर्ध्वाद्विभाषा ॥ १३० ॥

ऊधसो ऽनङ् ॥ १३१ ॥

१ ऊधसोऽनङि स्त्रीग्रहणम् ।

धनुषश्च ॥ १३२ ॥

वा संज्ञायाम् ॥ १३३ ॥

जायाया निङ् ॥ १३४ ॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥

१ गन्धस्येत्त्वे तदेकान्तग्रहणम् ।

अल्पाख्यायाम् ॥ १३६ ॥

उपमानाच्च ॥ १३७ ॥

पादस्य लोपो ऽहस्त्यादिभ्यः ॥ १३८ ॥

कुम्भपदीषु च ॥ १३९ ॥

संख्यासुपूर्वस्य ॥ १४० ॥

वयसि दन्तस्य दतृ ॥ १४१ ॥

छन्दसि च ॥ १४२ ॥

स्त्रियां संज्ञायाम् ॥ १४३ ॥

विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥

ककुदस्यावस्थायां लोपः ॥ १४६ ॥

त्रिककुत्पर्वते ॥ १४७ ॥

उद्विभ्यां काकुदस्य ॥ १४८ ॥

पूर्णाद्विभाषा ॥ १४९ ॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥

उरःप्रभृतिभ्यः कप् ॥ १५१ ॥

इनः स्त्रियाम् ॥ १५२ ॥

नद्यृतश्च ॥ १५३ ॥

शेषाद्विभाषा ॥ १५४ ॥

न संज्ञायाम् ॥ १५५ ॥

ईयसश्च ॥ १५६ ॥

१ ईयस उपसर्जनदीर्घत्वं च ।

२ पुंवद्वचनात्सिद्धम् ।

वन्दिते भ्रातुः ॥ १५७ ॥

ऋतश्छन्दसि ॥ १५८ ॥

---

१ प. पुस्तके ठञ्विधिरिति । २ प. पुस्तके इतः परमधिकम् । खरखुराभ्यां च नस्वक्तव्यः । शितिना अर्चना अहिना इति नैगमाः । ३ प. पुस्तके इतः परमधिकम् । वेर्ग्रो वक्तव्यः । ख्यश्च ।

नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥

निष्प्रवाणिश्च ॥ १६० ॥

॥ इति पञ्चमाध्यायस्य चतुर्थः पादः ॥

षष्ठोऽध्यायः ॥

एकाचो द्वे प्रथमस्य ॥ १ ॥

१ एकाचो द्वे प्रथमस्येति बहुव्रीहिनिर्देशः ।

२ एकवर्णेषु व्यपदेशिवद्वचनात् ।

३ प्रथमत्वे च ।

४ उक्तं वा ।

५ योगविभागो वा ।

६ एकाज्मात्रस्य द्विर्वचनार्थः ।

७ एकाचोऽवयवैकाच्त्वादवयवानां द्विर्वचनप्रसङ्गः ।

८ तत्र जुस्भाववचनम् ।

९ स्वरश्च ।

१० अड्भावश्च ।

११ नुम्प्रतिषेधश्च ।

१२ शास्त्रहानिश्च ।

१३ सिद्धं तु तत्समुदायैकाच्त्वाच्छास्त्राहानेः

१४ तत्र बहुव्रीहिनिर्देशेऽनच्कस्य द्विर्वचनमन्यपदार्थत्वात् ।

१५ सिद्धं तु तद्गुणसंविज्ञानात्पाणिनेर्यथा लोके ।

१६ स्थाने द्विर्वचने णिलोपवचनं समुदायादेशत्वात् ।

१७ यच्च सन्यङन्तस्य द्विर्वचने ।

१८ द्विःप्रयोग इति चेण्णकारषकारादेशादेरेत्त्ववचनं लिटि ।

१९ इड्वचनं च यङ्लोपे ।

२० इड्दीर्घप्रतिषेधश्च ।

२१ पदादिविधिप्रतिषेधश्च ।

अजादेर्द्वितीयस्य ॥ २ ॥

१ द्वितीयस्येत्यवचनमजादेरिति कर्मधारयात्पञ्चमी ।

२ द्वितीयद्विर्वचने प्रथमनिवृत्तिः प्राप्तत्वात् ।

३ न वा प्रथमविज्ञाने हि द्वितीयाप्राप्तिरद्वितीयात् ।

४ यथा वादिविकारेऽलोन्त्यविकाराभावः ।

५ तत्र पूर्वस्याचो निवृत्तौ व्यञ्जनानिवृत्तिरशासनात्पूर्वस्य ।

६ न्द्रादिप्रतिषेधाच्च ।

७ तत्र द्वितीयाभावे प्रथमाद्विर्वचनं प्रतिषिद्धत्वात्[१] ।

८ सति तस्मिन्प्रतिषेध इति चेद्धलादिशेषे दोषः ।

९ लोकवद्धलादिशेषे ।

१० क्वचिदन्यत्र लोप इति चेद्द्विर्वचनम्[२] ।

न न्द्राः संयोगादयः ॥ ३ ॥

१ न्द्रादेर्द्विर्वचनप्रसङ्गस्तत्र न्द्राणां प्रतिषेधः ।

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतःपरमधिकम् । सति तस्मिन्प्रतिषेधः ।

२ ईर्ष्यतेस्तृतीयस्य ।

३ कण्ड्वादीनां च ।

४ वा[1] नामधातूनाम् ।

पूर्वो ऽभ्यासः ॥ ४ ॥

उभे अभ्यस्तम् ॥ ५ ॥

१ अभ्यस्तसंज्ञायां सहवचनम् ।

२ आद्युदात्तत्वे पृथगप्रसङ्गार्थम् ।

जक्षित्यादयः षट् ॥ ६ ॥

१ जक्षित्यादिषु सप्तग्रहणं वेवीत्यर्थम् ।

२ अपरिगणनं वागणान्तत्वात् ।

तुजादीनां दीर्घो ऽभ्यासस्य ॥ ७ ॥

१ तुजादिषु च्छन्दःप्रत्ययग्रहणम् ।

२ अनारम्भो वापरिगणितत्वात् ।

३ अन्येषां च दर्शनात् ।

४ अनेकान्तत्वाच्च ।

लिटि धातोरनभ्यासस्य ॥ ८ ॥

१ लिटि द्विर्वचने जागर्तेर्वावचनम् ।

२ अभ्यासप्रतिषेधानर्थक्यं च च्छन्दसि वावचनात् ।

३ प्रयोजनमादित्यान्याचिषामहे ।

सन्यङोः ॥ ९ ॥

१ सन्यङोः परत इति चेदिटो द्विर्वचनं परादित्वात् ।

२ हन्तेश्चेटः ।

३ एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्सन इट्प्रतिषेधः ।

४ सन्यङन्तस्येति चेदशेः सन्यनिटः ।

५ दीर्घकुत्वप्रसारणषत्वमधिकस्य द्विर्वचनात् ।

६ आवृद्धयोश्चाभ्यस्तविधिप्रतिषेधः ।

७ सङाश्रये च समुदायस्य समुदायादेशत्वाञ्झलाश्रये चाव्यपदेश आमिश्रत्वात् ।

श्लौ ॥ १० ॥

चङि ॥ ११ ॥

दाश्वान् साह्वान् मीढ्वांश्च ॥ १२ ॥

१ दाशेर्वसौ द्विर्त्वेट्प्रतिषेधौ ।

२ सहेर्दीर्घत्वं च ।

३ मिहेर्ढत्वं च ।

४ मह्यर्थ इति चेन्मिहेस्तदर्थत्वात्सिद्धम् ।

५ द्विर्वचनप्रकरणे कृञादीनां के ।

६ चरिचलिपतिवदीनामच्याक्चाभ्यासस्य ।

७ हन्तेर्घश्च ।

८ पाटेर्णिलुक्च दीर्घश्चाभ्यासस्योक्च ।

९ द्विर्वचनं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्यः ।

१० द्विर्वचनात्प्रसारणात्त्वधात्वादिविकाररीत्वेत्त्वेत्त्वोत्त्वगुणवृद्धिविषयः ।

ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ॥ १३ ॥

१ ष्यङः संप्रसारणे पुत्रपत्योस्तदादावतिप्रसङ्गः ।

२ वर्णग्रहण इति चेत्तदन्तप्रतिषेधः ।

३ सिद्धं तूत्तरपदवचनात् ।

४ यथागृहीतस्यादेशवचनादप्रत्ययस्थे सिद्धम् ।

५ अनन्त्यविकारेऽन्त्यसदेशस्य वा ।

---

[1] प. पुस्तके इतः परमधिकम् । यथेष्टं वा नामधातूनाम् ।

६ प्रयोजनं न संप्रसारणे संप्रसारणम् ।
७ सान्तमहतो दीर्घत्वे ।
८ अन्कारान्तस्याल्लोपे ।
९ मृजेर्वृद्धिविधौ ।
१० वसोः संप्रसारणे च ।
११ युवादीनां च ।
१२ वोरुपधाग्रहणं च ।
१३ आदित्यदादिविधिसंयोगादिलोपकुत्वढत्वभष्भावषत्वणत्वेष्वतिप्रसङ्गः ।
१४ उदात्तनिर्देशात्सिद्धम् ।

बन्धुनि बहुव्रीहौ[1] ॥ १४ ॥

वचिस्वपियजादीनां किति ॥ १५ ॥

ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ॥ १६ ॥

१ वयिग्रहणं वेञः प्रतिषेधात् ।
२ न वा यकारप्रतिषेधो ज्ञापकोऽप्रतिषेधस्य ।
३ पित्यभ्यासार्थमिति चेन्नाविशिष्टत्वात् ।

लिट्यभ्यासस्योभयेषाम् ॥ १७ ॥

१ अभ्याससंप्रसारणं हलादिशेषाद्विप्रतिषेधेन ।
२ न वा संप्रसारणाश्रयबलीयस्त्वादन्यत्रापि ।
३ प्रयोजनं रमाल्लोपेयङ्व्यणः ।
४ व्यचेः कुटादित्वमनस्यञ्णिति संप्रसारणार्थम् ।

स्वापेश्चङि ॥ १८ ॥

स्वपिस्यमिव्येञां यङि ॥ १९ ॥

न वशः ॥ २० ॥

१ वशेर्यङि प्रतिषेधः ।

चायः की ॥ २१ ॥

स्फायः स्फी निष्ठायाम् ॥ २२ ॥

स्त्यः प्रपूर्वस्य ॥ २३ ॥

द्रवमूर्तिस्पर्शयोः श्यः ॥ २४ ॥

प्रतेश्च ॥ २५ ॥

विभाषाभ्यवपूर्वस्य ॥ २६ ॥

शृतं पाके ॥ २७ ॥

१ श्राश्रप्योः शृभावः[2] ।
२ श्रपेः शृतमन्यत्र हेतोः ।

प्यायः पी ॥ २८ ॥

१ आङ्पूर्वादन्धूधसोः ।

लिड्यङोश्च ॥ २९ ॥

विभाषा श्वेः ॥ ३० ॥

१ श्वेर्लिट्यभ्यासलक्षणप्रतिषेधः ।

णौ च संश्चङोः ॥ ३१ ॥

ह्वः संप्रसारणम् ॥ ३२ ॥

अभ्यस्तस्य च ॥ ३३ ॥

१ ह्वः संप्रसारणे योगविभागः ।
२ णौ च संश्चङ्विषयार्थः ।
३ अभ्यस्तनिमित्तेऽनभ्यस्तप्रसारणार्थम् ।
४ अभ्यस्तप्रसारणे ह्यभ्यासप्रसारणाप्राप्तिः ।
५ समानाङ्गे प्रसारणप्रतिषेधात्प्रतिषेधः ।
६ कृदन्तप्रतिषेधार्थं च ।

बहुलं छन्दसि ॥ ३४ ॥

१ प. पुस्तके इतः परमधिकम् । मातन्मातृकमातृषु प्यङ्प्रसार्यो विभाषया । २ प. पुस्तके इतः परमधिकम् । क्षीरहविषोरिति वाच्यम् ।

चायः की ॥ ३५ ॥

अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्तः ॥३६॥

न संप्रसारणे संप्रसारणम् ॥ ३७ ॥

१ प्रसारणप्रकरणे पुनः प्रसारणग्रहणमतोऽन्यत्र प्रसारणप्रतिषेधार्थम् ।

२ समानाङ्गग्रहणं च ।

३ तत्रोपेपुषि दोषः ।

४ न वा यस्याङ्गस्य प्रसारणप्राप्तिस्तस्मिन्प्राप्तिप्रतिषेधात् ।

५ ऋचि त्रेरुत्तरपदादिलोपश्छन्दसि ।

६ रयेर्मतौ बहुलम् ।

७ कक्ष्यायाः संज्ञायाम् ।

लिटि वयो यः ॥ ३८ ॥

वश्चास्यान्यतरस्यां किति ॥ ३९ ॥

वेञः ॥ ४० ॥

ल्यपि च ॥ ४१ ॥

ज्यश्च ॥ ४२ ॥

व्यश्च ॥ ४३ ॥

विभाषा परेः ॥ ४४ ॥

आदेच उपदेशे ऽशिति ॥ ४५ ॥

१ आत्त्व एश्युपसंख्यानम् ।

२ अशित्येकादेशे प्रतिषेध आदिवत्त्वात् ।

३ प्रत्ययविधिः ।

४ अभ्यासरूपं च ।

५ अयवायावां प्रतिषेधश्च ।

६ शिति प्रतिषेधे श्लुलुकोरुपसंख्यानं ररीध्वं त्राध्वं शिशीते ।

७ प्रातिपदिकप्रतिषेधः ।

८ धात्वधिकारात्प्रातिपदिकस्याप्राप्तिः ।

न व्यो लिटि ॥४६॥

स्फुरतिस्फुलत्योर्घञि ॥ ४७ ॥

क्रीङ्जीनां णौ ॥ ४८ ॥

१ आत्त्वे णौ लीयतेरुपसंख्यानं प्रलम्भनशालीनीकरणयोः ।

सिध्यतेरपारलौकिके ॥ ४९ ॥

१ सिध्यतेरज्ञानार्थस्य ।

२ इतरथा ह्यनिष्टप्रसङ्गः ।

मीनातिमिनोतिदीङां ल्यपि च ॥ ५० ॥

१ मीनात्यादीनामात्त्व उपदेशवचनं प्रत्ययविध्यर्थम् ।

२ निमिमीलियां खलचोः प्रतिषेधः ।

विभाषा लीयतेः ॥ ५१ ॥

खिदेश्छन्दसि ॥ ५२ ॥

अपगुरो णमुलि ॥ ५३ ॥

चिस्फुरोर्णौ ॥ ५४ ॥

प्रजने वीयतेः ॥ ५५ ॥

बिभेतेर्हेतुभये ॥ ५६ ॥

नित्यं स्मयतेः ॥ ५७ ॥

सृजिदृशोर्झल्यमकिति ॥ ५८ ॥

१ अमि सङ्क्रमणम् ।

२ क्विप्प्रतिषेधार्थम् ।

३ उक्तं वा ।

अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ५९

---

१ वै. का. पुस्तकयोः °शीर्ताः । २ इदं वार्तिकं प. पुस्तके नास्ति । ३ प. पुस्तके नास्ति ।

शीर्षंश्छन्दसि ॥ ६० ॥

१ शीर्षंश्छन्दसि प्रकृत्यन्तरम् ।

२ आदेशप्रतिषेधार्थम् ।

ये च तद्धिते ॥ ६१ ॥

१ ये च तद्धिते शिरस आदेशार्थम् ।

२ वा केशेषु ।

३ अचि[1] शीर्षः ।

४ छन्दसि च ।

पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ॥ ६२ ॥

१ पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ।

२ नस्नासिकाया यत्तस्क्षुद्रेषु[2] ।

धात्वादेः षः सः ॥ ६३ ॥

१ सादेशे सुब्धातुष्ठिवुष्वष्कतीनां प्रतिषेधः ।

णो नः ॥ ६४ ॥

लोपो व्योर्वलि ॥ ६५ ॥

१ व्योर्लोपे कावुपसंख्यानम् ।

२ वलोपाप्रसिद्धिरूड्भाववचनात्[3] ।

३ अतिप्रसङ्गो व्रश्चादिषु[4] ।

४ उपदेशसामर्थ्यात्सिद्धमिति चेत्संप्रसारणहलादिशेषेषु सामर्थ्यम् ।

५ न वा बहिरङ्गलक्षणत्वात् ।

६ अनारम्भो वा ।

७ आस्रेमाणं जीरदानुरिति वर्णलोपात् यथा संस्फानो गयस्फानः ।

वेरपृक्तस्य[5] ॥ ६६ ॥

१ वेर्लोपे दर्विजागृव्योरप्रतिषेधोऽनुनासिकपरत्वात् ।

२ धात्वन्तस्य चार्थवद्ग्रहणात्[6] ।

३ वस्य वानुनासिकत्वात्सिद्धम् ।

हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ॥ ६७ ॥

१ हलन्तादपृक्तलोपः संयोगान्तलोपश्चेन्नलोपाभावो यथा पचन्निति ।

२ वस्रादिषु दत्वं संयोगादिलोपबलीयस्त्वात् यथा कूटताडिति ।

३ रात्तलोपो नियमवचनात् ।

४ रोरुत्त्वं च ।

५ न वा संयोगान्तलोपस्योत्त्वे सिद्धत्वात् यथा हरिवो मेदिनमिति ।

एङ्ह्रस्वात्संबुद्धेः ॥ ६८ ॥

१ संबुद्धिलोपे डतरादिभ्यः प्रतिषेधः ।

२ अपृक्ताधिकारस्य निवृत्तत्वात् ।

३ तच्चामर्थम् ।

४ [7]उक्तं वा ।

५ अपृक्तसंबुद्धिलोपाभ्यां लुक् ।

६ न वा लोपलुकोर्लुगवधारणाद्यथानड्वात इति ।

शेश्छन्दसि बहुलम् ॥ ६९ ॥

ह्रस्वस्य पिति कृति तुक् ॥ ७० ॥

---

१ इदं वार्तिकं वै. का. पुस्तकयोः सूत्रत्वेन गृहीतं परं महाभाष्ये वार्तिकेपूपलम्भादस्माभिर्वार्तिकपाठे संगृहीतम् । २ प. पुस्तके इतः परमधिकम् । अवर्णनगरयोरिति वक्तव्यम् । ३ प. पुस्तके °वचनादित्यस्य स्थाने प्रसङ्गात् इति पाठः । ४ प. पुस्तके इतः परमधिकम् । उपदेशसामर्थ्यात्सिद्धम् । ५ प. पुस्तके इतः परमधिकम् । दर्विजागृव्योः प्रतिषेधो वक्तव्यः । ६ प. पुस्तके चार्थवत्त्वादिति । ७ प. पुस्तके नास्ति ।

१ लुकि पूर्वान्ते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च ।
२ न वा बहिरङ्गलक्षणत्वात् ।
३ ग्रामणिपुत्रादिषु चाप्राप्तिः ।
४ परादौ संयोगादेरित्यतिप्रसङ्गः ।
५ विलोपवचनं च ।
६ इट्प्रतिषेधश्च ।
७ अभक्ते स्वरः ।

संहितायाम् ॥ ७१ ॥

छे च ॥ ७२ ॥

आङ्माङोश्च ॥ ७३ ॥

१ आङ्माङोः सानुबन्धकनिर्देशो गतिकर्मप्रवचनीयप्रतिषेधसंप्रत्ययार्थः ।

दीर्घात् ॥ ७४ ॥

पदान्ताद्वा ॥ ७५ ॥

१ दीर्घात्पदान्ताद्वा विश्वजनादीनां छन्दसि ।

इको यणचि[1] ॥ ७६ ॥

१ यणादेशः प्लुतपूर्वस्य च ।
२ दीर्घशाकलप्रतिषेधार्थम् ।

एचो ऽयवायावः ॥ ७७ ॥

वान्तो यि प्रत्यये ॥ ७८ ॥

१ वान्तादेशे स्थानिनिर्देशः ।
२ गोर्यूतौ छन्दसि ।
३ अध्वपरिमाणे च ।

धातोस्तन्निमित्तस्यैव ॥ ७९ ॥

क्षय्यजय्यौ शक्यार्थे ॥ ८० ॥

क्रय्यस्तदर्थे ॥ ८१ ॥

भय्यप्रवय्ये च च्छन्दसि ॥ ८२ ॥

१ भय्यादिप्रकरणे ह्रदय्या उपसंख्यानम् ।
२ अवृशरस्य च ।
३ शरुवृत्ताद्वा सिद्धम् ।
४ ऋज्जती शरुरित्यपि दृश्यते ।
५ शरुहस्त इति च लोके ।

एकः पूर्वपरयोः ॥ ८३ ॥

१ एकवचनं पृथगादेशप्रतिषेधार्थम् ।
२ न वा द्रव्यवत्कर्मचोदनायां द्वयोरेकस्याभिनिर्वृत्तेः ।
३ तच्चैकवाक्यभावात् ।
४ तत्रावयवे शास्त्रार्थसंप्रत्ययो यथा लोके ।
५ सिद्धं तु धर्मोपदेशनेऽनवयवविज्ञानाद्यथा लौकिकवैदिकेषु ।
६ पूर्वपरग्रहणं परस्यादेशप्रतिषेधार्थम् ।
७ पञ्चमीनिर्दिष्टाद्धि परस्य ।
८ षष्ठीनिर्दिष्टार्थं तु ।
९ अनिर्दिष्टे हि षष्ठ्यर्थाप्रसिद्धिः ।

अन्तादिवच्च ॥ ८४ ॥

१ अन्तादिवद्वचनमामिश्रस्यादेशवचनात् ।
२ तत्र यस्यान्तादिवत्तन्निर्देशः ।
३ सिद्धं तु पूर्वपराधिकारात् ।
४ अन्तवत्त्वे प्रयोजनं बह्वच्पूर्वपदाट्ठज्विधाने ।

---

१ प. पुस्तके इतः परमधिकम् । जश्त्वं न सिद्धं यणमत्र पश्य । यश्चापदान्तो हलचश्च पूर्वः । दीर्घस्य यण् ह्रस्व इति प्रवृत्तं संबन्धवृत्त्या गुणवृद्धिबाध्यः । २ प. पुस्तके इतः परमधिकम् । ओकारौकारयोरिति वक्तव्यम् ।

५ नकाराभावश्च तस्मादित्यनन्तरनिर्देशात् ।

६ इज्ग्रहणं तु ज्ञापकं पररूपाभावस्य ।

तस्माच्छसो नः पुंसि[1] ॥ १०१ ॥

नादिचि ॥ १०२ ॥

दीर्घाज्जसि च ॥ १०३ ॥

वा छन्दसि ॥ १०४ ॥

अमि पूर्वः[2] ॥ १०५ ॥

संप्रसारणाच्च ॥ १०६ ॥

१ संप्रसारणात्पर[3]पूर्वत्वे समानाङ्गग्रहणमसमानाङ्गप्रतिषेधार्थम् ।

२ सिद्धमसंप्रसारणात् ।

३ कार्यकृतत्वाद्वा ।

४ दीर्घत्वं वचनप्रामाण्यात् ।

५ अन्तवत्त्वाद्वा ।

६ आटो वृद्धेरियङ् ।

७ आड्गुणात्सवर्णदीर्घत्वमाङभ्यासयोः ।

८ स्वरदोषस्तु ।

९ आङि पररूपवचनं तु ज्ञापकमन्तरङ्गबलीयस्त्वस्य ।

१० प्रयोजनं पूर्वसवर्णपूर्वत्वताहिलोपटेनङेर्यङिसिन्ङिणलैत्वमन्तरङ्गं बहिरङ्गलक्षणाद्वर्णविकारात् ।

एङः पदान्तादति ॥ १०७ ॥

ङसिङसोश्च ॥ १०८ ॥

ऋत उत् ॥ १०९ ॥

ख्यत्यात्परस्य ॥ ११० ॥

अतो रोरप्लुतादप्लुते ॥ १११ ॥

१ अप्लुतादप्लुतवचनेऽकारहशोः समानपदे प्रतिषेधः ।

२ न वा बहिरङ्गलक्षणत्वात् ।

हशि च ॥ ११२ ॥

[4]नान्तःपादमव्यपरे ॥ ११३ ॥

१ नान्तःपादमिति सर्वप्रतिषेधश्चेदतिप्रसङ्गः ।

२ अकाराश्रयमिति चेदुत्त्ववचनम् ।

३ अयवोः प्रतिषेधश्च ।

४ एङ्प्रकरणात्सिद्धमिति चेदुत्त्वप्रतिषेधः ।

५ पुनरेङ्ग्रहणात्सिद्धम् ।

अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च ॥ ११४ ॥

यजुष्युरः ॥ ११५ ॥

आपो जुषाणो वृष्णो वर्षिष्ठे ऽम्बेअम्बाले ऽम्बिकेपूर्वे ॥ ११६ ॥

अङ्ग इत्यादौ च ॥ ११७ ॥

अनुदात्ते च कुधपरे ॥ ११८ ॥

अवपथासि च ॥ ११९ ॥

सर्वत्र विभाषा गोः ॥ १२० ॥

अवङ् स्फोटायनस्य ॥ १२१ ॥

१ गोरग्वचनं गवाग्रे स्वरसिध्यर्थम् ।

२ अवङादेशे हि स्वरदोषः ।

---

१ प. पुस्तके इतः परमधिकम् । नत्वं पुंसां बहुत्वे चेत्पुंशब्दादिष्यते स्त्रियाम् । नपुंसके तथैवेदं स्त्रीशब्दाच्च प्रसज्यते । पुंशब्दादिति चेदिष्टं स्थूरापत्यं न सिध्यति । कुण्डिन्या अररकायाः पुंप्राधान्यात्प्रसिध्यति । पुंप्राधान्येत एव स्युर्ये दोषाः पूर्वचोदिताः । तस्मादर्थे भवेन्नत्वं वभ्रिकादिषु युक्तवत् । २ प. पुस्तके इतः परमधिकम् । वा छन्दसीत्येव । ३ प. पुस्तके पर° इति नास्ति । ४ वै. का. वा. प्र. क. नि. पुस्तकेषु प्रकृत्यान्तः° इति ।

इन्द्रे च[1] ॥ १२२ ॥

प्लुतप्रगृह्या अचि नित्यम्[2] ॥ १२३ ॥

१ प्लुतप्रगृह्येष्वग्रहणमनर्थकमधिकारात्-सिद्धम् ।

२ तत्तु तस्मिन्प्रकृतिभावार्थम् ।

३ प्लुतप्रकृतिभाववचनं तु ज्ञापकमेकादेशात्प्लुतो विप्रतिषेधेनेति ।

४ एकादशाप्लुतो विप्रतिषेधेनेति चेच्छाले-न्द्रेऽतिप्रसङ्गः ।

५ न वा बहिरङ्गलक्षणत्वात् ।

आङो ऽनुनासिकश्छन्दसि ॥ १२४ ॥

१ आङोऽनर्थकस्य ।

इको ऽसवर्णे शाकल्यस्य ह्रस्वश्च ॥ १२५ ॥

१ सिन्नित्यसमासयोः शाकलप्रतिषेधः ।

२ ईषा अक्षादिषु च्छन्दसि प्रकृतिभाव-मात्रम्[3] ।

ऋत्यकः ॥ १२६ ॥

१ ऋत्यकः सवर्णार्थम् ।

२ अनिगन्तार्थं च ।

३ ऋति ह्रस्वादुपसर्गाद्वृद्धिर्विप्रतिषेधेन ।

अप्लुतवदुपस्थिते ॥ १२७ ॥

१ वद्वचनं प्लुतकार्यप्रतिषेधार्थम् ।

२ प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेध-प्रसङ्गोऽन्येन विहितत्वात् ।

ई३ चाक्रवर्मणस्य ॥ १२८ ॥

१ ई३चाक्रवर्मणस्येत्यनुपस्थितार्थम् ।

दिव उत् ॥ १२९ ॥

एतत्तदोः सुलोपो ऽकोरनञ्समासे हलि ॥ १३० ॥

स्यश्छन्दसि बहुलम् ॥ १३१ ॥

सो ऽचि लोपे चेत्पादपूरणम् ॥ १३२ ॥

[[4]सुट्कात्पूर्वः]

(अड्भ्याव्यवायेऽपि)

१ सुटि कात्पूर्ववचनमककारादौ कात्पूर्वार्थमिति चेदन्तरेणापि तत्सिद्धम्[5] ।

२ द्विर्वचनात्सुड्विप्रतिषेधेनेति चेत् द्विर्भूते शब्दान्तरभावात्पुनःप्रसङ्गः ।

३ द्विर्भूते शब्दान्तरभावात्पुनःप्रसङ्ग इति चेद्द्विर्वचनम् ।

४ तथा चानवस्था ।

५ अड्व्यवाय उपसंख्यानम् ।

६ अभ्यासव्यवाये च ।

७ अविप्रतिषेधो वा बहिरङ्गलक्षणत्वात् ।

८ उपदेशिवद्वचनं च ।

९ लिटिगुणचङिदीर्घप्रतिषेधार्थम् ।

१० कात्पूर्वान्त इति चेद्द्विविधि प्रतिषेधः[6] ।

---

१ वै. का. क. प्र. पुस्तकेष्वत्र नित्यमित्यधिकम् । प. पुस्तके इतः परमधिकम् । इन्द्रादाविति वक्तव्यम् । २ वै. का. क. प्र. पुस्तकेष्वत्र नित्यमिति नास्ति । ३ प. पुस्तके °मात्रमित्यस्य स्थाने °वचन-मिति पाठः । ४ इदं भाष्ये खण्डितं सूत्रम् । प. पुस्तके इतः परमधिकम् । सुटि कात्पूर्ववचनमककारादौ कात्पूर्वार्थम् । अडभ्यासव्ययायेऽपीति विकृतवार्तिकम् । तदत्र सूत्रे भाष्ये 'अड्व्यवाय उपसंख्यानम् । अभ्यास-व्यवाये च' इति वार्तिकयोरुपलभ्यते । अस्माभिर्भाष्यानुसारं तद्द्वयं वार्तिकपाठे संगृहीतम् । परं वै. का. पुस्तकयोः सूत्रत्वेन गृहीतम् । ६ प. पुस्तके इतः परमधिकम् । द्विर्वचनात् सुड्विप्रतिषेधेन ।

११ परादाविडुणप्रसङ्गः ।

१२ अभक्ते स्वरः ।

संपर्युपेभ्यः करोतौ भूषणे ॥ १३३ ॥

समवाये च ॥ १३४ ॥

उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ॥ १३५ ॥

किरतौ लवने ॥ १३६ ॥

हिंसायां प्रतेश्च ॥ १३७ ॥

अपाच्चतुष्पाच्छकुनिष्वालेखने ॥ १३८ ॥

१ किरतेर्हर्षजीविकाकुलायकरणेषु ।

कुस्तुम्बुरूणि जातौ ॥ १३९ ॥

अपरस्पराः क्रियासातत्ये ॥ १४० ॥

१ समो हिततततयोर्वा लोपः ।

२ सम्तुमुनोः कामे ।

३ अवश्यमः कृत्ये ।

गोष्पदं सेवितासेवितप्रमाणेषु ॥ १४१ ॥

आस्पदं प्रतिष्ठायाम् ॥ १४२ ॥

आश्चर्यमनित्ये ॥ १४३ ॥

१ आश्चर्यमद्भुते ।

वर्चस्के ऽवस्करः ॥ १४४ ॥

अपस्करो रथाङ्गम् ॥ १४५ ॥

विष्किरः शकुनौ वा ॥ १४६ ॥[2]

१ विष्किरः शकुनौ विकिरो वा ।

ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ॥ १४७ ॥

प्रतिष्कशश्च कशेः ॥ १४८ ॥

प्रस्कण्वहरिश्चन्द्रावृषी ॥ १४९ ॥

मस्करमस्करिणौ वेणुपरिव्राजकयोः ॥ १५० ॥

कास्तीराजस्तुन्दे नगरे ॥ १५१ ॥

कारस्करो वृक्षः ॥ १५२ ॥

पारस्करप्रभृतीनि च संज्ञायाम्[3] ॥ १५३ ॥

अनुदात्तं पदमेकवर्जम्[4] ॥ १५४ ॥

१ अनुदात्ते विप्रतिषेधानुपपत्तिरेकास्मिन्युगपत्संभवात् ।

२ सिद्धं तु एकाननुदात्तत्वात् ।

३ एकवर्जमिति चाप्रसिद्धिः संदेहात् ।

४ सिद्धं तु यस्मिन्ननुदात्त उदात्तवचनानर्थक्यं तद्वर्जम् ।

५ प्रकृतिप्रत्यययोः स्वरस्य सावकाशत्वादप्रसिद्धिः ।

६ विप्रतिषेधात्प्रत्ययस्वर इति चेत्काम्यायादिषु चित्करणम् ।

७ प्रकृतिस्वरे प्रत्ययस्वराभावः ।

८ सिद्धं तु प्रकृतिस्वरबलीयस्त्वात्प्रत्ययस्वरभावः ।

९ संतिशिष्टस्वरबलीयस्त्वं च ।

१० तच्चानेकप्रत्ययसमासार्थम् ।

११ स्यादिस्वराप्रसङ्गश्च तासेः परस्यानुदात्तवचनात् ।

१२ शास्त्रपरविप्रतिषेधानियमाद्वा शब्दपरविप्रतिषेधात् सिद्धम् ।

---

१ प. पुस्तके इतः परमधिकम् । मनसि च । २ बो. पुस्तके शकुनिर्वेति पाठः । वै. का. क. पुस्तकेषु विष्किरः शकुनिर्विकिरो वेति पाठः । ३ प. पुस्तके इतः परमधिकम् । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट्तलोपश्च । प्रायस्य चित्तिचित्तयोः सुडस्कारो वा । ४ प. पुस्तके इतः परमधिकं वार्तिकत्वेन । आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः । यौगपद्यं तर्वे सिद्धं पर्यायो रिक्तशासनात् । उदात्ते ज्ञापकं त्वेतत् स्वरितेन समाविशेत् ।

१३ विभक्तिस्वरान्नञ्स्वरो बलीयान् ।
१४ विभक्तिनिमित्तस्वराच्च ।
१५ यच्चोपपदं कृति नञ् ।
१६ सहनिर्दिष्टस्य च ।

कर्षात्वतो घञो ऽन्त उदात्तः ॥१५५॥

उञ्छादीनां च ॥१५६॥

अनुदात्तस्य च यत्रोदात्तलोपः ॥१५७॥

१ उदात्तलोपे स्वरितोदात्तयोरभावादनुदात्तग्रहणानर्थक्यम् ।
२ अन्त इति चेच्श्नम्क्सयुष्मदस्मदिदंकिंलोपेषु स्वरः ।
३ आदिरिति चेदिन्धीत द्व्यमित्यन्तः ।
४ आदौ सिद्धम् ।
५ विदीन्धिखिदिभ्यश्च लसार्वधातुकानुदात्तप्रतिषेधाल्लिङि सिद्धम् ।
६ अयचि चित्करणात् ।

धातोः ॥ १५८ ॥

१ धातोरन्त इति चेदनुदात्तेचवग्रहणम् ।
२ संश्च नित् ।
३ आदावूर्णुप्रत्ययधातुष्वन्तोदात्तत्वम् ।
४ अन्तोदात्तवचनात्सिद्धम् ।
५ पिवौ निपातनात् ।

चितः ॥ १५९ ॥

१ चितः सप्रकृतेर्बह्वकजर्थम् ।

तद्धितस्य ॥ १६० ॥

कितः ॥ १६१ ॥

तिसृभ्यो जसः ॥ १६२ ॥

१ तिसृभ्यो जस्ग्रहणानर्थक्यमन्यत्राभावात् ।

चतुरः शसि ॥ १६३ ॥

१ चतुरः शसि स्त्रियामप्रतिषेध आद्युदात्तनिपातनात् ।
२ विभक्तिस्वरभावश्च हलादिग्रहणात् ।
३ आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यम् ।

सावेकाचस्तृतीयादिर्विभक्तिः ॥१६४॥

१ सावेकाच उदात्तत्वे त्वन्मदोः प्रतिषेधः ।
२ सिद्धं तु यस्मात्तृतीयादिस्तस्याभावात्सौ।
३ प्रकृतेश्चानेकाच्त्वात् ।

अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे ॥ १६५ ॥

अञ्चेश्छन्दस्यसर्वनामस्थानम् ॥ १६६ ॥

ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ॥ १६७ ॥

१ ऊठ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् ।

अष्टनो दीर्घात् ॥ १६८ ॥

१ अष्टनो दीर्घग्रहणं षट्संज्ञाज्ञापकमाकारान्तस्य नुडर्थम् ।

शतुरनुमो नद्यजादी ॥ १६९ ॥

१ नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम्।

उदात्तयणो हल्पूर्वात् ॥ १७० ॥

१ उदात्तयणि हल्ग्रहणं नकारान्तार्थम् ।
२ हल्पूर्वग्रहणानर्थक्यं च समुदायादेशत्वात् ।
३ स्वरितत्वे चावचनात् ।

नोङ्धात्वोः ॥ १७१ ॥

ह्रस्वनुड्भ्यां मतुप् ॥ १७२ ॥

१ मतुवुदात्तत्वे रेग्रहणम् ।
२ त्रिप्रतिषेधश्च ।

नामन्यतरस्याम् ॥ १७३ ॥

१ नाम्स्वरे मतौह्रस्वग्रहणम् ।

ङ्याश्छन्दसि बहुलम् ॥ १७४ ॥

षट्त्रिचतुर्भ्यो हलादिः ॥ १७५ ॥

झल्युपोत्तमम् ॥ १७६ ॥

विभाषा भाषायाम् ॥ १७७ ॥

न गोश्वन्त्साववर्णराडङ्क्रुङ्कृद्भ्यः ॥ १७८ ॥

दिवो झल् ॥ १७९ ॥

नृ चान्यतरस्याम् ॥ १८० ॥

तित् स्वरितम् ॥ १८१ ॥

१ तिति प्रत्ययग्रहणम् ।

तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः ॥ १८२ ॥

१ तास्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तासिजर्थः ।

२ चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वं विप्रतिषेधेन ।

३ मुकश्चोपसंख्यानम् ।

४ इतश्चोपसंख्यानम् ।

५ इतश्चानेकान्तत्वात् ।

६ तत्रादिप्रभृतिजुहोत्यादिभ्योऽप्रतिषेधः स्थान्यादेशाभावात् ।

७ अनुदात्तङिद्ग्रहणाद्वा ।

८ ङितोऽनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः सर्वस्योपदेशविशेषणत्वात् ।

आदिः सिचोऽन्यतरस्याम् ॥ १८३ ॥

१ सिच आद्युदात्तत्वेऽनिटः पित उपसंख्यानम् ।

स्वपादिर्हिंसामच्यनिटि ॥ १८४ ॥

१ स्वपादीनां वावचनादभ्यस्तस्वरो विप्रतिषेधेन ।

अभ्यस्तानामादिः ॥ १८५ ॥

अनुदात्ते च ॥ १८६ ॥

१ अनुदात्ते चेति बहुव्रीहिनिर्देशो लोपयणादेशार्थः ।

सर्वस्य सुपि ॥ १८७ ॥

१ सर्वस्वरोऽनच्कस्य ।

भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ॥ १८८ ॥

लिति ॥ १८९ ॥

आदिर्णमुल्यन्यतरस्याम् ॥ १९० ॥

अचः कर्तृयकि ॥ १९१ ॥

१ यकि रपर उपसंख्यानम् ।

२ उपदेशवचनात्सिद्धम् ।

३ उपदेशवचने जनादीनाम् ।

४ योगविभागात्सिद्धम् ।

थलि च सेटीडन्तो वा ॥ १९२ ॥

ञ्नित्यादिर्नित्यम् ॥ १९३ ॥

आमन्त्रितस्य च ॥ १९४ ॥

पथिमथोः सर्वनामस्थाने ॥ १९५ ॥

अन्तश्च तवै युगपत् ॥ १९६ ॥

क्षयो निवासे ॥ १९७ ॥

---

१ प. पुस्तके इतः परमधिकम् । ङितोऽनुदात्तत्वे विकरणेभ्योऽप्रतिषेधः ।

जयः करणम् ॥ १९८ ॥
वृषादीनां च ॥ १९९ ॥
संज्ञायामुपमानम् ॥ २०० ॥
 १ उपमानस्याद्युदात्तवचनं ज्ञापकमनुबन्धलक्षणे स्वरे प्रत्ययलक्षणप्रतिषेधस्य ।
निष्ठा च द्व्यजनात् ॥ २०१ ॥
 १ निष्ठायां यञि दीर्घत्वे प्रतिषेधः ।
 २ न वा बहिरङ्गलक्षणत्वात् ।
शुष्कधृष्टौ ॥ २०२ ॥
आशितः कर्ता ॥ २०३ ॥
 १ आशिते कर्तरि निपातनमुपधादीर्घत्वमाद्युदात्तत्वं च ।
रिक्ते विभाषा ॥ २०४ ॥
 १ वेणुरिक्तयोरप्राप्ते ।
जुष्टार्पिते च च्छन्दसि ॥ २०५ ॥
नित्यं मन्त्रे ॥ २०६ ॥
युष्मदस्मदोर्ङसि ॥ २०७ ॥
ङयि च ॥ २०८ ॥
यतो ऽनावः ॥ २०९ ॥
ईडवन्दवृशंसदुहां ण्यतः ॥ २१० ॥
विभाषा वेण्विन्धानयोः ॥ २११ ॥
त्यागरागहासकुहश्वठक्रथानाम्[1] । २१२ ।
उपोत्तमं रिति ॥ २१३ ॥
चङ्यन्यतरस्याम् ॥ २१४ ॥
मतोः पूर्वमात् संज्ञायां स्त्रियाम् ।२१५।
अन्तो ऽवत्याः ॥ २१६ ॥
ईवत्याः ॥ २१७ ॥
चौ ॥ २१८ ॥
 १ चौरतद्धिते ।
समासस्य ॥ २१९ ॥
 १ समासान्तोदात्तत्वे व्यञ्जनान्तेषूपसंख्यानम् ।
 २ हल्स्वरप्राप्तौ वा व्यञ्जनमविद्यमानवत् ।
 ३ प्रयोजनं लिदाद्युदात्तान्तोदात्तविधयः ।

॥ इति षष्ठाध्यायस्य प्रथमः पादः ॥

बहुव्रीहौ प्रकृत्या पूर्वपदम्[2] ॥ १ ॥
तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः ॥ २ ॥
 १ तत्पुरुषे विभक्तिप्रकृतिस्वरत्वे कर्मधारये प्रतिषेधः ।
 २ सिद्धं तु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणात् ।
 ३ अव्यये नञ्कुनिपातानाम् ।
 ४ क्त्वायां वा प्रतिषेधः ।
 ५ निपातनात्सिद्धम् ।
वर्णो वर्णेष्वनेते ॥ ३ ॥
गाधलवणयोः प्रमाणे ॥ ४ ॥
दायाद्यं दायादे ॥ ५ ॥

---

१ वो. °कुथानाम् । २ प. पुस्तके इतः परमधिकम् । बहुव्रीहिस्वरं शास्ति समासान्तविधेः सुकृत् । नञ्सुभ्यां नियमार्थं तु परस्य शिति शासनात् । क्षेपेविधिर्नञो ऽसिद्धः परस्य नियमो भवेत् । अन्तश्च वाप्रिये सिद्धः । संभवात् । प्रकृताद्विधेः । बहुव्रीहाववृते सिद्धम् । इष्टश्चावधारणम् । द्विपाद्दिष्टेर्वितस्तेश्च । उदात्ते ज्ञापकं त्वेतत् । स्वरितेन समाविशेत् ।

प्रतिबन्धि चिरकृच्छ्रयोः ॥ ६ ॥
पदे ऽपदेशे ॥ ७ ॥
निवाते वातत्राणे ॥ ८ ॥
शारदे ऽनार्तवे ॥ ९ ॥
अध्वर्युकषाययोर्जातौ ॥ १० ॥
सदृशप्रतिरूपयोः सादृश्ये ॥ ११ ॥

१ सदृशग्रहणमनर्थकं[1] तृतीयासमासवचनात् ।

२ षष्ठ्यर्थमिति चेत्तृतीयासमासवचनानर्थक्यम् ।

द्विगौ प्रमाणे ॥ १२ ॥
गन्तव्यपण्यं वाणिजे ॥ १३ ॥
मात्रोपज्ञोपक्रमच्छाये नपुंसके ॥ १४ ॥
सुखप्रिययोर्हिते ॥ १५ ॥
प्रीतौ च ॥ १६ ॥
स्वं स्वामिनि ॥ १७ ॥
पत्यावैश्वर्ये ॥ १८ ॥
न भूवाक्चिद्दिधिषु ॥ १९ ॥
वा भुवनम् ॥ २० ॥
आशङ्काबाधनेदीयस्सु संभावने ॥ २१ ॥
पूर्वे भूतपूर्वे ॥ २२ ॥
सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ॥ २३ ॥
विस्पष्टादीनि गुणवचनेषु ॥ २४ ॥
श्रज्यावमकन्पापवत्सु भावे कर्मधारये ॥ २५ ॥
कुमारश्च ॥ २६ ॥
आदिः प्रत्येनसि ॥ २७ ॥
पूगेष्वन्यतरस्याम् ॥ २८ ॥
इगन्तकालकपालभगालशरावेषु द्विगौ ॥ २९ ॥

१ इगन्तप्रकृतिस्वरत्वे यण्गुणयोरुपसंख्यानम् ।

२ न वा बहिरङ्गलक्षणत्वात् ।

बह्वन्यतरस्याम् ॥ ३० ॥
दिष्टिवितस्त्योश्च ॥ ३१ ॥
सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् ॥ ३२ ॥
परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु ॥ ३३ ॥

१ परिप्रत्युपापेभ्यो वनं समासे विप्रतिषेधेन ।

२ न वा वनस्यान्तोदात्तवचनं तदपवादनिवृत्त्यर्थम् ।

राजन्यबहुवचनद्वन्द्वे ऽन्धकवृष्णिषु ।३४
संख्या ॥ ३५ ॥
आचार्योपसर्जनश्चान्तेवासी ॥ ३६ ॥

१ आचार्योपसर्जनेऽनेकस्यापि पूर्वपदत्वात्संदेहः ।

२ लोकविज्ञानात्सिद्धम् ।

कार्तकौजपादयश्च ॥ ३७ ॥
महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ॥ ३८ ॥
क्षुल्लकश्च वैश्वदेवे ॥ ३९ ॥
उष्ट्रः सादिवाम्योः ॥ ४० ॥
गौः सादसादिसारथिषु ॥ ४१ ॥

---

१ प. पुस्तके °ग्रहणमिति नास्ति ।

कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढ-रूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च ॥ ४२ ॥

१ कुरुवृज्योर्गार्हपते ।

२ पण्यकम्बलः संज्ञायाम् ।

चतुर्थी तदर्थे ॥ ४३ ॥

अर्थे ॥ ४४ ॥

क्ते च ॥ ४५ ॥

कर्मधारये ऽनिष्ठा ॥ ४६ ॥

अहीने द्वितीया ॥ ४७ ॥

१ अहीने द्वितीयानुपसर्गे ।

तृतीया कर्मणि ॥ ४८ ॥

गतिरनन्तरः ॥ ४९ ॥

१ गतेरनन्तरग्रहणमनर्थकं गतिर्गतावनुदात्तवचनात् ।

२ तत्र यस्याप्रकृतिस्वरत्वं तस्मादन्तोदात्तप्रसङ्गः ।

३ प्रकृतिस्वरवचनाद्व्यनन्तोदात्तत्वम् ।

४ प्रकृतिस्वरवचनं किमर्थमिति चेदेकगत्यर्थम् ।

५ अपूर्वपदार्थमिति चेत्कारकेऽतिप्रसङ्गः ।

६ सिद्धं तु गतेरन्तोदात्ताप्रसङ्गात्[1] ।

तादौ च निति कृत्यतौ ॥ ५० ॥

१ तादौ निति कृद्ग्रहणानर्थक्यम् ।

२ कृदुपदेशे वा ताद्यर्थमिडर्थम् ।

तवै चान्तश्च युगपत् ॥ ५१ ॥

अनिगन्तो ऽञ्चतौ वप्रत्यये ॥ ५२ ॥

१ अनिगन्तप्रकृतिस्वरत्वे यणादेशे प्रकृतिस्वरभावप्रसङ्गः ।

२ अनिगन्तवचनं किमर्थमिति चेद्यणादिष्टार्थम् ।

३ उक्तं वा ।

४ चोरनिगन्तोऽञ्चतौ वप्रत्यये ।

५ न वा चुस्वरस्य पूर्वपदप्रकृतिस्वरभाविनि प्रतिषेधादितरथा हि सर्वापवादः ।

६ विभक्तीषत्स्वरात्कृत्स्वरः ।

७ चित्स्वराद्धारिस्वरः ।

८ कृत्स्वराच्च ।

९ न वा हरणप्रतिषेधो ज्ञापकः कृत्स्वराबाधकत्वस्य ।

१० युक्तस्वरश्च ।

न्यधी च ॥ ५३ ॥

ईषदन्यतरस्याम् ॥ ५४ ॥

हिरण्यपरिमाणं धने ॥ ५५ ॥

प्रथमो ऽचिरोपसंपत्तौ ॥ ५६ ॥

कतरकतमौ कर्मधारये ॥ ५७ ॥

आर्यो ब्राह्मणकुमारयोः ॥ ५८ ॥

राजा च ॥ ५९ ॥

षष्ठी प्रत्येनासि ॥ ६० ॥

क्ते नित्यार्थे ॥ ६१ ॥

ग्रामः शिल्पिनि ॥ ६२ ॥

राजा च प्रशंसायाम् ॥ ६३ ॥

आदिरुदात्तः ॥ ६४ ॥

सप्तमीहारिणौ धर्म्ये ऽहरणे ॥ ६५ ॥

युक्ते च ॥ ६६ ॥

---

१ प, पुस्तके नास्ति ।

विभाषाध्यक्षे ॥ ६७ ॥
पापं च शिल्पिनि ॥ ६८ ॥
गोत्रान्तेवासिमाणवब्राह्मणेषु क्षेपे ।६९।
अङ्गानि मैरेये ॥ ७० ॥
भक्ताख्यास्तदर्थेषु ॥ ७१ ॥
गोबिडालसिंहसैन्धवेषूपमाने ॥ ७२ ॥
अके जीविकार्थे ॥ ७३ ॥
प्राचां क्रीडायाम् ॥ ७४ ॥
अणि नियुक्ते ॥ ७५ ॥
शिल्पिनि चाकृञः ॥ ७६ ॥
संज्ञायां च ॥ ७७ ॥
गोतन्तियवं पाले ॥ ७८ ॥
णिनि ॥ ७९ ॥
उपमानं शब्दार्थप्रकृतावेव ॥ ८० ॥
युक्तारोह्यादयश्च ॥ ८१ ॥
दीर्घकाशतुषभ्राष्ट्रवटं जे ॥ ८२ ॥
१ जे दीर्घाद्बह्वचः ।
अन्त्यात्पूर्वं बह्वचः ॥ ८३ ॥
ग्रामे ऽनिवसन्तः ॥ ८४ ॥
घोषादिषु च ॥ ८५ ॥
छात्र्यादयः शालायाम् ॥ ८६ ॥
प्रस्थे ऽवृद्धमकर्क्यादीनाम् ॥ ८७ ॥
मालादीनां च ॥ ८८ ॥
अमहन्नवं नगरे ऽनुदीचाम् ॥ ८९ ॥
अर्मे चावर्णं द्व्यच्त्र्यच् ॥ ९० ॥
न भूताधिकसंजीवमद्राश्मकज्जलम् ।९१।
१ आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ।
अन्तः ॥ ९२ ॥
सर्वं गुणकार्त्स्न्ये ॥ ९३ ॥
१ गुणात्तरेण समासस्तरलोपश्च ।
संज्ञायां गिरिनिकाययोः ॥ ९४ ॥
कुमार्यां वयसि ॥ ९५ ॥
उदके ऽकेवले ॥ ९६ ॥
द्विगौ क्रतौ ॥ ९७ ॥
सभायां नपुंसके ॥ ९८ ॥
पुरे प्राचाम् ॥ ९९ ॥
अरिष्टगौडपूर्वे च ॥ १०० ॥
न हास्तिनफलकमार्देयाः ॥ १०१ ॥
कुसूलकूपकुम्भशालं बिले ॥ १०२ ॥
दिक्छब्दा ग्रामजनपदाख्यानचानराटेषु ॥ १०३ ॥
आचार्योपसर्जनश्चान्तेवासिनि ॥ १०४ ॥
उत्तरपदवृद्धौ सर्वं च ॥ १०५ ॥
बहुव्रीहौ विश्वं संज्ञायाम् ॥ १०६ ॥
१ बहुव्रीहौ विश्वस्यान्तोदात्तात्संज्ञायां मित्राजिनयोरन्तः ।
२ अन्तोदात्तप्रकरणे मरुद्वृधादीनां छन्दस्युपसंख्यानम् ।
उदराश्वेषुषु ॥ १०७ ॥
क्षेपे ॥ १०८ ॥
१ उदरादिभ्यो नञ्सुभ्याम् ।
नदी बन्धुनि ॥ १०९ ॥
निष्ठोपसर्गपूर्वमन्यतरस्याम् ॥ ११० ॥
उत्तरपदादिः ॥ १११ ॥
कर्णो वर्णलक्षणात् ॥ ११२ ॥
संज्ञौपम्ययोश्च ॥ ११३ ॥
कण्ठपृष्ठग्रीवाजङ्घं च ॥ ११४ ॥

शृङ्गमवस्थायां च ॥ ११५ ॥
नञो जरमरमित्रमृताः ॥ ११६ ॥
सोर्मनसी अलोमोषसी ॥ ११७ ॥
१ सोर्मनसोः कपि ।
क्रत्वादयश्च ॥ ११८ ॥
आद्युदात्तं द्व्यच् छन्दसि ॥ ११९ ॥
वीरवीर्यौ च ॥ १२० ॥
कूलतीरतूलमूलशालाक्षसममव्ययीभावे ॥ १२१ ॥
१ पर्यादिभ्यः कूलादीनामाद्युदात्तत्वम् ।
कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ॥ १२२ ॥
तत्पुरुषे शालायां नपुंसके ॥ १२३ ॥
कन्था च ॥ १२४ ॥
आदिश्चिहणादीनाम् ॥ १२५ ॥
चेलखेटकटुककाण्डं गर्हायाम् ॥ १२६ ॥
चीरमुपमानम् ॥ १२७ ॥
पललसूपशाकं मिश्रे ॥ १२८ ॥
कूलसूदस्थलकर्षाः संज्ञायाम् ॥ १२९ ॥
अकर्मधारये राज्यम् ॥ १३० ॥
१ चेलराज्यादिभ्योऽव्ययम् ।
वर्ग्यादयश्च ॥ १३१ ॥
पुत्रः पुम्भ्यः ॥ १३२ ॥
नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः ॥ १३३ ॥
चूर्णादीन्यप्राणिषष्ठ्याः ॥ १३४ ॥
षट् च काण्डादीनि ॥ १३५ ॥
कुण्डं वनम् ॥ १३६ ॥
१ कुण्डाद्युदात्तत्वे तत्समुदायग्रहणम् ।

प्रकृत्या भगालम् ॥ १३७ ॥
शितेर्नित्याबह्वज्बहुव्रीहावभसत् ॥ १३८ ॥
गतिकारकोपपदात्कृत् ॥ १३९ ॥
१ गत्यादिभ्यः प्रकृतिस्वरत्वे कृद्ग्रहणानर्थक्यमन्यस्योत्तरपदस्याभावात् ।
२ कृत्प्रकृतौ वा[1] गतित्वादधिकार्थं कृद्ग्रहणम् ।
उभे वनस्पत्यादिषु युगपत् ॥ १४० ॥
देवताद्वन्द्वे च ॥ १४१ ॥
नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ॥ १४२ ॥
अन्तः ॥ १४३ ॥
१ अन्तोदात्तत्वं समासस्येति चेत्कप्युपसंख्यानम् ।
२ उत्तरपदा[2]न्तोदात्तत्वे नञ्सुभ्यां समासान्तोदात्तत्वम् ।
३ न वा कपि पूर्ववचनं ज्ञापकमुत्तरपदानन्तोदात्तत्वस्य ।
४ प्रकरणाच्च समासान्तोदा[3]त्तत्वम् ।
थाथघञ्क्ताजबित्रकाणाम् ॥ १४४ ॥
सूपमानात् क्तः ॥ १४५ ॥
संज्ञायामनाचितादीनाम् ॥ १४६ ॥
प्रवृद्धादीनां च ॥ १४७ ॥
कारकाद्दत्तश्रुतयोरेवाशिषि ॥ १४८ ॥
१ कारकाद्दत्तश्रुतयोरनाशिषि प्रतिषेधः ।
२ सिद्धं तूभयनियमात् ।
इत्थंभूतेन कृतमिति च ॥ १४९ ॥
अनो भावकर्मवचनः ॥ १५० ॥

१ प. पुस्तके 'वा' पदं नास्ति । २ प. पुस्तके °पदस्या° इति पाठः । ३ प. पुस्तके समासान्तोदात्तत्वमिति ।

मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ॥ १५१ ॥
सप्तम्याः पुण्यम् ॥ १५२ ॥
ऊनार्थकलहं तृतीयायाः ॥ १५३॥
मिश्रं चानुपसर्गमसंधौ ॥ १५४ ॥
नञो गुणप्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः ॥ १५५ ॥
ययतोश्चातदर्थे ॥ १५६ ॥
अच्कावशक्तौ ॥ १५७ ॥
आक्रोशे च ॥ १५८ ॥
संज्ञायाम् ॥ १५९ ॥
कृत्योकेष्णुच्चार्वादयश्च ॥ १६० ॥
विभाषा तृन्नन्नतीक्ष्णशुचिषु ॥ १६१ ॥
बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ॥ १६२ ॥
संख्यायाः स्तनः ॥ १६३ ॥
विभाषा छन्दसि ॥ १६४ ॥
संज्ञायां मित्राजिनयोः ॥ १६५ ॥
१ ऋषिप्रतिषेधो मित्रे ।
व्यवायिनो ऽन्तरम् ॥ १६६ ॥
मुखं स्वाङ्गम् ॥ १६७ ॥
नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः ॥ १६८ ॥
निष्ठोपमानादन्यतरस्याम् ॥ १६९ ॥
जातिकालसुखादिभ्यो ऽनाच्छादनात् क्तो ऽकृतमितप्रतिपन्नाः ॥ १७० ॥
वा जाते ॥ १७१ ॥
नञ्सुभ्याम् ॥ १७२ ॥
कपि पूर्वम् ॥ १७३ ॥
ह्रस्वान्ते ऽन्त्यात्पूर्वम् ॥ १७४ ॥
बहोर्नञ्वदुत्तरपदभूम्नि ॥ १७५ ॥
१ बहोर्नञ्वदुत्तरपदाद्युदात्तार्थम् ।
न गुणादयो ऽवयवाः ॥ १७६ ॥
उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ॥ १७७ ॥
१ उपसर्गात्स्वाङ्गं ध्रुवं मुखस्यान्तोदात्तत्वात् ।
वनं समासे ॥ १७८ ॥
अन्तः ॥ १७९ ॥
अन्तश्च ॥ १८० ॥
न निविभ्याम् ॥ १८१ ॥
परेरभितोभाविमण्डलम् ॥ १८२ ॥
प्रादस्वाङ्गं संज्ञायाम् ॥ १८३ ॥
निरुदकादीनि च ॥ १८४ ॥
अभेर्मुखम् ॥ १८५ ॥
अपाच्च ॥ १८६ ॥
१ अभेर्मुखमपाच्चाध्रुवार्थम् ।
२ अबहुव्रीह्यर्थं वा ।
स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च ॥ १८७ ॥
१ स्फिगपूतग्रहणं च ।
अधेरुपरिस्थम् ॥ १८८ ॥
अनोरप्रधानकनीयसी ॥ १८९ ॥
पुरुषश्चान्वादिष्टः ॥ १९० ॥
अतेरकृत्पदे ॥ १९१ ॥
१ अतेर्धातुलोपे ।
नेरनिधाने ॥ १९२ ॥
प्रतेरंश्वादयस्तत्पुरुषे ॥ १९३ ॥
उपाद्द्व्यजजिनमगौरादयः ॥ १९४ ॥

सोरवक्षेपणे ॥ १९५ ॥

विभाषोत्पुच्छे ॥ १९६ ॥

द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ॥ १९७ ॥

१ द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणं चेन्नकारान्तस्योपसंख्यानम् ।

२ नकारान्तेऽकारान्तस्य ।

३ उदात्तलोपात्सिद्धम् ।

सक्थं चाक्रान्तात् ॥ १९८ ॥

परादिश्छन्दसि बहुलम्[1] ॥ १९९ ॥

१ अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम् ।

॥ इति षष्ठाध्यायस्य द्वितीयः पादः ॥

अलुगुत्तरपदे ॥ १ ॥

१ उत्तरपदाधिकारस्य प्रयोजनं स्तोकादिभ्योऽलुगानङिकोह्रस्वनलोपाः ।

२ एकवद्वचनमनर्थकम् ।

३ द्विबहुष्वसमासः ।

४ उक्तं[2] वा ।

५ एकवद्वचने हि गोषुचरेऽतिप्रसङ्गः ।

६ वर्षाभ्यश्च जे ।

७ अपो योनियन्मतिषु ।

८ जे चरे च ।

पञ्चम्याः स्तोकादिभ्यः ॥ २ ॥

१ पञ्चमीप्रकरणे ब्राह्मणाच्छंसिन उपसंख्यानम् ।

२ अन्यार्थे च ।

ओजःसहोऽम्भस्तमसस्तृतीयायाः ॥ ३ ॥

१ अञ्जस उपसंख्यानम् ।

२ पुंसानुजो जनुषान्धो विकृताक्ष इति च ।

मनसः संज्ञायाम् ॥ ४ ॥

आज्ञायिनि च ॥ ५ ॥

१ आत्मनश्च[3] पूरणे ।

२ अन्यार्थे च ।

वैयाकरणाख्यायां चतुर्थ्याः ॥ ६ ॥

परस्य च ॥ ७ ॥

१ आत्मनेभाषपरस्मैभाषयोरुपसंख्यानम् ।

हलदन्तात्सप्तम्याः संज्ञायाम् ॥ ८ ॥

१ हृद्द्युभ्यां ङेरुपसंख्यानम् ।

२ अन्यार्थे च ।

३ हलदन्ताधिकारे गोरुपसंख्यानम् ।

४ लुकोऽवादेशो विप्रतिषेधेनेति चेद्भूमिपाशेऽतिप्रसङ्गः ।

५ अकोऽत इति वा संव्यक्षरार्थम् ।

कारनाम्नि च प्राचां हलादौ ॥ ९ ॥

१ कारनाम्नि वावचनार्थं चेदजादावतिप्रसङ्गः ।

२ अप्राप्ते समासविधानम् ।

३ योगविभागात्सिद्धम् ।

---

१ प. पुस्तके इतः परमधिकम् । परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते । पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं स्मृतः । २ प. पुस्तके इतः परमधिकम् । एकवच्च । ३ प. पुस्तके नास्ति । ४ इदं वार्तिकं वै. का. पुस्तकयोः सूत्रत्वेन गृहीतम् । भाष्ये वार्तिकत्वेन स्पष्टमुपलम्भादस्माभिर्वार्तिकपाठे संगृहीतम् । कौमुद्यां 'आत्मनश्च' इत्येवांशः सूत्रत्वेन परिगृहीतः । सोऽपि चिन्त्यः ।

मध्याद्गुरौ ॥ १० ॥

१ गुरावन्ताच्च ।

अमूर्धमस्तकात्स्वाङ्गादकामे ॥ ११ ॥

बन्धे च विभाषा ॥ १२ ॥

तत्पुरुषे कृति बहुलम् ॥ १३ ॥

१ तत्पुरुषे कृति बहुलमकर्मधारये ।

२ लुगलुगनुक्रमणं बहुलवचनस्याकृत्स्नत्वात् ।

प्रावृट्शरत्कालदिवां जे ॥ १४ ॥

विभाषा वर्षक्षरशरवरात् ॥ १५ ॥

घकालतनेषु कालनाम्नः ॥ १६ ॥

शयवासवासिष्वकालात् ॥ १७ ॥

नेन्सिद्धबध्नातिषु च ॥ १८ ॥

स्थे च भाषायाम् ॥ १९ ॥

षष्ठ्या आक्रोशे ॥ २० ॥

१ षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूपसंख्यानम् ।

२ आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम्[1] ।

३ देवानांप्रिय इति च ।

४ शेपपुच्छलाङ्गूलेषु शुनः संज्ञायाम् ।

५ दिवश्च दासे ।

पुत्रेऽन्यतरस्याम् ॥ २१ ॥

ऋतो विद्यायोनिसंबन्धेभ्यः ॥ २२ ॥

१ विद्यायोनिसंबन्धेभ्यस्तत्पूर्वपदोत्तरपदग्रहणम् ।

विभाषा स्वसृपत्योः ॥ २३ ॥

आनङृतो द्वन्द्वे ॥ २४ ॥

१ ऋकारान्तानां द्वन्द्वे पुत्र उपसंख्यानम् ।

२ कार्यी चानिर्दिष्टः ।

३ अविशेषेण पितृपितामहादिष्वतिप्रसङ्गः ।

देवताद्वन्द्वे च ॥ २५ ॥

१ देवताद्वन्द्व उभयत्र वायोः प्रतिषेधः ।

२ ब्रह्मप्रजापत्यादीनां च ।

ईदग्नेः सोमवरुणयोः ॥ २६ ॥

इद्वृद्धौ ॥ २७ ॥

१ इद्वृद्धौ विष्णोः प्रतिषेधः ।

दिवो द्यावा ॥ २८ ॥

दिवसश्च पृथिव्याम् ॥ २९ ॥

उषासोषसः ॥ ३० ॥

मातरपितरावुदीचाम् ॥ ३१ ॥

पितरामातरा च च्छन्दसि ॥ ३२ ॥

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥ ३३ ॥

१ पुंवद्भावे स्त्रीग्रहणं प्रत्ययग्रहणं चेत्तत्र पुंवदित्युत्तरपदे तत्प्रतिषेधविज्ञानम् ।

२ प्रातिपदिकस्य च प्रत्याप्रत्तिः ।

३ स्थानिवत्प्रसङ्गश्च ।

४ वतण्ड्यादिषु पुंवद्वचनम् ।

५ स्त्रीशब्दस्य पुंशब्दातिदेश इति चेत्सर्वप्रसङ्गोऽविशेषात् ।

६ भाषितपुंस्कानुपपत्तिश्च ।

७ अर्थातिदेशे विप्रतिषेधानुपपत्तिः ।

---

[1] प. पुस्तके इतः परमधिकम् । आमुष्यकुलिकेति च वक्तव्यम् ।

८ पूरण्यां प्रधानपूरणीग्रहणम् ।

तसिलादिष्वा कृत्वसुचः ॥ ३४ ॥

१ तसिलादी त्रतसौ ।
२ तरसमपौ ।
३ चरड्जातीयरौ ।
४ कल्पब्देशीयरौ ।
५ रूपप्पाशपौ ।
६ थम्थालौ ।
७ दार्हिलौ ।
८ तिल्थ्यनौ ।
९ शसि बह्वल्पार्थस्य ।
१० त्वतलोर्गुणवचनस्य ।
११ भस्याढे तद्धिते ।
१२ ठक्छसोश्च ।

क्यङ्मानिनोश्च ॥ ३५ ॥

१ मानिन्ग्रहणमस्त्यर्थमसमानाधिकरणार्थं च ।

न कोपधायाः ॥ ३६ ॥

१ कोपधप्रतिषेधे तद्धितवुग्रहणम् ।

संज्ञापूरण्योश्च ॥ ३७ ॥

वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे ॥ ३८ ॥

स्वाङ्गाच्चेतः[1] ॥ ३९ ॥

१ स्वाङ्गाच्चेतोऽमानिनि ।

जातेश्च ॥ ४० ॥

पुंवत्कर्मधारयजातीयदेशीयेषु ॥ ४१ ॥

१ पुंवत्कर्मधारये प्रतिषिद्धार्थम् ।
२ कुक्कुट्यादीनामण्डादिषु पुंवद्वचनम् ।
३ न वास्त्रीपूर्वपदविवक्षितत्वात् ।
४ अग्नेरीत्त्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेन ।
५ पुंवद्भावाद्ध्रस्वत्वं खिद्घादिकेषु[2] ।

घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः[3] ॥ ४२ ॥

नद्याः शेषस्यान्यतरस्याम् ॥ ४३ ॥

उगितश्च ॥ ४४ ॥

आन्महतः समानाधिकरणजातीययोः[4] ॥ ४५ ॥

१ महदात्त्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्वचनं च नानाधिकरणार्थम् ।
२ अष्टनः कपाले हविषि ।
३ गवि च युक्ते ।

द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः[5] ॥ ४६ ॥

त्रेस्त्रयः ॥ ४७ ॥

विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ॥ ४८ ॥

हृदयस्य हृल्लेखयदण्लासेषु ॥ ४९ ॥

---

१ वे. का. पुस्तकयोः °च्चेतोऽमानिनीति । अत्र सूत्रे भाष्ये 'स्वाङ्गाच्चतोऽमानिनि' इति वार्तिकमुपलभ्यते तथैवास्माभिर्वार्तिकपाठे संगृहीतम् । २ प. पुस्तके °घादिषु पाठः । ३ प. पुस्तके इतः परमधिकम् । कृन्नद्याः प्रतिषेधः । ४ प. पुस्तके इतः परमधिकम् । अन्यप्रकृतिस्त्वमहान्भूतप्रकृतो महान्भवत्येव । तस्माद्‌ात्त्वं न स्यात् । पुंवत्तु कथं भवेदत्र । अमहति महान्हि वृत्तस्तद्वाची चात्र भूतशब्दोऽयम् । तस्मात्सिध्यति पुंवत् । निवर्त्यमात्त्वं तु मन्यते । यस्तु महतः प्रतिपदं समास उक्तस्तदाश्रयं ह्यात्त्वम् । कर्तव्यं मन्यते न लक्षणेन लक्षणोक्तस्त्वयम् । शेषवचनात्तु योऽसौ प्रत्यारम्भात्कृतो बहुव्रीहिः । तस्मात्सिध्यति तस्मिन् । प्रधानतो वा यतो वृत्तिः । ५ प. पुस्तके इतः परमधिकम् । प्राक्शतादिति वक्तव्यम् ।

१ यदण्ग्रहणे रूपग्रहणं लेखग्रहणात् ।

वा शोकष्यञ्रोगेषु ॥ ५० ॥

पादस्य पदाज्यातिगोपहतेषु ॥ ५१ ॥

१ पदादेशेऽन्तोदात्तनिपातनं पदोपहतार्थम् ।

२ उपदेशिवद्वचनं च स्वरसिद्ध्यर्थम् ।

पद्यत्यतदर्थे ॥ ५२ ॥

१ पद्भाव इके चरतावुपसंख्यानम् ।

हिमकाषिहतिषु च ॥ ५३ ॥

ऋचः शे ॥ ५४ ॥

वा घोषमिश्रशब्देषु ॥ ५५ ॥

उदकस्योदः संज्ञायाम् ॥ ५६ ॥

१ संज्ञायामुत्तरपदस्य च ।

पेषंवासवाहनधिषु च ॥ ५७ ॥

एकहलादौ पूरयितव्येऽन्यतरस्याम् ॥ ५८ ॥

मन्थौदनसक्तुविन्दुवज्रभारहारवीवधगाहेषु च ॥ ५९ ॥

इको ह्रस्वोऽङ्यो गालवस्य ॥ ६० ॥

१ इको ह्रस्वत्वमुत्तरपदमात्रे ।

२ सर्वान्ते हि लोकाविज्ञानम् ।

३ इयङुवङ्व्ययप्रतिषेधः ।

एक तद्धिते च ॥ ६१ ॥

ङ्यापोः संज्ञाछन्दसोर्बहुलम् ॥ ६२ ॥

त्वे च ॥ ६३ ॥

इष्टकेषीकामालानां चिततूलभारिषु ॥ ६४ ॥

खित्यनव्ययस्य ॥ ६५ ॥

१ खिति ह्रस्वाप्रसिद्धिरनजन्तत्वात् ।

२ सिद्धं तु ह्रस्वान्तस्य मुम्वचनात् ।

३ संनियोगाद्वा ।

अरुर्द्विषदजन्तस्य मुम् ॥ ६६ ॥

इच एकाचोऽम् प्रत्ययवच्च ॥ ६७ ॥

१ अमः प्रत्ययवदनुदेशे प्रयोजनमात्वपूर्वसवर्णगुणेयङुवङादेशाः ।

२ अमः प्रत्ययवदनुदेश आत्वपूर्वसवर्णाप्रसिद्धिरप्रथमात्वात् ।

३ सामान्यातिदेशे विशेषानतिदेशः ।

४ सिद्धं तु द्वितीयैकवचनवद्वचनात् ।

५ एकशेषनिर्देशाद्वा ।

वाचंयमपुरंदरौ च ॥ ६८ ॥

कारे सत्यागदस्य ॥ ६९ ॥

१ अस्तुसत्यागदस्य कारे ।

२ भक्षस्य च्छन्दसि ।

३ धेनोर्भव्यायाम् ।

४ लोकस्य पृणे ।

५ इत्येऽनभ्यासस्य ।

६ भ्राष्ट्राग्न्योरिन्धे ।

७ गिलेऽगिलस्य ।

८ उष्णभद्रयोः करणे ।

९ सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रड्वा ।

श्येनतिलस्य पाते ञे ॥ ७० ॥

रात्रेः कृति विभाषा ॥ ७१ ॥

---

१ प. पुस्तके । उत्तरपदाधिकारेप्रत्ययग्रहणे इत्यधिकम् । २ प. पुस्तके इतः परमधिकम् । निष्के चोपसंख्यानम् । ३ प. पुस्तके इतः परमधिकम् । अभ्रुकूंसादीनामिति वक्तव्यम् । ४ प. पुस्तके परमधिकम् । गिलेगिले चेति वक्तव्यम् ।

१ रात्रेरप्राप्ते ।
नलोपो नञः ॥ ७२ ॥
१ नञो नलोपेऽवक्षेपे तिङ्युपसंख्यानम् ।
तस्मान्नुडचि ॥ ७३
नभ्राण्नपान्नवेदानासत्यानमुचिनकुलन-
खनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या
॥ ७४ ॥
एकादिश्चैकस्य चादुक् ॥ ७५ ॥
नगोऽप्राणिष्वन्यतरस्याम् ॥ ७६ ॥
सहस्य सः संज्ञायाम् ॥ ७७ ॥
१ सहस्य हलोपवचनम् ।
२ सादेशे हि स्वरे दोषः ।
ग्रन्थान्ताधिके च ॥ ७८ ॥
१ ग्रन्थान्ते वचनानर्थक्यमव्ययीभावेन कृत-
त्वात् ।
द्वितीये चानुपाख्ये ॥ ७९ ॥
अव्ययीभावे चाकाले ॥ ८० ॥
वोपसर्जनस्य ॥ ८१ ॥
१ उपसर्जनस्य वावचने सर्वप्रसङ्गोऽविशे-
षात् ।
२ सिद्धं तु बहुव्रीहिनिर्देशात् ।
प्रकृत्याशिषि ॥ ८२ ॥
१ प्रकृत्याशिष्यगवादिषु ।
समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु
॥ ८३ ॥
ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूप-
स्थानवर्णवयोवचनबन्धुषु ॥ ८४ ॥
चरणे ब्रह्मचारिणि ॥ ८५ ॥
१ ब्रह्मण्युपपदे समानपूर्वे व्रते कर्मणि चरे
र्णिनिर्व्रतलोपश्च ।
तीर्थे ये ॥ ८६ ॥
विभाषोदरे ॥ ८७ ॥
दृग्दृशवतुषु ॥ ८८ ॥
१ दृग्दृशवतुषु दृक्ष उपसंख्यानम् ।
इदंकिमोरीश्की ॥ ८९ ॥
आ सर्वनाम्नः ॥ ९० ॥
विष्वग्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये । ९१
समः समि ॥ ९२ ॥
तिरसस्तिर्यलोपे ॥ ९३ ॥
सहस्य सध्रिः ॥ ९४ ॥
१ अद्रिसध्र्योरन्तोदात्तवचनं कृत्स्वरनिवृ-
त्त्यर्थम् ।
२ तत्र च्छन्दसि स्त्रियां प्रतिषेधः ।
सध मादस्थयोश्छन्दसि ॥ ९५॥
द्व्यन्तरुपसर्गेभ्योऽप ईत् ॥ ९६ ॥
१ समाप ईत्त्वप्रतिषेधः ।
ऊदनोर्देशे ॥ ९७ ॥
अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीरा
शास्थास्थितोत्सुकोतिकारकरागच्छेषु
॥ ९८ ॥
अर्थे विभाषा ॥ ९९ ॥
कोः कत् तत्पुरुषेऽचि ॥ १०० ॥
१ कद्भावे त्रावुपसंख्यानम् ।
रथवदयोश्च ॥ १०१ ॥

१ वै. का. प्र. पुस्तकेषु प्रकृत्याशिष्यगोवत्सहलेषु इति पाठः । २ प. पुस्तके °श्वतुषु पाठः । ३ नि. प्र
वा पुस्तकेषु °तावप्रत्यये इति पाठः । ४ प. पुस्तके बहुलमित्यधिकम् । ५ प. पुस्तके इतः परमधिकम्
ईत्त्वमनवर्णादिति वक्तव्यम् ।

तृणे च जातौ ॥ १०२ ॥

का पथ्यक्षयोः ॥ १०३ ॥

ईषदर्थे ॥ १०४ ॥

विभाषा पुरुषे ॥ १०५ ॥

कवं चोष्णे ॥ १०६ ॥

पथि च च्छन्दसि ॥ १०७ ॥

पृषोदरादीनि यथोपदिष्टम् ॥ १०८ ॥

१ दिक्शब्देभ्यस्तीरस्य तारभावो वा ।

२ वाचो वादे डत्वं वलभावश्चोत्तरपदस्येञि ।

३ षष उत्वं दतृदशसूत्तरपदादेः ष्टुत्वं च ।

४ धासु वा ।

५ दुरो दाशनाशदभध्येषु ।

६ स्वरो रोहतौ छन्दसि ।

संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ ॥ १०९ ॥

ढ्रलोपे पूर्वस्य दीर्घोऽणः ॥ ११० ॥

सहिवहोरोदवर्णस्य ॥ १११ ॥

साढ्यै साढ्वा साढेति निगमे ॥ ११२ ॥

संहितायाम् ॥ ११३ ॥

कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ॥ ११४ ॥

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ ११५ ॥

१ अञ्चातिनह्यादिषु क्विब्ग्रहणानर्थक्यं यस्मिन्विधिस्तदादावल्ग्रहणे ।

वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ॥ ११६ ॥

वले ॥ ११७ ॥

मतौ बह्वचो ऽनजिरादीनाम् ॥ ११८ ॥

शरादीनां च ॥ ११९ ॥

इको वहे ऽपीलोः[1] ॥ १२० ॥

उपसर्गस्य घञ्यमनुष्ये बहुलम्[2] ॥ १२१ ॥

१ सादकारयोः कृत्रिमे ।

२ प्रतिवेशादीनां विभाषा ।

इकः काशे ॥ १२२ ॥

दास्ति ॥ १२३ ॥

अष्टनः संज्ञायाम् ॥ १२४ ॥

छन्दसि च ॥ १२५ ॥

चितेः कपि ॥ १२६ ॥

विश्वस्य वसुराटोः ॥ १२७ ॥

नरे संज्ञायाम् ॥ १२८ ॥

मित्रे चर्षौ ॥ १२९ ॥

मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ॥ १३० ॥

ओषधेश्च विभक्तावप्रथमायाम् ॥ १३१ ॥

ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ॥ १३२ ॥

इकः सुञि ॥ १३३ ॥

द्व्यचो ऽतस्तिङः ॥ १३४ ॥

निपातस्य च ॥ १३५ ॥

अन्येषामपि दृश्यते ॥ १३६ ॥

चौ ॥ १३७ ॥

१ प. पुस्तके इतः परमधिकम् । अपील्वादीनामिति वक्तव्यम् । २ प. पुस्तके इतः परमधिकम् । अमनुष्यादिष्विति वक्तव्यम् ।

संप्रसारणस्य ॥ १३८ ॥

१ इको ह्रस्वात्संप्रसारणदीर्घत्वं विप्रतिषेधेन ।

॥ इति षष्ठाध्यायस्य तृतीयः पादः ॥

अङ्गस्य ॥ १ ॥

१ अङ्गस्येति स्थानषष्ठी चेत्पञ्चम्यन्तस्य चाधिकारः ।

२ अवयवषष्ठ्यादीनां चाप्रसिद्धिः ।

३ सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावात् ।

४ संबन्धषष्ठीनिर्देशश्च ।

५ अङ्गाधिकारस्य प्रयोजनं संप्रसारणदीर्घत्वे ।

६ नाम्सनोश्च ।

७ लिङ्गयेत्वे ।

८ अतो भिस ऐस्त्वे ।

९ लुङादिष्वडाटौ ।

१० इयङुवङ्युष्मदस्मत्तातङामिनुडानेमुक्हस्वयिदीर्घमितत्वानि ।

११ अर्थवद्ग्रहणप्रत्ययग्रहणाभ्यां सिद्धम् ।

हलः ॥ २ ॥

नामि[2] ॥ ३ ॥

न तिसृचतसृ ॥ ४ ॥

छन्दस्युभयथा ॥ ५ ॥

नृ च ॥ ६ ॥

नोपधायाः ॥ ७ ॥

सर्वनामस्थाने चासंबुद्धौ ॥ ८ ॥

वा षपूर्वस्य निगमे ॥ ९ ॥

सान्तमहतः संयोगस्य ॥ १० ॥

अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् ॥ ११ ॥

इन्हन्पूषार्यम्णां शौ ॥ १२ ॥

सौ च ॥ १३ ॥

१ हनः क्वावुपधादीर्घत्वप्रसङ्गः[3] ।

२ नियमवचनात्सिद्धमिति चेत्सर्वनामस्थानप्रकरणे नियमवचनादन्यत्रानियमः ।

अत्वसन्तस्य चाधातोः ॥ १४ ॥

१ अत्वसन्तस्य दीर्घत्वे पित उपसंख्यानम् ।

अनुनासिकस्य क्विझलोः क्ङिति ॥ १५ ॥

अज्झनगमां सनि ॥ १६ ॥

१ गमेर्दीर्घत्व इङ्ग्रहणम् ।

२ अग्रहणे ह्यनादेशस्यापि दीर्घप्रसङ्गः ।

---

१ प. पुस्तके इतः परमधिकम् । अण्प्रकरणादृकारस्याप्राप्तिः । इग्ग्रहणस्य चाणिवशेषणत्वात् । २ प. पुस्तके इतः परमधिकम् । नामि दीर्घ आमि चेत्स्यात् कृते दीर्घे न नुड् भवेत् । वचनाद्यत्र तन्नास्ति । नोपधायाश्च चर्मणाम् । ३ प. पुस्तके इतः परमाधिकम् । नियमवचनात्सिद्धम् । ४ प. पुस्तके इतः परमधिकम् । दीर्घविधिर्य इहेन्प्रभृतीनां तं विनियम्य सुटीति सुविद्वान् । शौ नियमं पुनरेव विदध्यात् । भ्रूणहनीति तथास्य न दूष्येत् । शास्मि निवर्त्य सुटीत्यविशेषे शौ नियमं कुरु वाप्यसमीक्ष्य । दीर्घविधेरुपधानियमान्मे हन्त यि दीर्घविधौ च न दोषः । सुट्यपि वा प्रकृतेऽनवकाशः शौ नियमोऽप्रकृतप्रतिषेधे । यस्य हि शौ नियमः सुटि नैतत्तेन न तत्र भवेद्विनियम्यम् ।

३ न वा छन्दस्यनादेशस्यापि दीर्घत्वदर्शनादिङ्ग्रहणानर्थक्यम् ।

४ सनि दीर्घ उपधाधिकारश्चेद्व्यञ्जनप्रतिषेधः ।

५ अनधिकार उक्तम्[1] ।

तनोतेर्विभाषा ॥ १७ ॥

क्रमश्च क्त्वि ॥ १८ ॥

च्छ्वोः शूडनुनासिके च ॥ १९ ॥

१ शूट्त्वे क्विदधिकारश्चेच्छः षत्वम् ।

२ तुक्प्रसङ्गश्च[2] ।

ज्वरत्वरस्रिव्यविमवामुपधायाश्च ॥ २० ॥

राल्लोपः ॥ २१ ॥

असिद्धवदत्रा भात् ॥ २२ ॥

१ असिद्धवचन उक्तम्[3] ।

२ अत्रग्रहणं विषयार्थम् ।

३ प्रयोजनं शैत्वं धित्वे ।

४ हिलोप उत्त्वे ।

५ तास्तिलोपेण्यणादेशा अडाड्विधौ ।

६ अनुनासिकलोपो हिलोपाल्लोपयोर्जभावश्च ।

७ संप्रसारणमवर्णलोपे ।

८ रेभाव आल्लोपे[4] ।

९ सिद्धं वसुसंप्रसारणमज्विधौ[5] ।

१० बहिरङ्गलक्षणत्वादसिद्धत्वाच्च ।

११ आत्त्वं[6] यलोपाल्लोपयोः पशुषो न वाजान् चाखायिता चाखायितुम् ।

१२ समानाश्रयवचनात्सिद्धम् ।

१३ ह्रस्वयलोपाल्लोपाश्चायादेशे ल्यपि ।

१४ वुग्युटावुवङ्यणोः ।

१५ प्राग्भादिति चेच्छुनामघोनाभूगुणेषूपसंख्यानम् ।

१६ आ भादिति चेद्वसुसंप्रसारणयलोपप्रस्थादीनां[7] प्रतिषेधः ।

श्नान्नलोपः ॥ २३ ॥

अनिदितां हल उपधायाः क्ङिति ॥ २४ ॥

१ अनिदितां नलोपे लङ्गिकम्प्योरुपतापशरीरविकारयोरुपसंख्यानम् ।

२ बृंहेरच्यनिटि ।

३ रञ्जेर्णौ मृगरमणे ।

४ घिनुणि[8] निपातनात्सिद्धम् ।

५ रजकरजनरजःसु कित्त्वात्सिद्धम्[9] ।

दंशसञ्जस्वञ्जां शपि ॥ २५ ॥

रञ्जेश्च ॥ २६ ॥

घञि च भावकरणयोः ॥ २७ ॥

स्यदो जवे ॥ २८ ॥

अवोदैधौद्मप्रश्रथहिमश्रथाः ॥ २९ ॥

नाञ्चेः पूजायाम् ॥ ३० ॥

क्त्वि स्कन्दिस्यन्दोः ॥ ३१ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । निवृत्ते दिव ऊड्भवः । तदर्थं तपरः कृतः । ३ प. पुस्तके नास्ति । ४ प. पुस्तके इतः परमधिकम् । उत्तु कृत्रः कथमोर्विनिवृत्तो । णेरपि चेटि कथं विनिवृत्तिः । अनुवतस्तव योगमिमं स्याल्लुक्च चिणो नु कथं न तरस्य । चं भगवान्कृतवांस्तु तदर्थं तेन भवेदिटि णेर्विनिवृत्तिः । म्भोरपि ये च तथाप्यनुवृत्तौ । चिण्लुकि च क्ङित एव हि लुक्स्यात् । ५ प. पुस्तके °सुम्प्रसारण° । ६ प. पुस्तके नास्ति । ७ प. पुस्तके °सुम्प्रसारण° । ८ प. पुस्तके घिनुणि च इति पाठः । ९ प. पुस्तके कित्त्वात्सिद्धमित्यस्य स्थाने उपसंख्यानमिति पाठः ।

जान्तनशां विभाषा ॥ ३२ ॥

भञ्जेश्च चिणि ॥ ३३ ॥

शास इदङ्हलोः ॥ ३४ ॥

१ शास इत्त्व आशासः क्वौ ।

शा हौ ॥ ३५ ॥

हन्तेर्जः ॥ ३६ ॥

अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ॥ ३७ ॥

१ अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च ।

२ वामः ।

वा ल्यपि ॥ ३८ ॥

न क्तिचि दीर्घश्च ॥ ३९ ॥

गमः क्वौ[1] ॥ ४० ॥

विड्वनोरनुनासिकस्यात् ॥ ४१ ॥

जनसनखनां सञ्झलोः ॥ ४२ ॥

१ सनोतेरनुनासिकलोपादात्त्वं विप्रतिषेधेन।

ये विभाषा ॥ ४३ ॥

तनोतेर्यकि ॥ ४४ ॥

सनः क्तिचि लोपश्चास्यान्यतरस्याम् ॥ ४५ ॥

आर्धधातुके[3] ॥ ४६ ॥

भ्रस्जो रोपधयो रमन्यतरस्याम् ॥ ४७ ॥

१ भ्रस्जादेशात्संप्रसारणं विप्रतिषेधेन ।

२ रसोर्वचने सिचि वृद्धेर्भ्रस्जादेशः ।

अतो लोपः ॥ ४८ ॥

१ ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम् ।

यस्य हलः ॥ ४९ ॥

१ यलोपे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधः।

२ संघातग्रहणं चेत्क्यस्य विभाषायां दोषः ।

३ आदेः परवचनात्सिद्धम् ।

क्यस्य विभाषा ॥ ५० ॥

णेरनिटि ॥ ५१ ॥

निष्ठायां सेटि[4] ॥ ५२ ॥

१ निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थमिति चेत्तत्सिद्धमनिडभावात् ।

२ एकाचो हि प्रतिषेधः ।

३ इड्भावार्थं तु तन्निमित्तत्वाल्लोपस्य ।

४ अवचने हि णिलोप इट्प्रतिषेधप्रसङ्गः ।

५ वृधिरमिशृधीनामुपसंख्यानं सार्वधातुकत्वात् ।

जनिता मन्त्रे ॥ ५३ ॥

शमिता यज्ञे ॥ ५४ ॥

अयामन्ताल्वाय्येत्न्विष्णुषु ॥ ५५ ॥

१ क्त्नाविटि णेर्गुणवचनम् ।

२ इत्नौ प्रत्ययान्तरकरणम् ।

३ अयादेशे चोपसंख्यानम् ।

ल्यपि लघुपूर्वात् ॥ ५६ ॥

१ ल्यपि लघुपूर्वस्येति चेद्व्यञ्जनान्तेषूपसंख्यानम् ।

---

१ प. पुस्तके इतः परमधिकम् । गमादीनामिति वक्तव्यम् । ऊङ् च । २ प. पुस्तके °रनुदात्त° इति पाठः । ३ प. पुस्तके इतः परमधिकम् । अतो लोपो यलोपश्च णिलोपश्च प्रयोजनम् । आल्लोप ईत्त्वमेत्वं च चिण्वद्भावश्च सीयुटि । ४ प. पुस्तके इतः परमधिकम् । निष्ठायां सेड्ग्रहणमनिटि प्रतिषेधार्थम् ।

२ अल्लोपे च गुरुपूर्वात्प्रतिषेधः ।

३ ल्यपि लघुपूर्वादिति वचनात्सिद्धम् ।

४ ह्रस्वादिषु चोक्तम् ।

विभाषापः[2] ॥ ५७ ॥

१ आपः सानुबन्धकनिर्देशादिङि सिद्धम् ।

युप्लुवोर्दीर्घश्छन्दसि ॥ ५८ ॥

क्षियः ॥ ५९ ॥

निष्ठायामण्यदर्थे ॥ ६० ॥

वाक्रोशदैन्ययोः ॥ ६१ ॥

स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च[3] ॥ ६२ ॥

१ चिण्वद्भाव उपदेशवचनमृकारगुणबलीयस्त्वात् ।

२ वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेन ।

३ हनिणिङादेशप्रतिषेधश्च ।

४ अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्धम् ।

दीङो युडचि क्ङिति ॥ ६३ ॥

आतो लोप इटि च ॥ ६४ ॥

१ इड्ग्रहणमक्ङिदर्थम् ।

२ सार्वधातुके चादीत्यार्धधातुकाधिकारादुपसंख्यानम् ।

ईद्यति ॥ ६५ ॥

घुमास्थागापाजहातिसां हलि ॥ ६६ ॥

१ ईत्त्वे वकारप्रतिषेधो घृतं घृतपावान इति दर्शनात् ।

२ धीवरी पीवरीति चोक्तम् ।

एर्लिङि ॥ ६७ ॥

वान्यस्य संयोगादेः ॥ ६८ ॥

न ल्यपि ॥ ६९ ॥

मयतेरिदन्यतरस्याम् ॥ ७० ॥

लुङ्लङ्लृङ्क्ष्वडुदात्तः ॥ ७१ ॥

आडजादीनाम् ॥ ७२ ॥

छन्दस्यपि दृश्यते ॥ ७३ ॥

न माङ्योगे[4] ॥ ७४ ॥

बहुलं छन्दस्यमाङ्योगेऽपि ॥ ७५ ॥

इरयो रे ॥ ७६ ॥

अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ ७७ ॥

१ इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम् ।

अभ्यासस्यासवर्णे ॥ ७८ ॥

स्त्रियाः ॥ ७९ ॥

वाम्शसोः ॥ ८० ॥

इणो यण् ॥ ८१ ॥

एरनेकाचोऽसंयोगपूर्वस्य ॥ ८२ ॥

१ यणादेशः स्वरपदपूर्वोपधस्य च ।

१ प. पुस्तके नास्ति । २ प पुस्तके इतः परमधिकम् । इङादेशस्य प्रतिषेधो वक्तव्यः । ३ प पुस्तके इतः परमधिकम् । वृद्धिश्चिण्वद्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति । इड्वासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वलिनिमित्तो विघाती । ४ प. पुस्तके नास्ति । ५ प. पुस्तके इतः परमधिकम् । अजादीनामटा सिद्धम् । वृद्ध्यर्थमिति चेदटः । अस्वपो हसतीत्यत्र । धातो वृद्धिमटः स्मरेत् । पररूपं गुणे नाटः । ओमाङोरुसि तत्समम् । छन्दोर्थं बहुलं दीर्घम् । इणस्त्योरन्तरङ्गतः ।

२ असंयोगपूर्वे ह्यनिष्टप्रसङ्गः ।

ओः सुपि ॥ ८३ ॥

वर्षाभ्वश्च ॥ ८४ ॥

१ वर्षाभूपुनर्भ्वश्च ।

न भूसुधियोः ॥ ८५ ॥

छन्दस्युभयथा ॥ ८६ ॥

हुश्नुवोः सार्वधातुके ॥ ८७ ॥

१ हुश्नुग्रहणानर्थक्यमन्यस्याभावात् ।

२ यङ्लुगर्थमिति चेदार्धधातुकत्वात्सिद्धम् ।

भुवो वुग्लुङ्लिटोः ॥ ८८ ॥

ऊदुपधाया गोहः ॥ ८९ ॥

१ गोहिग्रहणं विषयार्थम् ।

२ अयादेशप्रतिषेधार्थं च ।

३ ह्रस्वादेशे ह्ययादेशप्रसङ्ग ऊत्त्वस्यासिद्धत्वात् ।

दोषो णौ ॥ ९० ॥

१ दोषिग्रहणं च ।

वा चित्तविरागे ॥ ९१ ॥

मितां ह्रस्वः ॥ ९२ ॥

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ॥ ९३ ॥

१ चिण्णमुलोर्णिव्यपेतानां यङ्लोपे चान्तरङ्गलक्षणत्वात्सिद्धम् ।

खचि ह्रस्वः ॥ ९४ ॥

ह्लादो निष्ठायाम् ॥ ९५ ॥

छादेर्घेऽद्व्युपसर्गस्य ॥ ९६ ॥

इस्मन्त्रन्क्विषु च ॥ ९७ ॥

गमहनजनखनघसां लोपः क्ङित्यनङि ॥ ९८ ॥

तनिपत्योश्छन्दसि ॥ ९९ ॥

घसिभसोर्हलि ॥ १०० ॥

१ हल्ग्रहणमनर्थकमन्यत्रापि दर्शनात् ।

हुझल्भ्यो हेर्धिः ॥ १०१ ॥

१ हेर्धित्वे हलधिकारादिटोऽप्रतिषेधः ।

श्रुशृणुपृकृवृभ्यश्छन्दसि ॥ १०२ ॥

अङितश्च ॥ १०३ ॥

चिणो लुक् ॥ १०४ ॥

१ चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात् ।

२ तलोपस्य चासिद्धत्वात् ।

३ कार्यकृतत्वाद्वा ।

अतो हेः ॥ १०५ ॥

उतश्च प्रत्ययादसंयोगपूर्वात् ॥ १०६ ॥

१ उतश्च प्रत्ययाच्छन्दोवावचनम् ।

२ उत्तरार्थं च ।

लोपश्चास्यान्यतरस्यां म्वोः ॥ १०७ ॥

नित्यं करोतेः ॥ १०८ ॥

ये च ॥ १०९ ॥

---

१ प. पुस्तके नास्ति । २ प. पुस्तके इतः परमधिकम् । वर्षादकारपुनःपूर्वस्य भुव इति वक्तव्यम् । ३ प. पुस्तके इतः परमधिकम् । यङ्लुगर्थम् । ४ प. पुस्तके इतः परमधिकम् । चिण्णमुलोर्णिव्यपेतानां यङ्लोपे च । ५ प. पुस्तके इतः परमधिकम् । अद्विप्रभृत्युपसर्गस्येति वक्तव्यम् । न वा एव लोके संप्रत्ययः । ६ ब. का. म. क. वा. पुस्तकेषु चकारोऽधिकः । ७ प. पुस्तके इतः परमधिकम् । चिणो लुकि तग्रहणम् । ८ प. पुस्तके इतः परमधिकम् । स्यान्तस्य प्रतिषेधो वक्तव्यः ।

अत उत् सार्वधातुके ॥ ११० ॥

१ कृञ उत्त्व उकारान्तनिर्देशात्स्यान्तस्याप्रतिषेधः।

श्नसोरल्लोपः ॥ १११ ॥

श्नाभ्यस्तयोरातः ॥ ११२ ॥

ई हल्यघोः ॥ ११३ ॥

इद्दरिद्रस्य ॥ ११४ ॥

१ दरिद्रातेरार्धधातुके लोपः

२ सिद्धश्च प्रत्ययविधौ।

३ वाद्यतन्याम्।

भियोऽन्यतरस्याम् ॥ ११५ ॥

जहातेश्च ॥ ११६ ॥

आ च हौ ॥ ११७ ॥

लोपो यि ॥ ११८ ॥

घ्वसोरेद्धावभ्यासलोपश्च ॥ ११९ ॥

अत एकहल्मध्येऽनादेशादेर्लिटि ॥ १२० ॥

१ णकारषकारादेशादेरेत्त्ववचनं लिटि।

२ फलिभजिग्रहणं तु ज्ञापकमभ्यासादेशसिद्धत्वस्य।

३ प्रथमतृतीयादीनामादेशादित्वादेत्त्वाभावः।

४ न वा शसिदद्योः प्रतिषेधो ज्ञापको रूपाभेद एत्वविज्ञानस्य।

५ दम्भ एत्वं नलोपस्यासिद्धत्वात्।

थलि च सेटि ॥ १२१ ॥

१ थल्ग्रहणमक्किदर्थम्।

तॄफलभजत्रपश्च ॥ १२२ ॥

राधो हिंसायाम् ॥ १२३ ॥

१ राधादिषु स्थानिनिर्देशः।

वा जॄभ्रमुत्रसाम् ॥ १२४ ॥

फणां च सप्तानाम् ॥ १२५ ॥

न शसददवादिगुणानाम् ॥ १२६ ॥

अर्वणस्त्रसावनञः ॥ १२७ ॥

मघवा बहुलम् ॥ १२८ ॥

भस्य ॥ १२९ ॥

पादः पत् ॥ १३० ॥

१ पाद उपधाह्रस्वत्वम्।

२ आदेशे हि सर्वादेशप्रसङ्गः।

३ न वा निर्दिश्यमानस्यादेशत्वात्।

४ प्रयोजनं सुप्तिङादेशे।

५ ल्यब्भावे च।

६ त्रिचतुर्युष्मदस्मत्यदादिविकारेषु च।

७ उदः पूर्वत्वे।

वसोः संप्रसारणम् ॥ १३१ ॥

वाह ऊठ् ॥ १३२ ॥

१ वाह ऊठ्वचनानर्थक्यं संप्रसारणेन कृतत्वात्।

---

१ प. पुस्तके इतः परमधिकम्। अनुप्रयोगे तु भुवास्त्यवाधनं स्मरन्ति कर्तुर्वचनान्मनीषिणः लोपे द्विर्वचनासिद्धिः। स्थानिवदिति चेत्कृते भवेद्द्वित्वे। नैवं सिध्यति कस्मात्प्रत्ययङ्गत्वाद्ध्वोऽद्धि पररूपम्। तस्मिंश्च कृते लोपः। दीर्घत्वं वाधकं भवेत्तत्र। २ प. पुस्तके षकारणकारा॰ इति पाठः। ३ प. पुस्तके इतः परमधिकम्। नशिमन्योरलिट्येत्त्वम्। छन्दस्यमिपचोरपि। अनेशं मेनकेत्येतद्व्येमानं लिङि पेचिरन्। यजायेजे वपावेपे दम्भ एत्त्वमलक्षणम्। श्नसोरत्त्वे तकारेण ज्ञाप्यते त्वेत्त्वशासनम्। ४ प. पुस्तके इतः परमधिकम्। अर्वणस्तृ मघोनश्च न शिष्यं छान्दसं हि तत्। मतुब्वन्योर्विधानाच्च छन्दस्युभयदर्शनात्।

२ गुणः प्रत्ययलक्षणत्वात्।

३ एज्ग्रहणाद्वृद्धिः।

श्वयुवमघोनामतद्धिते ॥ १३३ ॥

१ श्वादीनां प्रसारणे नकारान्तग्रहणमनकारान्तप्रतिषेधार्थम्।

२ उक्तं वा।

अल्लोपोऽनः ॥ १३४ ॥

षपूर्वहन्धृतराज्ञामणि ॥ १३५ ॥

१ षपूर्वादीनां पुनर्वचनमल्लोपार्थम्।

२ अवधारणे ह्यन्यत्र प्रकृतिभाव उपधालोपप्रसङ्गः।

विभाषा ङिश्योः ॥ १३६ ॥

न संयोगाद्वमन्तात् ॥ १३७ ॥

अचः ॥ १३८ ॥

उद ईत् ॥ १३९ ॥

आतो धातोः ॥ १४० ॥

१ आतोऽनापः।

मन्त्रेष्वाङ्यादेरात्मनः ॥ १४१ ॥

१ मन्त्रेष्वात्मनः प्रत्ययमात्रप्रसङ्गः[1]।

२ आदिग्रहणानर्थक्यं चाकारप्रकरणात्।

ति विंशतेर्डिति ॥ १४२ ॥

टेः[2] ॥ १४३ ॥

१ डित्यभस्याप्यनुबन्धकरणसामर्थ्यात्।

नस्तद्धिते ॥ १४४ ॥

१ नकारान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानम्।

२ चर्मणः कोशे।

३ अश्मनो विकारे।

४ शुनः संकोचे।

५ अव्ययानां च सायंप्रातिकाद्यर्थम्।

अह्नष्टखोरेव ॥ १४५ ॥

ओर्गुणः ॥ १४६ ॥

ढे लोपोऽकद्र्वाः ॥ १४७ ॥

यस्येति च ॥ १४८ ॥

१ यस्येत्यादौ श्यां प्रतिषेधः।

२ इयङुवङ्भ्यां लोपो विप्रतिषेधेन।

३ गुणवृद्धी च।

४ न वेयङुवङादेशस्यान्यविषये वचनात्।

५ तस्मात्तत्र गुणवृद्धिविषये प्रतिषेधः।

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ॥ १४९ ॥

१ सूर्यादीनामणन्तेऽप्रसिद्धिरङ्गान्यत्वात्।

२ सिद्धं तु स्थानिवत्प्रतिषेधात्।

३ उपधाग्रहणानर्थक्यं च।

४ विषयपरिगणनं च।

५ सूर्यमत्स्ययोर्ङ्याम्।

६ सूर्यागस्त्ययोश्छे च।

७ तिष्यपुष्ययोर्नक्षत्राणि।

८ अन्तिकस्य तसि कादिलोप आद्युदात्तत्वं च।

९ तमे तादेश्च[3]।

१–२ प. पुस्तके नास्ति। ३ प. पुस्तके इतः परमधिकम्। छान्दसत्वात्सिद्धम्। ४ प. पुस्तके इतः परमधिकम्। अभस्योपसंख्यानम्। ५ प. पुस्तके इतः परमधिकम्। तसीत्येव न वक्तव्यो दृष्टो दाशतयेऽपि हि। घो लोपोऽन्तिषादत्यत्र तथाग्नौ येऽन्त्यथर्वसु।

हलस्तद्धितस्य ॥ १५० ॥

आपत्यस्य च तद्धिते ऽनाति ॥ १५१ ॥

क्यच्व्योश्च ॥ १५२ ॥

बिल्वकादिभ्यश्छस्य लुक् ॥ १५३ ॥

तुरिष्ठेमेयस्सु ॥ १५४ ॥

१ तुः सर्वलोपविज्ञानमन्त्यस्य वचनानर्थक्यात् ।

टेः ॥ १५५ ॥

१ णाविष्ठवत्प्रातिपदिकस्य ।

२ पुंवद्भावरभावटिलोपयणादिपरार्थम्[1] ।

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः ॥ १५६ ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः ॥ १५७ ॥

बहोर्लोपो भू च बहोः ॥ १५८ ॥

इष्ठस्य यिट् च ॥ १५९ ॥

ज्यादादीयसः ॥ १६० ॥

र ऋतो हलादेर्लघोः ॥ १६१ ॥

विभाषर्जोश्छन्दसि ॥ १६२ ॥

प्रकृत्यैकाच् ॥ १६३ ॥

१ प्रकृत्यैकाजिष्ठेमेयःसु चेदेकाच उच्चारणसामर्थ्यादवचनात्प्रकृति भावः ।

२ विन्मतोस्तु लुगर्थम् ।

३ प्रकृत्याके राजन्यमनुष्ययुवनः ।

इनण्यनपत्ये ॥ १६४ ॥

गाथिविदथिकेशिगणिपणिनश्च ॥ १६५ ॥

संयोगादिश्च ॥ १६६ ॥

अन् ॥ १६७ ॥

ये चाभावकर्मणोः ॥ १६८ ॥

आत्माध्वानौ खे ॥ १६९ ॥

न मपूर्वो ऽपत्ये ऽवर्मणः ॥ १७० ।

१ मपूर्वप्रतिषेधे वा हितनाम्नः ।

ब्राह्मो ऽजातौ ॥ १७१ ॥

१ ब्राह्मस्याजातौ लोपार्थं वचनम् ।

२ तत्राप्राप्तविधाने प्राप्तप्रतिषेधः ।

३ न वा पर्युदाससामर्थ्यात् ।

कार्मस्ताच्छील्ये ॥ १७२ ॥

औक्षमनपत्ये ॥ १७३ ॥

दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवासिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि ॥ १७४ ॥

१ भ्रौणहत्ये तत्वनिपातनानर्थक्यं सामान्येन कृतत्वात् ।

२ ज्ञापकं तु तद्धिते तत्वप्रतिषेधस्य ।

३ ऐक्ष्वाकस्य स्वरभेदान्निपातनं पृथक्त्वेन ।

४ एकश्रुत्या निर्देशात्सिद्धम् ।

५ मैत्रेये ढञि यादिलोपनिपातनम् ।

६ हिरण्मये यलोपवचनम् ।

७ हिरण्ययस्य च्छन्दसि मलोपवचनात्सिद्धम् ।

---

१ प. पुस्तके इतः परमधिकम् । विजयिष्ठकरिष्ठयोर्गुणदर्शनात् । २ प. पुस्तके इतः परमधिकम् । णाविष्ठवत्प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरप्रादिविन्मतोर्लुक्न्विष्यर्थम्' इति भारद्वाजीयाः । ३ प. पुस्तके इतः परमधिकम् । पृथुमृदुकृशभृशदृढपरिवृढानामिति वक्तव्यम् ।

ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्य-
यानि च्छन्दसि ॥ १७५ ॥

॥ इति षष्ठाध्यायस्य चतुर्थः पादः ॥

सप्तमोऽध्यायः ।

युवोरनाकौ ॥ १ ॥

१ युवोरनाकाविति चेद्धातुप्रतिषेधः ।
२ भुज्य्वादीनां च ।
३ अनुनासिकपरत्वात्सिद्धम् ।
४ तत्र ङीब्नुमोः प्रतिषेधः ।
५ धात्वन्तस्य च ।
६ षिट्टित्करणं तु ज्ञापकमुगित्कार्याभावस्य ।
७ न वा षित्करणं ङीष्विधानार्थम् ।
८ टित्करणमनुपसर्जनार्थम् ।
९ विप्रतिषेधात्तु टापो बलीयस्त्वम् ।
१० धात्वन्तस्य चार्थवद्ग्रहणात्[1] ।
११ नुम्विधौ झल्ग्रहणम् ।
१२ लिङ्गविशिष्टप्रतिषेधार्थम् ।
१३ न वा विभक्तौ लिङ्गविशिष्टाग्रहणात्[2] ।
१४ प्रयोजनं शुनः स्वरे ।
१५ यूनः संप्रसारणे ।
१६ उगिदचां नुम्विधौ ।
१७ अनड्डुहश्चाम्विधौ ।
१८ पथिमथोरात्त्वे ।
१९ पुंसोऽसुङ्विधौ ।
२० सख्युर्णित्त्वानङौ ।
२१ भवद्भगवदघवतामोद्धावे ।
२२ सिद्धं तु युवोरनुनासिकत्वात् ।

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥ २ ॥

१ आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्
२ न वा क्वचिच्चित्करणादुपदेशिवद्वचनानर्थक्यम् ।
३ तत्रोणादिप्रतिषेधः ।
४ धातोर्वैयङ्वचनात् ।
५ प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् ।

झो ऽन्तः ॥ ३ ॥

२ झादेशे धात्वन्तप्रतिषेधः[3] ।
२ प्रत्ययाधिकारात्सिद्धमिति चेदनादेशादेशवचनम् ।
३ असमासनिर्देशात्सिद्धम् ।
४ तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः ।
५ सिद्धमनानन्तर्यादनकारान्तेनाद्भावनिवृत्तिः ।
६ तत्र रुटि संनियोगवचनात्सिद्धम् ।

अदभ्यस्तात् ॥ ४ ॥

आत्मनेपदेष्वनतः ॥ ५ ॥

शीङो रुट् ॥ ६ ॥

---

१ प. पुस्तके चार्थवत्त्वादिति पाठः । २ प. पुस्तके °ग्रहणामिति । ३ प. पुस्तके इतः परमधिकम् । प्रत्ययाधिकारात्सिद्धम् ।

१ रुटि दृशिगुणप्रतिषेधः।

२ पूर्वान्ते शीङो गुणविधिः।

३ झादेशादाङ्लेटि।

४ न वा नित्यत्वादाटः।

५ अन्तरङ्गलक्षणत्वाच्च।

वेत्तेर्विभाषा ॥ ७ ॥

बहुलं छन्दसि ॥ ८ ॥

अतो भिस ऐस्[1] ॥ ९ ॥

बहुलं छन्दसि ॥ १० ॥

नेदमदसोरकोः ॥ ११ ॥

टाङसिङसामिनात्स्याः ॥ १२ ॥

ङेर्यः ॥ १३ ॥

सर्वनाम्नः स्मै ॥ १४ ॥

१ अश एकादिष्टात्स्मायादीनामुपसंख्यानम्।

२ न वा बहिरङ्गलक्षणत्वात्।

ङसिङ्योः स्मात्स्मिनौ ॥ १५ ॥

पूर्वादिभ्यो नवभ्यो वा ॥ १६ ॥

जसः शी ॥ १७ ॥

औङ आपः ॥ १८ ॥

नपुंसकाच्च ॥ १९ ॥

जश्शसोः शिः ॥ २० ॥

अष्टाभ्य औश्[2] ॥ २१ ॥

षड्भ्यो लुक् ॥ २२ ॥

स्वमोर्नपुंसकात् ॥ २३ ॥

१ स्वमोर्लुक् त्यदादिभ्यश्च[3]।

२ शिशीलुग्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः।

३ सिद्धं प्रकृतार्थं विशेषणत्वात्।

४ अस्थ्यादिषु शब्दग्रहणम्।

अतोऽम् ॥ २४ ॥

अद्ड् डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥

१ अद्भावे पूर्वसवर्णप्रतिषेधः।

२ सिद्धमनुनासिकोपधत्वात्।

३ टुक्करणाद्वा।

४ डित्करणाद्वा।

नेतराच्छन्दसि ॥ २६ ॥

१ इतराच्छन्दसि प्रतिषेध एकतरात्सर्वत्र।

२ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन।

युष्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥

१ ङस आदेशे शित्करणानर्थक्यमकारस्याकारवचनानर्थक्यात्।

२ अर्थवत्त्वादेशे लोपार्थम्।

३ तस्माच्छित्करणम्।

ङेप्रथमयोरम् ॥ २८ ॥

शसो न[4] ॥ २९ ॥

भ्यसोऽभ्यम् ॥ ३० ॥

पञ्चम्या अत् ॥ ३१ ॥

एकवचनस्य च ॥ ३२ ॥

---

१ प. पुस्तके इतः परमधिकम्। एत्वं भिसि परत्वाच्चेदत ऐस्क भविष्यति। कृत एत्वे भोतपूर्व्यात्। ऐस्तु नित्यस्तथा सति। २ प. पुस्तके इतः परमधिकम्। औशघो। अस्तु लुक्त्र। षड्भ्योऽप्येवं प्रसज्यते। अपवादः। यस्य विषये। चो वा तस्मादनन्तरः। आत्वं यत्र तु तत्रोत्वम्। तथा हास्य महः कृतः। ३ प. पुस्तके इतः परमधिकम्। कृते ह्रस्वे न लुम्भवेत्। ४ चोथलिंग पुस्तके नः इति पाठः।

साम आकम् ॥ ३३ ॥

१ साम्ग्रहणं यथागृहीतस्यादेशवचनात् ।

२ न वा द्विपर्यन्तानामकारवचनादामिसकाराभावः ।

३ सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् ।

४ न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम् ।

५ न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम् ।

६ तस्मात्सुट्प्रतिषेधः ।

आत औ णलः ॥ ३४ ॥

तुह्योस्तातङाशिष्यन्यतरस्याम् ॥ ३५ ॥

विदेः शतुर्वसुः ॥ ३६ ॥

१ विदेर्वसोः कित्त्वम् ।

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ३७ ॥

१ ल्यबादेश उपदेशिवद्वचनम् ।

२ अनादिष्टार्थम् ।

३ बहिरङ्गलक्षणत्वात् ।

४ स्नात्वाकालकादिषु च प्रतिषेधः ।

५ तदन्तनिर्देशात्सिद्धम् ।

६ समासनिपातनाद्वा ।

७ अनञो वा परस्य ।

क्त्वापि च्छन्दसि ॥ ३८ ॥

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ ३९ ॥

१ इयाडियाजीकाराणामुपसंख्यानम्[1][2] ।

अमो मश्[3] ॥ ४० ॥

लोपस्त आत्मनेपदेषु ॥ ४१ ॥

ध्वमो ध्वात् ॥ ४२ ॥

यजध्वैनमिति च ॥ ४३ ॥

तस्य तात् ॥ ४४ ॥

तप्तनप्तनथनाश्च ॥ ४५ ॥

इदन्तो मसि ॥ ४६

क्त्वो यक् ॥ ४७ ॥

इष्ट्वीनमिति च ॥ ४८ ॥

स्नात्व्यादयश्च ॥ ४९ ॥

आज्जसेरसुक् ॥ ५० ॥

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ५१ ॥

१ अश्ववृषयोर्मैथुनेच्छायाम् ।

२ क्षीरलवणयोर्लालसायाम्[4] ।

आमि सर्वनाम्नः सुट् ॥ ५२ ॥

त्रेस्त्रयः ॥ ५३ ॥

ह्रस्वनद्यापो नुट् ५४ ॥

षट्चतुर्भ्यश्च ॥ ५५ ॥

श्रीग्रामण्योश्छन्दसि ॥ ५६ ॥

गोः पादान्ते ॥ ५७ ॥

इदितो नुम् धातोः ॥ ५८ ॥

---

१ प. पुस्तके इतः परमधिकम् । सुपां च सुपो भवन्तीति वाच्यम् । तिङां च तिङो भवन्तीति वाच्यम् । २ प. पुस्तके इतः परमधिकम् । आङ्याजयारां चोपसंख्यानम् । ३ प. पुस्तके इतः परमधिकम् । अमो मश्च मकारस्य । वचनादन्यबाधनम् । द्विमकार ईडपृक्ते यकारादौ न दुष्यति । ४ प. पुस्तके इतः परमधिकम् । सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं दध्यस्यति मध्वस्यतीत्येवमर्थम् । सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् ।

१ नुम्विधावुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ।

२ इतरथा ह्यनकारे प्रत्ययः ।

३ तत्रायथेष्टप्रसङ्गः ।

४ धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ।

शे मुचादीनाम् ॥ ५९ ॥

१ शे तृम्पादीनाम् ।

२ लुप्तनकारत्वात् ।

मस्जिनशोर्झलि ॥ ६० ॥

रधिजभोरचि ॥ ६१ ॥

नेट्यलिटि रधेः ॥ ६२ ॥

रभेरशब्लिटोः ॥ ६३ ॥

लभेश्च ॥ ६४ ॥

आङो यि ॥ ६५ ॥

उपात्प्रशंसायाम् ॥ ६६ ॥

उपसर्गात्खल्घञोः ॥ ६७ ॥

न सुदुर्भ्यां केवलाभ्याम् ॥ ६८ ॥

१ सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ।

विभाषा चिण्णमुलोः ॥ ६९ ॥

१ चिण्णमुलोरनुपसर्गस्य ।

उगिदचां सर्वनामस्थानेऽधातोः ॥७०॥

१ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ।

युजेरसमासे ॥ ७१ ॥

नपुंसकस्य झलचः ॥ ७२ ॥

१ झलचो नुम्विधावुगित्प्रतिषेधः ।

२ विप्रतिषेधात्सिद्धम् ।

३ पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ।

४ तत्र बहूर्जि प्रतिषेधः ।

५ अन्त्यात्पूर्वं नुममेके ।

इकोऽचि विभक्तौ[1] ॥ ७३ ॥

१ इकोऽचि विभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ।

२ इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ।

३ उत्तरार्थं च ।

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥

१ पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वप्रतिषेधः ।

२ ह्रस्वाभावार्थं च ।

३ अर्थातिदेशात्सिद्धम् ।

४ तद्धितलुक्प्रतिषेधश्च ।

५ न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ।

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥७५॥

छन्दस्यपि दृश्यते ॥ ७६ ॥

ई च द्विवचने ॥ ७७ ॥

नाभ्यस्ताच्छतुः ॥ ७८ ॥

वा नपुंसकस्य ॥ ७९ ॥

आच्छीनद्योर्नुम् ॥ ८० ॥

शप्श्यनोर्नित्यम् ॥ ८१ ॥

सावनडुहः ॥ ८२ ॥

---

१ प. पुस्तके इतः परमधिकम् । इकोऽचि व्यञ्जने मा भूत् । अस्तुलोपः । स्वरः कथनम् । स्वरो पे श्रूयमाणेऽपि । लुप्ते किं न भविष्यति ।

१ अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात्।

२ न वावर्णोपधस्य नुम्वचनात्।

३ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम्।

४ यथात्त्वादिषु द्विर्वचनम्।

दृक्स्ववःस्वतवसां छन्दसि ॥ ८३ ॥

दिव औत् ॥ ८४ ॥

१ दिव औत्त्वे धातुप्रतिषेधः[1]।

२ अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः।

३ उक्तं[2] वा।

पथिमथ्यृभुक्षामात् ॥ ८५ ॥

इतोऽत् सर्वनामस्थाने ॥ ८६ ॥

१ इतोऽद्वचनम[3]नर्थकमाकारप्रकरणात्।

२ षपूर्वार्थं तु।

थो न्थः ॥ ८७ ॥

भस्य टेर्लोपः ८८ ॥

पुंसोऽसुङ् ॥ ८९ ॥

१ असुङ्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात्।

गोतो णित् ॥ ९० ॥

१ गोतः सर्वनामस्थाने णित्कार्यातिदेशः।

२ सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात्।

३ तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात्।

४ इतरथा हि संबुद्धिजसोः प्रतिषेधः।

णलुत्तमो वा ॥ ९१ ॥

सख्युरसंबुद्धौ ॥ ९२ ॥

अनङ् सौ ॥ ९३ ॥

ऋदुशनस्पुरुदंशोऽनेहसां च ॥ ९४ ॥

तृज्वत् क्रोष्टुः ॥ ९५ ॥

स्त्रियां च[4] ॥ ९६ ॥

१ तृज्वदिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्।

२ तत्र रपरवचनम्।

३ रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः।

४ सिद्धं तु रूपातिदेशात्।

५ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात्।

६ आन्तरतम्याच्च सिद्धम्।

७ तृज्वद्वचनमनर्थकं तृज्विषये तृचो मृगवाचित्वात्।

८ तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथान्यत्रापि।

९ वावचनानर्थक्यं च स्वभावसिद्धत्वात्।

१० गुणवृद्ध्यौत्त्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम्।

११ नुमचिरतृज्वद्भावेभ्यो नुट्।

१२ न वा नुड्विषये रप्रतिषेधात्।

१३ इतरथा हि सर्वापवादः।

१४ तस्मान्नुड्विषये रप्रतिषेधः।

विभाषा तृतीयादिष्वचि ॥ ९७ ॥

---

१ प. पुस्तके इतः परमधिकम्। अधात्वधिकारात्सिद्धम्। २ प. पुस्तके नास्ति। ३ प. पुस्तके 'मनर्थक' इति नास्ति। ४ प. पुस्तके इतः परमधिकम्। तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति। ईकारे तन्निमित्तः सः गौरादिषु न पठ्यते। तेनैव भावनं चेत्स्यादनिष्टोऽपि प्रसज्यते।

१३ विंशत्यादिरा नवतेः ।

१४ दुन्दुभिरक्षेषु ।

१५ नाभिरक्षत्रिये ।

१६ उभावन्यत्र पुंसि ।

१७ तलन्तः ।

१८ भूमिविद्युत्सरिल्लतावनिताभिधानानि ।

१९ यादो नपुंसकम् ।

२० भास्स्रुक्स्रग्दिगुष्णिगुपानहः ।

२१ स्थूणोर्णे नपुंसके च ।

२२ गृहशशाभ्यां क्लीबे ।

२३ प्रावृड्विप्रुड्रुट्त्विट्त्विषः ।

२४ दर्विविदिवेदिखनिशाण्यश्रिवेशिकृप्योषधिकट्यङ्गुलयः ।

२५ तिथिनाडिरुचिवीचिनालिधूलिकिकिकेलिच्छविरात्र्यादयः ।

२६ शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः ।

२७ प्रतिपदापाद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्सामिधः ।

२८ आशीर्धूर्पूर्गीर्द्वारः ।

२९ अप्सुमनस्समासिकतावर्षाणां बहुत्वं च ।

३० स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिचः ।

३१ तटिसीमासंबध्याः ।

३२ चूलिवेणिखार्यश्च ।

३३ ताराधाराज्योत्स्नादयश्च ।

३४ शलाका स्त्रियां नित्यम् ।

३५ पुमान् ।

३६ घञबन्तः ।

३७ घाजन्तश्च ।

३८ भयलिङ्गभगपदानि नपुंसके ।

---

१ न्यश्रि०

३९ नङन्तः ।

४० याच्ञा स्त्रियाम् ।

४१ क्यन्तो घुः ।

४२ इषुधिः स्त्री च ।

४३ देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि ।

४४ त्रिविष्टपत्रिभुवने नपुंसके ।

४५ द्यौः स्त्रियाम् ।

४६ इषुबाहू स्त्रियां च ।

४७ बाणकाण्डौ नपुंसके च ।

४८ नन्तः ।

४९ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि ।

५० अभ्रं नपुंसकम् ।

५१ उकारान्तः ।

५२ धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ।

५३ समासे रज्जुः पुंसि च ।

५४ श्मश्रुजानुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ।

५५ वसु चार्थवाचि ।

५६ मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च ।

५७ रुत्वन्तः ।

५८ दारुकसेरुजत्रुवस्तुमस्तूनि नपुंसके ।

५९ सक्तुर्नपुंसके च ।

६० प्राग्रश्मेरकारान्तः ।

६१ कोपधः ।

६२ चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि ।

६३ कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुल्कवर्चस्कपिनाकभाण्डककटकदण्डकपिटकतालकफलककल्कपुलाकानि नपुंसके च ।

६४ टोपधः ।

६५ किरीटमुकुटललाटवटवीटशृङ्गाटककरटलोष्टानि नपुंसके ।

६६ कुटकूटकपटकपाटकर्पटनटनिकटकीटकटानि नपुंसके च ।

६७ णोपधः ।

६८ ऋणलवणपर्णतोरणरणोष्णानि नपुंसके च ।

६९ कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च ।

७० थोपधः ।

७१ काष्ठपृष्ठरिक्थोक्थानि नपुंसके ।

७२ काष्ठा दिगर्था स्त्रियाम् ।

७३ तीर्थप्रोथयूथगाथानि नपुंसके च ।

७४ नोपधः ।

७५ जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके ।

७६ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसंमानभवनवसनसंभावनविभावनविमानानि नपुंसके च ।

७७ पोपधः ।

७८ पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके ।

७९ शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च ।

८० भोपधः ।

८१ तलभं नपुंसकम् ।

८२ जृम्भं नपुंसके च ।

८३ मोपधः ।

८४ रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके ।

८५ संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च ।

८६ योपधः ।

८७ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ।

८८ गोमयकषायमलयान्वयाव्ययानि नपुंसके च ।

८९ रोपधः ।

९० द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदरशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षेत्रक्षत्रमित्रकलत्रच्छत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशस्त्रशास्त्रवस्त्रपत्रपात्रनक्षत्राणि नपुंसके ।

९१ शुक्रमदेवतायाम् ।

९२ चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ।

९३ षोपधः ।

९४ शिरीषाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके ।

९५ यूपकरीषमिषविषवर्षाणि नपुंसके च ।

९६ सोपधः ।

९७ पनसबिसबुससाहसानि नपुंसके ।

९८ चमसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च ।

९९ कंसं चाप्राणिनि ।

१०० राशिमदिवसाभिधानानि ।

१०१ दीधितिः स्त्रियाम् ।

१०२ दिनाहनी नपुंसके ।

१०३ मानाभिधानानि ।

१०४ द्रोणाढकौ नपुंसके च ।

१०५ खारीमानिके स्त्रियाम् ।

१०६ दाराक्षतलाजासूनां बहुत्वं च ।

१०७ नाड्यपजनोपपदानि व्रणाङ्गपदानि ।

१०८ मरुद्गरुदुत्तरदृत्विजः ।

१०९ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकपिमुनयः ।

११० ध्वजगजमुञ्जपुञ्जाः ।

१११ हस्तकुन्तान्तवातव्रातदूतधूर्तसूतचूतमुहूर्ताः ।

११२ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः ।

११३ वंशांशपुरोडाशाः ।

११४ हृदकन्दकुन्दबुद्बुदशब्दाः ।

११५ अर्धपथिमथ्यृभुक्षिस्तम्बनितम्बपूगाः ।

११६ पल्लवपल्वलकफरेफकटाहानिर्व्यूहमठमणितरङ्गगन्धस्कन्धमृदङ्गसमुद्रपुङ्खाः ।

११७ सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः ।

११८ नपुंसकम् ।

११९ भावे ल्युडन्तः ।

१२० निष्ठा च ।

१२१ त्वष्यञौ तद्धितौ ।

१२२ कर्मणि च ब्राह्मणादिगुणवचनेभ्यः ।

१२३ यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि ।

१२४ द्वन्द्वैकत्वम् ।

१२५ अभाषायां हेमन्तशिशिरावहोरात्रे च ।

१२६ अनञ्कर्मधारयस्तत्पुरुषः ।

१२७ अनल्पे छाया ।

१२८ राजामनुष्यपूर्वा सभा ।

१२९ सुरासेनाच्छायाशालानिशाः स्त्रियां च ।

१३० परवत् ।

१३१ अपथपुण्याहे नपुंसके ।

१३२ संख्यापूर्वा रात्रिः ।

१३३ द्विगुः स्त्रियां च ।

१३४ इसुसन्तः ।

२३५ अर्चिः स्त्रियां च ।

१३६ छदिः स्त्रियामेव ।

१३७ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ।

१३८ सीरार्थौदनाः पुंसि ।

१३९ वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च ।

१४० अटवी स्त्रियाम् ।

१४१ लोपधः ।

१४२ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ।

१४३ शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालबालनिगलपलालबिडालखिलशूलाः पुंसि च ।

१४४ शतादिः संख्या ।

१४५ शतायुतप्रयुताः पुंसि च ।

१४६ लक्षा कोटिः स्त्रियाम् ।

१४७ सहस्रः पुंसि च ।

१४८ मन्द्व्यच्कोऽकर्तरि ।

१४९ ब्रह्मन्पुंसि च ।

१५० नामरोमणी नपुंसके ।

१५१ असन्तो द्व्यच्कः ।

१५२ अप्सराः स्त्रियाम् ।

१५३ त्रान्तः ।

१५४ यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ।

१५५ भृत्रामित्रच्छात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः । पुंसि ।

१५६ पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ।

१५७ बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि ।

१५८ पद्मकमलोत्पलानि पुंसि च ।

१५९ आहवसङ्ग्रामौ पुंसि ।

१६० आजिः स्त्रियामेव ।

१६१ फलजातिः ।

१६२ वृक्षजातिः स्त्रियामेव ।

१६३ वियज्जगत्सकृत्शकन्पृषच्छकृद्यकृदुदश्वितः ।

१६४ नवनीतावतानृतामृतनिमित्तवित्तपित्तव्रतरजतवृत्तपलितानि ।

१६५ श्राद्धकुलिशदैवपीठकुण्डाङ्कदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्ववीजानि ।

१६६ दैवं पुंसि च ।

१६७ धान्याज्यसस्यरूप्यपण्यवर्ण्यधिष्ण्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि ।

१६८ द्वन्द्ववर्हदुःखवडिशपिच्छविम्बकुटुम्बकवचकवरवृन्दारकाणि ।

१६९ अक्षमिन्द्रिये ।

१७० स्त्रीपुंसयोः ।

१७१ गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमासिमरीचयः ।

१७२ मन्युसीधुकर्कन्धुसिन्धुकण्डूरेणवः ।

१७३ गुणवचनमुकारान्तं नपुंसकं च ।

१७४ अपत्यार्थतद्धिते ।

१७५ पुंनपुंसकयोः ।

१७६ घृतभूतमुस्तक्ष्वेलितैरावतपुस्तवुस्तलोहिताः ।

१७७ शृङ्गार्धनिदाघोद्यमशल्यदृढाः ।

१७८ व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धर्चदर्भपुच्छाः ।

१७९ कबन्धौषधायुधान्ताः ।

१८० दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशाङ्कुशकाशकुशकुलिशाः ।

१८१ गृहमेहदेहपट्टपटहाष्टापदार्बुदककुदाश्च ।

१८२ अवशिष्टलिङ्गम् ।

१८३ अव्ययं कतियुष्मदस्मदः ।

१८४ ष्णान्ता संख्या ।

१८५ गुणवचनं च ।

१८६ कृत्याश्च ।

१८७ करणाधिकरणयोर्ल्युट् ।

१८८ सर्वादीनि सर्वनामानि ।

लिङ्गानुशासनं समाप्तम् ॥

शाकटायनप्रणीतः

उणादिसूत्रपाठः

१ कृवापाजिमिस्वदिसाध्यशूभ्य उण् ।

२ छन्दसीणः ।

३ दृसनिजनिचरिचटिभ्यो ञुण् ।

४ किंजरयोः श्रिणः ।

५ त्रो रश्च लः ।

६ कृके वचः कश्च ।

७ भृमृशीतृचरित्सरितनिधनिमिमास्जिभ्य उः ।

८ अणश्च ।

९ धान्ये नित् । (कटिवटिभ्यां च)

१० शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च ।

११ स्यन्देः संप्रसारणं धश्च ।

१२ उन्देरिच्चादेः ।

१३ ईषेः किच्च ।

१४ स्कन्देः सलोपश्च ।

१५ सृजेरसुम्च ।

१६ कृतेराद्यन्तविपर्ययश्च ।

१७ नावञ्चेः ।

१८ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ।

१९ वलेर्गुक्च ।

२० शः कित्सन्वच्च ।

२१ यो द्वे च ।

२२ कुर्भ्रश्च ।

२३ पृभिदिव्यधिगृधिधृषिभ्यः ।

२४ कृग्रोरुच ।

२५ अपदुःसुषु स्थः ।

२६ रपेरिच्चोपधायाः ।

२७ अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च ।

२८ प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।

२९ लङ्घिबंह्योर्नलोपश्च ।

३० ऊर्णोतेर्नुलोपश्च ।

३१ महति ह्रस्वश्च ।

३२ श्लिषेः कश्च ।

३३ आङ्परयोः खनिशृभ्यां डिच्च ।

३४ हरिमितयोर्द्रुवः ।

३५ शते च ।

३६ खरु शङ्कु पीयु नीलङ्गु लिगु ।

३७ मृगय्वादयश्च ।

३८ मन्दिवाशिमथिचतिचङ्कयङ्किभ्य उरच् ।

३९ व्यथेः संप्रसारणं किच्च ।

---

३ अ रहीत्यधिकम् । ९ अ क नास्ति । २३ अ उ. °धृपिदंशिभ्यः । २७ अ °तुग्घुग्दी° । क °पंसि° । उ. °पंशि° २९ अ लघि° । क रङ्घिलङ्घिबंहिभ्यो नलोपश्च । ३६ क °लिग्वङ्गुपङ्गुहिङ्गुशवः । ३९ अ व्यथेः संप्रसारणं धः किच्च ।

४० मुकुरदर्दुरौ ।
४१ मद्गुरादयश्च ।
४२ असेरुरन् ।
४३ मसेश्च ।
४४ शावशेराप्तौ ।
४५ अविमह्योष्टिषच् ।
४६ अमेर्दीर्घश्च ।
४७ रुहेर्वृद्धिश्च ।
४८ तवेर्णिद्वा ।
४९ नञि व्ययेः ।
५० किलेर्बुक्च ।
५१ इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच् ।
५२ अशेर्णित् ।
५४ अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः ।
५४ सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ।
५५ कमेः पश्च ।
५६ गुपादिभ्यः कित् ।
५७ मिथिलादयश्च ।
५८ पतिकठिकुठिगडिगुडिदंशिभ्यः एरक् ।
५९ कुम्बेर्नलोपश्च ।
६० शदेस्त च ।
६१ मूलेरादयः ।
६२ कबेरोतच्पश्च ।
६३ भातेर्डवतुः ।
६४ कठिचकिभ्यामोरन् ।
६५ किशोरादयश्च ।
६६ कपिगडिगण्डिकटिपटिभ्य ओलच् ।
६७ मीनातेरूरन् ।
६८ स्यन्देः संप्रसारणं च ।
६९ सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ।
७० पः किच्च ।
७१ अर्तेश्च तुः ।
७२ कमिमनिजनिगाभायाहिभ्यश्च ।
७३ चायः किः ।
७४ आप्नोतेर्ह्रस्वश्च ।
७५ वसेस्तुन् ।
७६ अगारे णिच्च ।
७७ कृञः क्तुः ।
७८ एधिवह्योश्च तुः ।

---

४० अ उ मकुर° क मकुरदुर्दुरौ च । ४१ अ क नास्ति । ५१ अ क महीत्यधिकम् । ५२ अ क अशेर्निच्च । ५४ क भडि° इत्यस्य स्थाने °भटि° इति, °चण्डि° इत्यधिकम् । ५५ अ कवेःपश्च । क कपेश्च । ५६–६३ गुपादिसूत्रादारभ्यैतत्सूत्रं यावत्सप्तसूत्राणि केषांचिदसंमतानीति उज्ज्वलदत्तः ॥ ५८ क पथिकथि° इति वर्णान्तरम् । ५९ उ. कुन्बे° । ६१ क °यश्च । ६२–६३ अ क न स्तः। ६३ उ. °तुप् ६४ अ क °मोरच् । ६६ अ गण्डि इत्यस्य स्थाने कडि इति । क °गडि° इत्यस्य स्थाने °कडि° इति । चकारो न विद्यते । ६७–६८ अ क सूत्रद्वयं न विद्यते । इतपरं 'बहुलमन्यत्रापि । इत्यधिकं सूत्रम् । ७० अ क इतः परं 'मीनातेरूरन्' इति सूत्रमधिकम् । ७१ क चकारो न विद्यते । ७२ क °पा° इत्यधिकम् । ७३ अ अस्मिन् सूत्रे चकारोऽधिकः । ७५ अ वसस्तुन् ।

७९ जीवेरातुः ।
८० आतृकन्वृद्धिश्च ।
८१ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ।
८२ मृजेर्गुणश्च ।
८३ वहो धश्च ।
८४ कषेश्छश्च ।
८५ णित्कसिपद्यर्थेः ।
८६ अणो डश्च ।
८७ नञि लम्बेर्नलोपश्च ।
८८ के श्र एरङ् चास्य ।
८९ त्रो दुट् च ।
९०- दरिद्रातेर्यालोपश्च ।
९१ नृतिशृध्योः कूः ।
९२ ऋतेरम्च ।
९३ अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः ।
९४ मृग्रोरुतिः ।
९५ ग्रो मुट् च ।
९६ हृषेरुलच् ।
९७ हृसृरुहियुषिभ्य इतिः ।
९८ ताडेर्णिलुक् च ।
९९ शमेर्ढः ।
१०० कमेरठः ।
१०१ रमेर्वृद्धिश्च ।
१०२ शमेः खः ।
१०३ कणेष्ठः ।
१०४ कलस्तृपश्च ।
१०५ शपेर्वश्च ।
१०६ वृषादिभ्यश्चित् ।
१०७ मृजेष्टिलोपश्च ।
१०८ चुपेरच्चोपधायाः ।
१०९ शाकिशम्योर्नित् ।
११० छो गुक् ह्रस्वश्च ।
१११ अमन्ताड्डः ।
११२ क्वादिभ्यः कित् ।
११३ स्थाचतिमृजेरालज्वालजालीयचः ।
११४ पतिचण्डिभ्यामालञ् ।
११५ तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् ।
११६ पतेरङ्गच्पक्षिणि ।
११७ तरत्यादिभ्यश्च ।
११८ विडादिभ्यः कित् ।
११९ सृपृणोर्वृद्धिश्च ।
१२० गन्गम्यद्योः ।
१२१ छापूखडिभ्यः कित् ।
१२२ भृञः किन्नुट् च ।
१२३ शृणातेर्ह्रस्वश्च ।
१२४ गणशकुनौ ।
१२५ मुदिग्रोर्गग्गौ ।

८२ अ क इतः परमधिकं सूत्रम् खडेश्च । उ. खडेर्डुः । इदं सूत्रं न संमतं सर्वत्रेति उज्वलदत्तः । ८३ अ उ. वहेर्धश्च । ९१ अ वृतिशृध्योः कू । ९३ उ. °दन्कू° °जम्बूकम्बू° दिधिषु । ९५ अ क गमुट् च । ९८ अ तारेर्णिलुक् च । ९९ अ शणेर्ढः । क पणेडः । १०१–१०३ अ न सन्ति । १०९ अ इतः-परमधिके सूत्रे भ्रमिमस्योरुच्चोपधायाः । कणेष्ठः । क एतस्मात् सूत्रद्वयात् 'कम्चलादयश्च' इत्यधिकम् । ११० क नास्ति । ११३ अ °लीयरः । क °लया° ११५ अ क नास्ति । ११६ अ इतः परं सर्तेर्णित् । गन्गम्यदेः । इति सूत्रद्वयमधिकम् । ११७–१२१ अ न सन्ति । १२१ क नास्ति । १२५ अ मुदिग्रोर्गद्गौ ।

१२६ अण्डन्कृसृभृवृञः ।
१२७ शृदृभसोऽदिः ।
१२८ दृणातेः पुक् ह्रस्वश्च ।
१२९ त्यजितनियजिभ्यो डित् ।
१३० एतेस्तुट् च ।
१३१ सर्तेरटिः ।
१३२ लङ्घेर्नलोपश्च ।
१३३ पारयतेरजिः ।
१३४ प्रथः कित्संप्रसारणं च ।
१३५ मियः पुक् ह्रस्वश्च ।
१३६ युष्यसिभ्यां मदिक् ।
१३७ अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदिय-
क्षिनीभ्यो मन् ।
१३८ जहातेः सन्वदालोपश्च ।
१३९ अवतेष्टिलोपश्च ।
१४० ग्रसेरा च ।
१४१ अविसिविसिशुषिभ्यः कित् ।
१४२ इषियुधीन्धिदासिश्याधूसूभ्यो मक् ।
१४३ युजिरुचितिजां कुश्च ।
१४४ हन्तेर्हि च ।
१४५ मियः षुग्वा ।
१४६ घर्मः ।
१४७ ग्रीष्मः ।
१४८ प्रथेः षिवन्संप्रसारणं च ।
१४९ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।
१५० इण्शीभ्यां वण् ।
१५१ सर्वनीघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा
अस्वतन्त्रे ।
१५२ शेवयह्वजिह्वाग्रीवाप्वामीवाः ।
१५३ कृगृशृदृभ्यो वः ।
१५४ कानिन् युवृषितक्षिराजिधन्विद्युप्रति-
दिवः ।
१५५ सप्यशूभ्यां तुट् च ।
१५६ नञि जहातेः ।
१५७ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्
न्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघ-
वन्निति ॥
इत्युणादिषु प्रथमः पादः ॥

---

१५८ कृहृभ्यामेणुः ।
१५९ हनिकुषिनीरमिकाशिभ्यः क्थन् ।
१६० अवे भृञः ।
१६१ उषिकुषिगार्तिभ्यस्थन् ।
१६२ सर्तेर्णित् ।

---

१२८ अ इतः परमधिकं सूत्रद्वयम् । तथाहि- एतेस्तुट् च । त्विपिमिपिभ्यां च । १३० अ अत्रत्यमुपरि वर्तते । १३३ अ क उ. पारेराजिः । १३४–१३६ न सन्ति । १२६ क नास्ति । १३७ अ क °वा° इति न विद्यते । १३८ क नास्ति । १४० ग्रसतेरा च । उ. °रात् । १४१° सि° न विद्यते । १४३ अ क कुत्वं चेति । १४४ उ. हनेर्हि च । १४६–१४७ क सूत्रद्वयोरैक्यम् । १५० उ.वन् । १५१ अ सर्वनिघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे इति पाठः । क- °लष्वप्रह्वेष्वा अतन्त्रे । उ. अतन्त्रे । १५२ अ क शेवायह्वा° । १५४ इतःपरं 'पञ्चेश्च' इत्यधिकं सूत्रम् । १५५ उ. नास्ति । १५६ अ नास्ति । इतःपरमाधिकं सूत्रद्वयम्- नुदंशोगुणश्च । सहेःपप् लुक् च । १६१ क °गार्तिकनिभ्य° । १६२ अ अत्रत्य-मर्तेर्णिरिति(१६५) त्स्याग्रे दृश्यते । उ. णिच्च ।

१६३ जृवृञ्भ्यामूथन् ।
१६४ पातृतुदिवचिरिचिसिचिभ्यस्थक् ।
१६५ अर्तेर्निरि ।
१६६ निशीथगोपीथावगथाः ।
१६७ गश्चोदि । २·१०
१६८ समीणः ।
१६९ तिथपृष्ठगूथयूथप्रोथाः ।
१७० स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवासिवाशिशीङ्हासिसिधिशुभिभ्यो रक् ।
१७१ चकिरम्योरुच्चोपधायाः ।
१७२ वौ कसेः ।
१७३ अमितम्योर्दीर्घश्च ।
१७४ निन्देर्नलोपश्च ।
१७५ अर्देर्दीर्घश्च ।
१७६ शुचेर्दश्च ।
१७७ दुरीणो लोपश्च । २·२०
१७८ कृतेश्छः क्रू च ।
१७९ रोदेर्णिलुक् च ।
१८० बहुलमन्यत्रापि संज्ञाछन्दसोः ।
१८१ जोरी च ।
१८२ सुसूधागृधिभ्यः क्रन् ।
१८३ शुसिचिमीनां दीर्घश्च ।
१८४ वा विन्धेः ।
१८५ वृधिवपिभ्यां रन् ।
१८६ ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्रेरामालाः ।
१८७ समि कसे उकन् । २·३०
१८८ पचिनशोर्णुकन्कनुमौ च ।
१८९ भियः क्रुकन् ।
१९० कुन्शिलिपसंज्ञयोरपूर्वस्यापि ।
१९१ रमे रश्च लो वा ।
१९२ जहातेर्द्वे च ।
१९३ ध्मो धम च ।
१९४ हनो वध च ।
१९५ बहुलमन्यत्रापि ।
१९६ कृषेर्वृद्धिश्चोदीचाम् ।
१९७ उदकं च । २·४०
१९८ वृश्चिकृषोः किकन् ।
१९९ प्राङि पणिकषः ।
२०० मुषेर्दीर्घश्च ।
२०१ स्यमेः संप्रसारणं च ।
२०२ क्रिय इकन् ।
२०३ आङि पणिपनिपतिखनिभ्यः ।
२०४ श्यास्त्याहृञविभ्य इनच् ।
२०५ वृजेः किच्च ।

---

१६९ क °कुथ° इत्याधिकम् । १७० क °वसि° इत्यस्य स्थाने °वासि° अ क इतः परं निन्देर्नलोपश्च, तमेर्डुकुच, चकिरम्योरुच्चोपधायाः, वौ कसेः, शदेरू च, स्थश्च, अमितम्योर्दीर्घश्च, शुचेर्दश्च, इति व्युत्क्रमेण सूत्राणि सन्ति । तत्र तमेर्डुक् च । शदेरू च । स्थश्च इति सूत्राणि अधिकानि । १७१ अ क न विद्यते । १८० उ. नास्ति । १८२ उ. °धाञ्गृ° । १८६ अ क °कुम्रचुम्र° °वर्णेरामालाः । १८७ अ क सामि कस उकन् । १८८ अ पचिनश्योर्णु° । १९१ अ क नास्ति । १९७ न क 'च' न विद्यते । १९८ अ क कुपीत्यधिकम् ।

२०६ अजेरज च ।

२०७ वहुलमन्यत्रापि । २·५०

२०८ द्रुदक्षिभ्यामिनन् ।

२०९ अर्तेः किदिच्च ।

२१० वेपितुह्योर्ह्रस्वश्च ।

२११ तलिपुलिभ्यां च ।

२१२ गर्वेरत उच्च ।

२१३ रुहेश्च ।

२१४ महेरिनण्च ।

२१५ क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च ।

२१६ आप्नोतेर्ह्रस्वश्च ।

२१७ परौ व्रजेः पः पदान्ते । २·६०

२१८ हुवः श्लुवच्च ।

२१९ स्रुवः कः ।

२२० चिक्च ।

२२१ तनोतेरनश्च वः ।

२२२ ग्लानुदिभ्यां डौः ।

२२३ च्विरव्ययम् ।

२२४ रातेर्डैः ।

२२५ गमेर्डोः ।

२२६ भ्रमेश्च डूः ।

२२७ दमेर्डोसिः । २·७०

२२८ पणेरिज्यादेश्च वः ।

२२९ वशेः कित् ।

२३० भृञ उच्च ।

२३१ जसिसहोरुरिन् ।

२३२ सुयुरुवृञो युच् ।

२३३ अशे रश च ।

२३४ उन्देर्नलोपश्च ।

२३५ गमेर्गश्च ।

२३६ वहुलमन्यत्रापि ।

२३७ रञ्जेः क्युन् । २·८०

२३८ भूसूधूभ्रस्जिभ्यश्छन्दसि ।

२३९ कृपृवृजिमन्दिनिधाञः क्युः ।

२४० धृषेर्धिष् च संज्ञायाम् ।

२४१ वर्तमाने पृषद्बृहन्महज्जगच्छतृवत् ।

२४२ संश्चत्तृपद्वेहत् ।

२४३ छन्दस्यसानच्छुजृभ्याम् ।

२४४ ऋञ्जिवृधिमन्दिसहिभ्यः कित् ।

२४५ अर्तेर्गुणः शुट् च ।

२४६ सम्यानच्स्तुवः ।

२४७ युधिवुधिदृशिभ्यः किच्च । २·९०

---

२०८ अ क इतः परं द्रुहेः कित् इति । २०९ अ क अर्तारिच्च । २१०-२१३ अ क न विद्यन्ते । २१५ अ क °कटप्रुज्वां- । २१७ उ. पश्च । २१८ अ द्युतिदणातेर्ह्रस्वश्च इत्यधिकम् । क द्याति० । २१९ अ क स्रुवः कन् २२२ क –डो । २२४ अ क रतिर्डैः इत्यस्य स्थाने रातेर्डैः । २२६ क भ्रमेर्डू । २२७ दमेर्डोसू । २२९ अ क वशः कित् । २३० कौमुद्यामूच्चेति पाठः । २३५ अ क न विद्यते । २३९ अ °वृजि° इत्यस्य स्थाने °व्राजि° । अ क °धाञभ्यः । २४० अ इतः परं हन्तेर्घुर च इत्यधिकम् । क इतः परं हन्तेर्घुरच् । गमेर्गग च । सूत्रद्वयमधिकम् । उ. इतः परं हन्तेर्घुरश्चेत्यधिकम् । २४१ अ उ. °वच्च । २४३ अ क °च्शवजॄ° । २४७ अ क युधि° इत्यस्य स्थाने युजि° इति । इतःपरमाधिकं सूत्रद्वयम् । पपेर्णिच्च । मुचियुधिभ्यां सन्वच्च । उ. °दृशः ।

२४८ हुर्छेः सनो लुक् छलोपश्च ।
२४९ श्वितेर्दश्च ।
२५० तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ ।
२५१ बहुलमन्यत्रापि ।
२५२ नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ।
२५३ सावसेर्ऋन् ।
२५४ यतेर्वृद्धिश्च ।
२५५ नञि च नन्देः ।
२५६ दिवेर्ऋः ।
२५७ नयतेर्डिच्च । २·१००
२५८ सव्ये स्थश्छन्दसि ।
२५९ अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनिः ।
२६० आङि शुषेः सनश्छन्दसि ।
२६१ कृषेरादेश्च दः ।
२६२ अदेर्मुट् च ।
२६३ वृतेश्च ।
२६४ क्षिपेः किच्च ।
२६५ अर्चिशुचिहुसृपिच्छादिछर्दिभ्य इसिः ।
२६६ बृंहेर्नलोपश्च ।
२६७ द्युतेरिसिन्नादेश्च जः । २·११०
२६८ वसौ रुचेः संज्ञायाम् ।
२६९ भुवः कित् ।
२७० सहो धश्च ।
२७१ पिबतेस्थुक् ।
२७२ जनेरुसिः ।
२७३ मनेर्धश्छन्दसि ।
२७४ अर्तिपॄवपियजितनिधनितपिभ्यो नित् ।
२७५ एतेर्णिच्च ।
२७६ चक्षेः शिच्च ।
२७७ मुहेः किच्च । २·१२०
२७८ बहुलमन्यत्रापि ।
२७९ कृगॄशॄवृचतिभ्यः ष्वरच् ।
२८० नौ सदेः ।

इत्युणादिषु द्वितीयः पादः ॥

---

२८१ छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः ।
२८२ इण्षिञ्जिदीङुष्यविभ्यो नक् ।
२८३ फेनमीनौ ।
२८४ कृषेर्वर्णे ।
२८५ बन्धेर्ब्रधिबुधी च ।
२८६ धापॄवस्यज्यतिभ्यो नः ।
२८७ लक्षेरट् च ।
२८८ वनेरिच्चोपधायाः ।
२८९ सिवेष्टेयू च ।

---

२५० क शंसिशसिशासिदसिक्षदादिभ्यः । २५२ क °क्षत्तृ° इत्यधिकम् । २५३ क उ. सुञ्यसेः ऋन् । २५९ अ °धम्यश्यवतॄभ्योऽनिः । २६१ अ कौ. °श्च चः । २६५ क °छृदिछादिभ्य– । २७० क सहेर्ध च । उ. सहेर्धश्च । २७१ अ उ. °स्थुक् च । २७४ अ क °तपिभ्यं इत्यस्य स्थाने °त्रपिभ्य । इतः परमधिकं सूत्रम् । मेऽदः । २७९ क °वृ° स्थाने °पॄ° इति । २८८ अ क पणे° ।

२९० कॄवृजॄषिद्रुपन्यनिस्वापिभ्यो नित् ।
२९१ धेट इच्च । ३·११
२९२ तृषिशुषिरसिभ्यः कित् ।
२९३ सुञो दीर्घश्च ।
२९४ रमेस्त च ।
२९५ रास्नासास्नास्थूणावीणाः ।
२९६ गादाभ्यामिष्णुच् ।
२९७ कृत्यशूभ्यां क्स्नः ।
२९८ तिजेर्दीर्घश्च ।
२९९ श्लिषेरच्चोपधायाः ।
३०० यजिमनिशुन्धिदसिजनिभ्यो युच् ।
३०१ भुजिमृङ्भ्यां युक्त्युकौ । ३·२१
३०२ सर्तेरयुः ।
३०३ पानीविपिभ्यः पः ।
३०४ च्युवः किच्च ।
३०५ स्तुवो दीर्घश्च ।
३०६ पुशृभ्यां निच्च ।
३०७ कुयुभ्यां च ।
३०८ खष्पाशिल्पशष्पवाष्परूपपर्पतल्पाः ।
३०९ स्तनिह्रपिपुषिगदिमदिभ्यो णेरित्नुच् ।
३१० कृहनिभ्यां क्नुः । ३·३०
३११ गमेः सन्वच्च ।
३१२ दाभाभ्यां नुः ।
३१३ वचेर्गश्च ।
३१४ धेट इच्च ।
३१५ सुवः कित् ।
३१६ जहातेर्द्वे ऽन्तलोपश्च ।
३१७ स्थो णुः ।
३१८ अजिवृरीभ्यो निच्च ।
३१९ विषेः किच्च ।
३२० कृदाधारार्चिकलिभ्यः कः । ३·४०
३२१ सृवृभूशुषिमुषिभ्यः कक् ।
३२२ शुकवल्कोल्काः ।
३२३ इणभीकापाशल्यतिमर्चिभ्यः कन् ।
३२४ नौ हः ।
३२५ नौ सदेर्डिच्च ।
३२६ स्यमेरीट् च ।
३२७ अजियुधूनीभ्यो दीर्घश्च ।
३२८ ह्रियो रश्च लो वा ।
३२९ शकेरुनोन्तोन्त्युनयः ।
३३० भुवो झिच् । ३·५०
३३१ कन्युच्क्षिपेश्च ।
३३२ अनुङ् नदेश्च ।
३३३ कृवृदारिभ्य उनन् ।
३३४ त्रो रश्च लो वा ।
३३५ क्षुधिपिशिमिथिभ्यः कित् ।
३३६ फलेर्गुक्च ।
३३७ अशेर्लशश्च ।
३३८ अर्जेर्णिलुक्च ।
३३९ तृणाख्यायां चित् ।

३०० अ युच् इत्यस्य स्थाने युः । ३०४ अ क च्युवः किद्दीर्घश्च । अ इतःपरमाधिकम्-स्त्यस्संप्रसारणमुश्च ।क °मूश्च । ३०५ एतत्सूत्रं सतीवृत्तौ न दृश्यते । सर्वस्वे तु स्त्येधातोः स्तूपमिति साधितम् । अत इदमनार्षमिति लक्ष्यते । इति उज्वलदत्तः । ३०८ अ °शिल्प° इत्यस्य °शिष्प° इति । ३१६ अ जहातेर्द्वे च लोपश्च । ३१७ अ स्थाणुः । ३१८ अ क–नित् । ३२१ अ क–कित् । ३२५ अ क नास्ति । ३२६ अ क स्यम ईट् च । ३३१ अ क्षिपेः । ३३२ अ क चतुङ नुदेश्च । ३३३ अ कृदृदारिभ्यः– । ३३५ उ. °मिथः। ३३६ अ क नास्ति ॥

३४० अर्तेश्च । ३·६०
३४१ अजियमिशीङ्भ्यश्च ।
३४२ वृतॄवदिहानिकमिकषिभ्यः सः ।
३४३ प्लुषेरच्चोपधायाः ।
३४४ मनेर्दीर्घश्च ।
३४५ अशेर्देवने ।
३४६ स्नुव्रश्चिकृत्यृषिभ्यः कित् ।
३४७ ऋषेर्जातौ ।
३४८ उन्दिगुधिकुषिभ्यश्च ।
३४९ गृधिपण्योर्दकौ च ।
३५० अशेः सरः । ३·७०
३५१ वसेश्च ।
३५२ संपूर्वाच्चित् ।
३५३ कृधूमदिभ्यः कित् ।
३५४ पते रश्च लः ।
३५५ तन्यृषिभ्यां क्सरन् ।
३५६ पीयुक्वणिभ्यां कालन्ह्रस्वः संप्रसारणं च ।
३५७ कठिकषिभ्यां काकुः ।
३५८ सर्तेर्दुक्च ।
३५९ वृतेर्वृद्धिश्च ।
३६० पर्देर्नित्संप्रसारणमल्लोपश्च । ३·८०
३६१ सृयुवचिभ्योऽन्युजागूजक्नुचः ।
३६२ आनकः शीङ्भियः ।
३६३ आणको लुधूशिङ्घिधाञ्भ्यः ।
३६४ उल्मुकदर्विहोमिनः ।
३६५ ह्रियः कुक्रश्च लो वा ।
३६६ हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् ।
३६७ नञ्याप इट् च ।
३६८ तनिमृङ्भ्यां किच्च ।
३६९ अञ्जिघृसिभ्यः क्तः ।
३७० दुतनिभ्यां दीर्घश्च । ३·९०
३७१ जेर्मूट् चोदात्तः ।
३७२ लोष्टपलितौ ।
३७३ ह्रयाभ्यामितन् ।
३७४ रुहे रश्च लो वा ।
३७५ पिशेः किच्च ।
३७६ श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।
३७७ दधिषाय्यः ।
३७८ वृञ एण्यः ।
३७९ स्तुवः क्सेय्यश्छन्दसि ।
३८० राजेरन्यः । ३·१००

३४० अ क इतःपरं 'धारोर्णिलुक् च' इत्यधिकम् । ३४२ क °युमुचिभ्यः इत्यधिकम् । ३४३ अ नास्ति । ३४५ क इतःपरं नदेः कश्चेत्यधिकम् । ३४७ अ क इतःपरमधिकानि सूत्राणि । अर्तेर्भुक्षिन् (भुक्षिनक्) । मघेरच् नलोपश्च (मङ्घेरञ् लोपश्च) । सनेर्डलः । गविगन्धृङो (धृञो) वः । दन्भेः सकिन् मक् च (दम्भेस्सिन् मक् च)। (दमेरुभिद्गुश्चोपधायाः) ।दिवेर्दिवि (दिवेर्डिवः) । ३४८ अ नास्ति । क उन्देर्नलोपश्च । ३४९ अ गृधिपत्योर्दकौ च । ३५० क उ.– सरन् । ३५२ क सपूर्वाच्चित् । ३५४ अ क लो वा । ३५६ अ वीयुकणिभ्यां– । ३५७ अ कठिकुपिभ्यां फारुः । क कुटिकुपिभ्यां फाकुः । इतःपरं चटिकटिभ्यामाकुरित्यधिकम् । ३५९ अ क नास्ति । ३६० अ °र्नित्मसारण° । ३६१ अ– °जग्नुचः । ३६२ अ आनकन्– । ३६३ अ आनकच् लूशिङ्घि° । क नास्ति । ३६५ अ क –कुम्रश्च– । ३६६ क °ण्वामि° । ३६७ अ नञ्याप्नोतेरिट् च । ३७१ अ नास्ति । ३७५ अ क नास्ति । ३७६ अ क गृहि इति न विद्यते । ३७८ अ–एण्यन् । ३७९ अ क–क्षेय्य । उ. –केय्यः– ।

३८१ शृरम्योश्च ।
३८२ अर्तेर्निच्च ।
३८३ पर्जन्यः ।
३८४ वदेरान्यः ।
३८५ अमिनक्षियजिवधिपतिभ्योऽत्रन् ।
३८६ गडेरादेश्च कः ।
३८७ वृञश्चित् ।
३८८ सुविदेः कत्रन् ।
३८९ कृतेर्नुम्च ।
३९० भृमृदशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् । ३·११०
३९१ पृषिरञ्जिभ्यां कित् ।
३९२ खलतिः ।
३९३ शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ।
३९४ भृञश्चित् ।
३९५ रुविदिभ्यां ङित् ।
३९६ उपसर्गे वसेः ।
३९७ अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच् ।
३९८ वेञस्तुट् च ।
३९९ वहियुभ्यां णित् ।
४०० वयश्च ।
४०१ दिवः कित् । ३·१२०
४०२ कृशृशलिकलिगर्दिभ्योऽभच् ।
४०३ ऋषिवृषिभ्यां कित् ।
४०४ रुपेर्निल्लुप्च ।
४०५ रासिवल्लिभ्यां च ।
४०६ जृविशिभ्यां झच् ।
४०७ रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।
४०८ तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च ।
४०९ हन्तेर्मुट् हि च ।
४१० भन्देर्नलोपश्च । ३·१३०
४११ ऋच्छेररः ।
४१२ अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ।
४१३ कुवः क्ररन् ।
४१४ अङ्गिमदिमन्दिभ्य आरन् ।
४१५ गडेः कड् च ।
४१६ शृङ्गारभृङ्गारौ ।

---

३८१ अ क नास्ति । ३८५ अ °यजिवन्धिपतिभ्यः– । ३८६ अ क गलेरा° । ३८८ अ क सुजिविदेः कत्रन् । ३९० अ °भृमृद° । अ क °तमि° इति न विद्यते । ३९२ अ क खलतः । ३९३ अ इतः परमधिकम् । दशिशामिदमिभ्यश्च । ३९४ अ क भृञश्चित् इत्यादि सूत्रचतुष्टयं व्युत्क्रमेण । ३९५ क–कित् । ३९७ अ अत्यमिचमितमिरभिनभितपिपनिभ्योऽसच् । ३९८ अ इतः परमधिकं सूत्रं 'वयो णित्' इति । ३९९ अ वह्नियुभ्यां च । क वाहसः । ४०० अ क वयो णित् । ४०१ अ क दिविशिविभ्यां किच्च । ४०२ अ क कृगृशृशल(लि)गर्दिभ्योऽभच् । ४०४ अ क रुपेर्निलुश्च । क रुपेर्नित् लुश् च । ४१२ अ क °वाशि° इति आधिकम् । अ देवि इत्यस्य स्थाने दिवि । ४१३ अ कुवः कुरन् । उ. क्ररन् । ४१५ अ गडेः कट च । क गलेः कट च ।

४१७ काञ्जिमृजिभ्यां चित् ।
४१८ कमेः किदुच्चोपधायाः ।
४१९ तुषारादयश्च ।
४२० दीङो नुट् च । ३·१४०
४२१ सर्तेरपः षुक्च ।
४२२ उषिकुटिदलिकचिखजिभ्यः कपन् ।
४२३ क्वणेः संप्रसारणं च ।
४२४ कपश्चाक्रवर्मणस्य ।
४२५ विटपपिष्टपविशिपोलपाः ।
४२६ वृतेस्तिकन् ।
४२७ कृतिभिदिलतिभ्यः कित् ।
४२८ इण्यशिभ्यां तकन् ।
४२९ इणस्तशन्तशसुनौ ।
४३० वीपतिभ्यां तनन् । ३·१५०
४३१ दृदलिभ्यां भः ।
४३२ अर्तिगृभ्यां भन् ।
४३३ इणः कित् ।
४३४ असिसञ्जिभ्यां क्थिन् ।
४३५ प्लुषिकुषिशुषिभ्यः क्सिः ।
४३६ अशेर्नित् ।
४३७ इषेः क्सुः ।
४३८ अवितॄस्तृतन्त्रिभ्य ईः ।
४३९ यापोः किद् द्वे च ।
४४० लक्षेर्मुट् च । ३·१६०

इत्युणादिषु तृतीयः पादः ।

---

४४१ वातप्रमीः ।
४४२ ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गिकुयुकृशिभ्यः कत्निज्यतुजालिजिष्ठुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः ।
४४३ श्रः करन् ।
४४४ पुषः कित् ।
४४५ कलश्च ।
४४६ गमेरिनिः ।
४४७ आङि णित् ।
४४८ भुवश्च ।
४४९ प्रे स्थः ।
४५० परमे कित् । ४·१०
४५१ मन्थः ।
४५२ पतस्थ च ।
४५३ खजेराकः ।
४५४ बलाकादयश्च ।
४५५ पिनाकादयश्च ।
४५६ कषिदूषिभ्यामीकन् ।

---

४१७ अ काजि° । ४१८ अ क कमेरुच्चो° । ४२० अ क नास्ति । अत्र उज्वलदत्तः— 'सूत्रमिदं सतीवृत्तौ देववृत्तौ च न दृश्यते' । दीनारशब्दो भोजेन तुषारादौ समावेशितः इति प्रक्रियासर्वस्वे । ४२४ अ कपंश्चा° क कवश्चा° । ४२९ अ क इणस्लशंस्त° । ४३७ अ इष्यशूभ्यां क्सुः । क इष्यशिभ्यां क्सुः । ४४० अ इतः परमधिकं सूत्रम् । युष्यसिभ्यां मदिक् । ४४२ अ °वन्यज्यर्पि° °कशिभ्यः अत्निय° °ष्टुजिष्णुजिशन् स्यन्निथिन्नुल्यशासानुकः । क–अत्निच्° । ४४५ क कलच् च उ. कलंश्च । ४५१ अ मन्थेः । क मथेः । ४५२ क पतेः स्थ च । ४५३ अ खजेराकः । ४५४ अ क इतःपरम् शलिपटिपतिभ्यो नित् इत्यधिकम् ।

४५७ अनिह्वपिभ्यां किच्च ।
४५८ चङ्कणः कङ्कणश्च ।
४५९ शॄपॄवृञां द्वे रुक्चाभ्यासस्य ।
४६० फर्फरीकादयश्च । ४·२०
४६१ ईपेः किद्ध्रस्वश्च ।
४६२ ऋजेश्च ।
४६३ सर्तेर्नुम्च ।
४६४ मृडः कीकन्कङ्कणौ ।
४६५ अलीकादयश्च ।
४६६ कॄतॄभ्यामीपन् ।
४६७ शॄपॄभ्यां किच्च ।
४६८ अर्जेर्ऋज च ।
४६९ अम्बरीषः ।
४७० कॄशॄपॄकटिपटिशौटिभ्य ईरन् । ४·३०
४७१ वशेः कित् ।
४७२ कशेर्मुट् च ।
४७३ कृञ उच्च ।
४७४ घसेः किच्च ।
४७५ गभीरगम्भीरौ ।
४७६ विषा विहा ।
४७७ पच एलिमच् ।
४७८ शीङो धुक्लक्वलञ्वालनः ।
४७९ मृकणिभ्यामूकोकणौ ।
४८० वलेरूकः । ४·४०
४८१ उलूकादयश्च ।
४८२ शलिमण्डिभ्यामूकण् ।
४८३ नियो मिः ।
४८४ अर्तेरूच्च ।
४८५ भुवः कित् ।
४८६ अश्नोते रश्च ।
४८७ दलिमः ।
४८८ वीज्याज्वरिभ्यो निः ।
४८९ सृवृपिभ्यां कित् ।
४९० अङ्गेर्नलोपश्च । ४·५०
४९१ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ।
४९२ घृणिपृश्निपार्ष्णिचूर्णिभूर्णि ।
४९३ वृदॄभ्यां विन् ।
४९४ जॄशॄस्तॄजागृभ्यः क्विन् ।
४९५ दिवो द्वे दीर्घश्चाभ्यासस्य ।
४९६ कृविघृष्विछविस्थविकिकीदिवि ।
४९७ पतेर्डतिः ।
४९८ शकेर्ऋतिन् ।

---

४५७ अ क नास्ति । ४५८ अ चङ्कण्यतेः कङ्कण च । क चङ्कण्यते किङ्किण च । ४५९ अ °वृङां ४६० अ इतः परमधिकं सूत्रम् । अनिदृशिभ्यामीकन् । क अनिदृशिभ्यां किच्च । ४६१ क किदिति नास्ति । ४६२ क नास्ति । ४६३ उ. नक्च । ४६४ अ मृडेः कीकन्किकनौ । क मृडेः कीकन्ककनौ । ४६७ अ क–कित् । ४६८ अ अर्जेः कित् ऋज च । उ. °जश्च । ४६९ अम्बरीषश्च । ४७० क °पॄगकटि° ४७१ उ. वशःकित् । ४७६ अ क विसा विहा । ४७७ अ क इतः परमधिकम् । भिदेः किच्च । ४७८ अ –धुग्लग्वालन्वलचः । क– शङिस्थुवालन्वलचः । ४८० क वल्हेरूकः । ४८३ अ नयतेर्मिः । ४८४ अ अर्तेरू च । ४८८ क वीज्यात्वरि° । ४९१ अ क °चुग्ला° । ४९३ अ क पॄदॄभ्यां विन् । ४९६ अ °छविद्विस्थवि° किकिदीविः । क °स्थविदिविकिकिदीवि ।

४९९ अमेरतिः ।
५०० वहिवस्यर्तिभ्यश्चित् । ४·६०
५०१ अञ्चेः को वा ।
५०२ हन्तेरंह च ।
५०३ रमेर्नित् ।
५०४ सूङः क्रिः ।
५०५ अदिशदिभूशुभिभ्यः क्रिन् ।
५०६ वङ्क्र्यादयश्च ।
५०७ राशादिभ्यां त्रिप् ।
५०८ अदेस्त्रिन् ।
५०९ पतेरत्रिन् ।
५१० मृकणिभ्यामीचिः । ४·७०
५११ श्वयतेश्चित् ।
५१२ वेञो डिच्च ।
५१३ ऋहनिभ्यामूषन् ।
५१४ पुरः कुषन् ।
५१५ पृनहिकलिभ्य उपच् ।
५१६ पीयेरूषन् ।
५१७ मस्जेर्नुम्च ।
५१८ गडेश्च ।
५१९ अर्तेररुः ।
५२० कुटः किच्च । ४·८०
५२१ शकादिभ्योऽटन् ।
५२२ कृकदिकडिकटिभ्योऽम्बच् ।
५२३ कदेर्णित्पक्षिणि ।
५२४ कलिकर्द्योरमः ।
५२५ कुणिपुल्योः किन्दच् ।
५२६ कुपेर्वा वश्च ।
५२७ नौ षञ्जेर्घथिन् ।
५२८ उद्यर्तेश्चित् ।
५२९ सर्तेर्णिच्च ।
५३० खर्जिपिञ्जादिभ्य ऊरोलचौ । ४·९०
५३१ कुवश्चट् दीर्घश्च ।
५३२ समीणः ।
५३३ सिवेष्टेरू च ।
५३४ शमेर्वन् ।
५३५ उल्वादयश्च ।
५३६ स्थः स्तोऽम्बजबकौ ।
५३७ शाशपिभ्यां ददनौ ।
५३८ अब्दादयश्च ।
५३९ वलिमलितनिभ्यः कयन् ।
५४० वृहोः षुग्दुकौ च । ४·१००

---

५०४ अ पूङः क्रिः । ५१२ अ वेञो डित् । ५१३ अ °मुपन् । ५१४ अ क पुस्तकयोरितः परमधिकम् । विदिपुरोश्च । ५१५ अ क पूकलिभ्यामुपन् । नहिकलिहनिलसिभ्य उपच् । ५१८ अ क नास्ति । उ पुस्तके गंडेश्च । इतः परमधिकम् । अङ्गूपः । ५२० अ क कुटः कित् । ५२१ क °भ्योऽटच् । इतः परमधिकम् । क पुस्तके अर्तिश्रूभ्यामुटच् । अ °मटुच् । ५२२ अ क कृकलि° । ५२३ अ कदेर्णिद्वा । इतः परमधिकम् । कृञश्च । ५२४ अ कर्दिकलोरमः । क कर्दिकल्योरमः । ५२६ क कुवश्च । ५२९ अ क सर्तेर्णित् । ५३० अ इतःपरमधिकं सूत्रद्वयम् । शृणातेर्णित् दीर्घश्च । लमेर्दुक् च । क शृणातेर्दुक् दीर्घश्च । ५३२ अ नास्ति । ५३४ क शमेर्कन् । ५३६ अ क इतः परमधिकं सूत्रद्वयम् । हृसृभ्यां कानिप् । सृजेरम्च । क सृजेरश्च ।

५४१ मिपीभ्यां रुः ।
५४२ जत्वादयश्च।
५४३ रुशातिभ्यां क्रुन् ।
५४४ जनिदाच्युसृवृमदिपामिनामिभृञ्भ्य इत्वन्त्वन्तण्क्निन्शक्स्यढडटाटचः ।
५४५ अन्येभ्योऽपि दृश्यन्ते ।
५४६ कुसेरुम्भोमेदेताः ।
५४७ सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः ।
५४८ मूशक्यविभ्यः क्लः ।
५४९ माछासासिभ्यो यः ।
५५० जनेर्यक् । ४·११०
५५१ अघ्न्यादयश्च ।
५५२ स्नामदिपद्यर्तिपॄशकिभ्यो वनिप् ।
५५३ शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् ।
५५४ धाप्योः संप्रसारणं च ।
५५५ अदेर्ध च ।
५५६ प्र ईरशदोस्तुट् च ।
५५७ सर्वधातुभ्य इन् ।
५५८ हृपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च ।
५५९ इगुपधात्कित् ।
५६० भ्रमेः संप्रसारणं च । ४·१२०
५६१ क्रमितमिशतिस्तम्भामत इच्च ।
५६२ मनेरुच्च ।
५६३ वर्णेर्वलिश्चाहिरण्ये ।
५६४ वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ।
५६५ नहो भश्च ।
५६६ कृपेर्वृद्धिश्छन्दसि ।
५६७ श्रः शकुनौ ।
५६८ कृञ उदीचां कारुषु ।
५६९ जनिघसिभ्यामिण् ।
५७० अज्यतिभ्यां च । ४.१३०
५७१ पादे च ।
५७२ अशिपणाय्योरुडायलुकौ च ।
५७३ वातेर्डिच्च ।
५७४ प्रे हरतेः कूपे ।
५७५ नौ व्यो यलोपः पूर्वस्य च दीर्घः ।
५७६ समाने ख्यः स चोदात्तः ।
५७७ आङि श्रिहनिभ्यां ह्रस्वश्च ।
५७८ अच इः ।

---

५४१ अ क मापो रुरी च । ५४३ अ क रुशातिभ्यां क्रुन् । ५४४ अ °मदिशादिनमि° °स्यसठटाटचः । क °त्वन्क्नन्क्निशक्छक्सठक्टगटचः । ड °स्यटड° । ५४६ अ क कुरुलोम्भोण्डोमेदेताः किच्च । ५४७ अ °सिधर्णसि° क °सिसर्णसिवर्णसि° । ५४८ अ °व्यविभ्यः । ड मूङ्शक्य° । ५४९ अ °ससिसूभ्यो यः । ५५२ अ स्नापादिमद्यर्ति° क °द्यर्तिशकिभ्यो । ५५४ अ ध्याप्याचोः प्रसारणं च । क ध्याप्योः संप्रसारणं च । ५५५ अ क अतेर्धश्च । ५५६ अ प्रेसिद्रोस्तुट् च । क प्र ईरसद्योस्तुट् च । ५५७ अ इतः परमधिकम् पचिपठिकाशिवाशिनदिभ्य इन् । क पचिपठिकाशिनन्दिभ्यो इन् । ५५८ अ क ° विदिकीर्तिभ्यश्च । ५६१ अ क्रमिगमिनमितमिस्तम्भामच इच्च । क क्रमितमिनमिस्तम्भामत इच्च । ५६३ अ वले वल चाहिरण्ये । क वलेर्वाहि चाहिरण्ये । ५६४ अ °राजिघ्राजिध्वाजिसादि° । क °राजिघ्राजिध्वाजिसदिहनिकामिपाशिवदिवृहृभ्य इञ् । ५६८ क कृञ उदीचाम् । ५७२ अ आशिपाणिभ्यां रुडूलुकौ च । क अशिपणाय्योरुडुलुकौ । ५७३ अ क वेञो डित् । ५७४ अ प्रे भरतेः कूपे ।

५७९ खनिकष्यज्यसिवसिवनिसनिध्वनि-ग्रन्थिचलिभ्यश्च ।

५८० वृतेश्छन्दसि । ४·१४०

५८१ भुजेः किच्च ।

५८२ कृगृशृपृकुटिभिदिछिदिभ्यश्च ।

५८३ कुडिकम्प्योर्नलोपश्च ।

५८४ सर्वधातुभ्यो मनिन् ।

५८५ बृंहेर्नोऽच्च ।

५८६ अशिशकिभ्यां छन्दसि ।

५८७ हृभृधृसृस्तृशृभ्य इमनिच् ।

५८८ जनिमृङ्भ्यामिमानिन् ।

५८९ वेञः सर्वत्र ।

५९० नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्मामन् । ४·१५०

५९१ मिथुने मनिः ।

५९२ सातिभ्यां मनिन्मनिणौ ।

५९३ हनिमशिभ्यां सिकन् ।

५९४ कोररन् ।

५९५ गिर उडच् ।

५९६ इन्देः कमिर्नलोपश्च ।

५९७ कायतेर्डिमिः ।

५९८ सर्वधातुभ्यः ष्ट्रन् ।

५९९ भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च ।

६०० दिवेर्ऋु च । ४·१६०

६०१ उषिखनिभ्यां कित् ।

६०२ सिविमुच्योष्टेरू च ।

६०३ अमिचिमिदिशासिभ्यः क्त्रः ।

६०४ पुवो ह्रस्वश्च ।

६०५ स्त्यायतेर्ड्रट् ।

६०६ गुधृवीपचिवचियमिसदिक्षादिभ्यस्त्रः ।

६०७ हुयामाश्रुभसिभ्यस्त्रन् ।

६०८ गमेरा च ।

६०९ दादिभ्यश्छन्दसि ।

६१० भूवादिगृभ्यो णित्रन् । ४·१७०

६११ चरेर्वृत्ते ।

६१२ अशित्रादिभ्य इत्रोत्रौ ।

६१३ अमेर्द्विषति चित् ।

६१४ आ समिण्निकषिभ्याम् ।

६१५ चितेः कणः कश्च ।

६१६ सूचेः स्मन् ।

६१७ पातेर्डुम्सुन् ।

६१८ रुचिभुजिभ्यां किष्यन् ।

६१९ वसेस्तिः ।

६२० सावसेः । ४·१८०

---

५७९ अ °ष्यं° °र्चारिभ्यश्च । क °ज्यासपुसिध्वनिसनिग्रन्थिचरिभ्यश्च । इतः परमाधिकम् । अ उभेः द्वि च । क उभे द्विः । ५८१ क भुजेः कित् । ५८२ अ °पृतृकुटि° । ५८३ अ क कुण्ठि° । ५८५ अ बृंहेरम् नलोपश्च । अ इतः परमाधिकम् । उपिकुपिहृपिभ्यः । क उपिकुपिसृपिभ्यः कित् । ५८७ अ भृसृहृधृस्तृदृभ्य ईमनिन् । क भृसृहृधृस्तृसुभ्य ईमनिच् । ५८८ अ क जनिहृभ्यामिमनिन् । ५९० अ नामन्सामन्धोमन्हेमन्रोमन्लोमन्व्योमन्‌विधर्मन्नृध्यामन्पाप्मन् । क °न्सामन्होमन्हेम° । ५९१ अ क–मानिन् । ष्ट्रन् । ५९३--५९७ न सन्ति । ५९८ अ क ष्ट्रन् । ६०० अ उ. दिवेर्युश्च । ६०३ अ क °दिशांसिभ्यः कित् । ६०५ अ क स्त्री । ६०६ अ °स्त्रन् । ६०७ अ क पुस्तकयोः– व्युत्क्रमेण । क पुस्तके वर्सात्याधिकम् । ६०९ अ क इतःपरमाधिकम् । भूवादिगृभ्यो णित्रन् । ६११ क चरेर्वृत्ते ह्रस्वश्च वा । ६१४ क आः सामिण्° । ६१५ अ क नास्ति । ६१६ अ सूचेः क्स्मन् । ६१७ अ पातेर्डुंसिच् । ६१८ अ क इतः परमधिकम् । वचेरुष्यन् । ६२० अ क नास्ति ।

६२१ वौ तसेः ।

६२२ पादिप्रथिभ्यां नित् ।

६२३ दृणातेर्ह्रस्वश्च ।

६२४ कृतॄकृपिभ्यः कीटन् ।

६२५ रुचिवचिकुचिकुटिभ्यः कितच् ।

६२६ कुटिकुषिभ्यां क्मलन् ।

६२७ कुषेर्लश्च ।

६२८ सर्वधातुभ्योऽसुन् ।

६२९ रपेरत एच्च ।

६३० अशेर्देवने युट् च । ४·१९०

६३१ उब्जेर्बले वलोपश्च ।

६३२ श्वेः संप्रसारणं च ।

६३३ श्रयतेः स्वाङ्गे शिरः किच्च ।

६३४ अर्तेरुच्च ।

६३५ व्याधौ शुट् च ।

६३६ उदके नुट् च ।

६३७ इण आगसि ।

६३८ रिचेर्धने घिच्च ।

६३९ चायतेरन्ने ह्रस्वश्च ।

६४० वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च ।

६४१ स्रुरिभ्यां तुट् च । ४·२०१

६४२ पातेर्बले जुट् च ।

६४३ उदके थुट् च ।

६४४ अन्ने च ।

६४५ अदेर्नुम्धौ च ।

६४६ स्कन्देश्च स्वाङ्गे ।

६४७ आपः कर्माख्यायाम् ।

६४८ रूपे जुट् च ।

६४९ उदके नुम्भौ च ।

६५० नहेर्दिवि मश्च । ४·२१०

६५१ इण आगोऽपराधे च ।

६५२ अमेर्हुक्च ।

६५३ रमेश्च ।

६५४ देशेऽह च ।

६५५ अञ्च्यञ्जियुजिभृजिभ्यः कुश्च ।

६५६ भूरञ्जिभ्यां कित् ।

६५७ वसेर्णित् ।

६५८ चन्देरादेश्च छः ।

६५९ पचिवचिभ्यां सुट् च ।

६६० वहिहाधाञ्भ्यश्छन्दसि । ४·२२०

६६१ इण आसिः ।

६६२ मिथुनेऽसिः पूर्ववच्च सर्वम् ।

६६३ नञि हन एह च ।

६६४ विधाञो वेध च ।

६६५ नुवो धुट् च ।

---

६२२ अ क प्रथेर्नित् । ६२५ अ क °वचिकुत्सिकुशिभ्यः-- । ६२६ अ कुटि° क्मलच् । ६२९ अ क रपेरत एच्च इत्यस्य स्थाने पिवतेरीच्च । ६३० अ अशेर्भगे युट् च । क अशेर्युट् । ६३१ क अब्जेर्बलोपश्च । ६३८ अ--किच्च । क --घित् । उ. घित् किच्च । ६३९ अ चायेरन्ने– । ६४० उ. स्वरूपाङ्गयोः । ६४५ अ क अदेर्नुम्धश्च । ६४७ अ आपः कर्माख्यायां ह्रस्वश्च वा नुम् । क – नुट् च वा । उ. ह्रस्वस्तुट् च वा । ६४९ अ क उदके नुम्भश्च । ६५१ अ क चकारो नास्ति । ६५४ अ क देशेऽहश्च । ६५५ अ – भृजां । क °भ्रस्जां । ६५६ क °रञ्जिमिथितॄपृभ्यः कित् । ६५७ अ वस्तेर्णित् । ६५८ अ °आदेश्छः । ६६० अ क °धाभ्य– । ६६३ नाञि हन एह च । उ. नञ्या° ।

६६६ गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च ।
६६७ चन्द्रे मो डित् ।
६६८ वयसि धाञः ।
६६९ पयसि च ।
६७० पुरसि च । ४·२३०
६७१ पुरूरवाः ।
६७२ चक्षेर्बहुलं शिच्च ।
६७३ उषः कित् ।
६७४ दमेरुनसिः ।
६७५ अङ्गतेरसिरिरुडागमश्च ।
६७६ सर्तेरप्पूर्वादसिः ।
६७७ विदिभुजिभ्यां विश्वे ।
६७८ वशेः कनसिः । ४·२३८

इत्युणादिषु चतुर्थः पादः ॥

---

६७९ अदि भुवो डुतच् ।
६८० गुधेरूमः ।
६८१ मसेरूरन् ।
६८२ स्थः किच्च ।
६८३ पातेरातिः ।
६८४ वातेर्नित् ।
६८५ अर्तेश्च ।
६८६ तृहेः क्नो हलोपश्च ।
६८७ वृन्लुटितनिताडिभ्य उलन् तण्डश्च ।
६८८ दंसेष्टटनौ न आ च । ५·१०
६८९ दंशेश्च ।
६९० उदि चेडैसिः ।
६९१ नौ दीर्घश्च ।
६९२ सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः ।
६९३ पूङो यण्णुक् ह्रस्वश्च ।
६९४ स्रंसेः शि कुट् किच्च ।
६९५ अर्तेः क्युरुच्च ।
६९६ हिंसेरीरन्नीरचौ ।
६९७ उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च ।
६९८ डित्खनेर्मुट् स चोदात्तः । ५·२०
६९९ अमेः सन् ।
७०० मुहेः खो मूर्च ।
७०१ नहेर्हलोपश्च ।
७०२ शीङो ह्रस्वश्च ।
७०३ माङ ऊखो मय् च ।

---

६६६ अ क °कारकयोरपि पूर्व° । उ. °कारकयोः पू° । ६६७ क– डिच । ६७४ अ क °रू° । ६७५–६७६ अ क उ. आङ्गिरा अप्सराः ।'क इतः परमधिकं सूत्रम् । ऊधः । ६८३ अ क पातेरातिः । ६८६ अ –क्नन्। ६८७ अ °तनितटितण्डिभ्य उलच् । क °तनितडितण्डिभ्य उलच् । क पुस्तके इतःपरमधिकानि सूत्राणि । हपिमङ्गिशाङ्किचटिवन्दिभ्यश्च । १ । कुमुलतुमुलमुकुलमञ्जुलादयश्च । २ । उलुरुधायश्च । ३ । कटिपटिमद्रिलविलालिकस्यानिगटिलटितृभ्यो हल् च । ४ । पुलेः किच्च । ५ । रुलादिभ्यः कित् । ६ । एतानि षट् सूत्राणि व्याख्यासु न दृष्टानि इति सर्वस्वे । ६८८ उ. –आत् । ६९२ अ क पुस्तकयोः सूत्रद्वयमेतत् । –क्तः । दमे–इति । ६९४ अ क पुस्तकयोः– शिः– । ६९५ अ अर्तेः क्युडुश्च । क अर्तेः क्युनुच्च । उ. अर्तेः क्युजुच्च । ६९६ अ °रलचौ पूर्वपदान्तलोपश्च । क °रलचौ– । ६९८ अ क उ. °ट् चो° इतःपरमाधिकम् । हन्तेश्च द्वे । ६९९ अ क अमेरसन् । ७०१ अ नहेर्लोपश्च । इतः परमधिकम् । महेश्च । ७०२ अ क नित् इत्याधिकम् । इतः परमाधिकं सूत्रम् ' शाखा ' इति । ७०३ उ. –मय–, । क. माङ उखः ।

७०४ कलिगलिभ्यां फगस्योच्च ।
७०५ स्पृशेः श्वण्शुनौ पृ च ।
७०६ श्मनि श्रयतेर्डुन् ।
७०७ अश्रवादयश्च ।
७०८ जनेष्टन् लोपश्च । ५·३०
७०९ अच् तस्य जङ्घच् ।
७१० हन्तेः शरीरावयवे द्वे च ।
७११ क्लिशेरन् लो लोपश्च ।
७१२ फलेरितजादेश्च पः ।
७१३ कृञादिभ्यः संज्ञायां वुन् ।
७१४ चीकयतेराद्यन्तविपर्ययश्च ।
७१५ पचिमच्योरिच्चोपधायाः ।
७१६ जनेररष्ठ च ।
७१७ वचिमनिभ्यां चिच्च ।
७१८ ऊर्जि दृणातेरलचौ पूर्वपदान्त्यलोपश्च । ५·४०
७१९ कृदरादयश्च ।
७२० हन्तेर्युग्नाद्यन्तयोर्घत्वतत्वे ।
७२१ क्रमिगमिक्षमिभ्यस्तुन्वृद्धिश्च ।
७२२ हर्यतेः कन्यन्हिर् च ।
७२३ कृञः पासः ।
७२४ जनेस्तु रश्च ।
७२५ ऊर्णोतेर्डः ।
७२६ दधातेर्यत् नुट् च ।
७२७ जीर्यतेः क्रिन् रश्च वः ।
७२८ मव्यतेर्यलोपो मश्चापतुट् चालः ।
७२९ ऋजेः कीकन् ।
७३० तनोतेर्डउः सन्वच्च ।
७३१ अर्भकपृथुकपाका वयसि ।
७३२ अवद्यावमाधमार्वरेफाः कुत्सिते ।
७३३ लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सितयोः ।
७३४ क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च ।
७३५ अश्नोतेराशुकर्मणि वरट् च ।
७३६ चतेरुरन् ।
७३७ प्रा(प्रे ऽ)ततेररन् ।
७३८ अमेस्तुट् च । ५·६०
७३९ दहेर्गो लोपो दश्च नः ।
७४० सिचेः संज्ञायां हनुमौ कश्च ।

---

७०८ अ क जनेष्टन् नलोपश्च । ७०९ अ तस्य जङ्घ च । क – जङ्घ च । अ क इतः परमधिके सूत्रे । लूञो मनिन् । अ क्लिशेरन्ललोपश्च । क क्लिशेरन् लोलोपश्च । ७१५ उ. °रिच्च । ७१६ अ °ठश्च । ७१७अ क पचिवदिभ्यामिच्च । इतः परमधिकम् । वाचिमनिभ्यां चिद्वा । ७२० अ क °युजाद्य° । ७२१ इतः परमधिकानि सूत्राणि । अ क गुहः कन् । करोतेद्वे च । विपेर्व्यातिकर्मणि । ७२२ अ -हिरश्च । क –हिर् च । ७२३ क कृञः कृञ् । अ इतः परमधिकम् । कठिचकिभ्यामोरः । ७२४ अ क जनेस्तोरश्च । अ डनट् च । क डोऽट् च । ७२७ अ जीर्यतेः क्रिद्रश्च पुग्वा । ७२८ अ–मश्चापोऽप्तुट्– । क नास्ति । ७३० तितउशब्दः स्त्रीनपुंसकयोर्वर्तते । चालनी तितउः पुमान् इत्यमरे प्रमादः । इति उज्ज्वलदत्तः । ७३२ अ अवद्यावमार्याः कुत्सिते । ७३३ अ क उ. लीङ्° ह्रस्वश्च पुट्(क) तरौ श्लेष्म° । ७३४ अ क क्लिशेरी– । इतः परमधिकं सूत्रम् । आप्नोतेः क्विब्ह्रस्वश्च । ७३७–७३८ अ क न स्तः । ७३९ अ एतत् 'नगो प्राणिष्वन्यतरस्याम्' (पा. सू. ६-३-७६) इति नगशब्दस्य सिद्धत्वादनर्थकमित्याहुः । ७४० अ क– कन्नुहौ च ।

७४१ व्याडि ग्रातेश्च जातौ ।

७४२ हन्तेरच् घुर च ।

७४३ क्षमेरुपधालोपश्च ।

७४४ तरतेर्ड्रिः ।

७४५ ग्रहेरनिः ।

७४६ प्रथेरमच् ।

७४७ चरेश्च ।

७४८ मङ्गेरलच् । ५·७०

इत्युणादिषु पञ्चमः पादः* ॥

---

* उणादिसूत्रस्था गणास्तत्रत्याः साधिताः शब्दा उज्वलदत्तभट्टोजीश्वेतवनवासिनारायणभट्टप्रभृतीनां टीकाभ्यः समुद्धृत्याधस्तान्निर्दिश्यन्ते । एतादृश अन्येऽपि शब्दा अत्र समावेशिता भवन्तीति लक्ष्यते ।

१ अघ्न्यादयः ५५१.

१ अघ्न्या, २ अघ्न्य, ३ कन्या, ४ वन्ध्या, ५ सन्ध्या, ६ कौतेर्डुक् च (ग. सू. १), ७ कुड्य, ८ मनो ध च (ग. सू. २), ९ मध्य, १० वद्य । इति अघ्न्यादिः ।

२ अब्दादयः ५३८.

१ अब्द, २ कौतेर्नुम् च (ग. सू. ३), ३ कुन्दः, ४ वृन्दः, ५ कन्दः, ६ तुन्दः । इति अब्दादिः ।

३ अलीकादयः ४६५.

१ अलीक, २ वलीक, ३ वल्मीक, ४ वहतेर्वृद्धिश्च (ग. सू. ४), ५ वाहीकः, ६ सुप्रतीकः । (एवमन्येऽपि) । इति अलीकादिः ।

४ अश्यादयः ६१२.

१ अशित्र, २ वहित्र, ३ धरित्री, ४ करित्र, ५ वधित्र । इति अश्यादिः ।

५ अश्वादयः ७०७.

१ अश्रु (एवमन्येऽपि यथाप्रयोगमूहनीयाः) । इति अश्वादिः ।

६ उलूकादयः ४८१.

१ उलूकः, २ वावदूकः, ३ भल्लूकः, ४ शमेर्बुक् च (ग. सू. ५), ५ शम्बूकः । इति उलकादिः ।

७ उल्वादयः ५३५.

१ उल्व, २ शुल्व, ३ निम्व, ४ विम्व, ५ धन्व, ६ जम्व । इति उल्वादिः ।

८ किशोरादयः ६५.

१ किशोर, २ सहोर, ३ गौर । इति किशोरादिः ।

९ कृत्रादयः ७१३.

१ करक, २ कटक, ३ नरक, ४ सरक, ५ अलक, ६ कोरक । इति कृत्रादिः ।

१० कृदरादयः ७१९.

१ कृदर, २ मृदर, ३ सृदर । इति कृदरादिः ।

११ क्षदादयः २५०.

१ क्षत्तृ, २ क्षोतृ, ३ उन्नेतृ । इति क्षदादिः ।

१२ गुपादयः ५६.

१ गुपिल, २ तिजिल, ३ पूजिल, ४ शुपिल, ५ देविल ६ कुटिल । इति गुपादिः ।

---

७४१ अ क इतः परमधिकं सूत्रम् । छापूञ् खडिभ्यो गक् । ७४२ अ हन्तेर्घुरच् । क हन्तेः घुर । ७४३-७४४ अ क न स्तः । ७४५ अ क °रणिः । तनोतेः डउः सन्वच्च ।

१३ जत्र्वादयः ५४२.

१ जत्रु, २ शिग्रु, ३ वितद्रु, ४ कद्रु, ५ अस्रु, ६ अश्रु ।इति जत्र्वादिः ।

१४ तरत्यादयः ११७.

१ तरङ्ग, २ लवङ्ग । आकृतिगणोऽयम् । इति तरत्यादिः ।

१५ तुषारादयः ४१९.

१ तुषार, २ कासार, ३ सहार, ४ तर्कार । इति तुषारादिः ।

१६ त्रादयः ६१२.

१ तोत्र, २ लोत्र, ३ वरुत्र । इति त्रादिः।

१७ पिञ्जादयः ५२०.

१ पिञ्जूल, २ कञ्चूल, ३ लङ्गेर्वृद्धिश्च (ग. सू. ६), ४ लाङ्गुल, ५ तमेर्दुर्दीर्घत्वे (ग. सू. ७), ६ ताम्बूल, ७ शृणातेर्दुक् ह्रस्वश्च (ग. सू. ८), ८ शार्दुल, ९ डुकोः- कुक्च (ग. सू. ९), १० डुकूल, ११ कुसूल, कुकूल । इति पिञ्जादिः ।

१८ पिनाकादयः ४५५.

१ पिनाक, २ तडाक, ३ भदाक, ४ श्मामाक, ५ नभाक, ६ पिण्याक, ७ वार्ताक, ८ शुवाक । इति पिनाकादिः।

१९ फर्फरीकादयः ४६०.

१ फर्फरीक, २ दर्दरीक, ३ कर्करीक, ४ झर्झरीक, ५ तिमेर्मकारस्य उकारोऽभ्या- सस्य नुट् च (ग. सू. १०) । ६ तिन्तिडीक, ७ चरेर्नुम् च (ग. सू. ११), ८ चञ्चरीक, ९ मर्मरीक, १० कर्करीका, ११ पुण्डरीक । इति फर्फरीकादिः।

२० बलाकादयः ४२४.

१ बलाका, २ मनाका, ३ पवाका, ४ शलाका, ५ पटाक, ६ पताका । इति बलाकादिः ।

२१ मद्रुरादयः ४१.

१ मद्रुर, २ कर्बुर, ३ बन्धुर, ४ चिनोतेः कुक् च (ग. सू. १२), ५ चिकुर, ६ कोक- तेर्कुक् च (ग. सू. १३), ७ कुकुर, ८ कुक्कुर, ९ आतुर, १० वागुरा, ११ प्रत्यय- रेफस्य लत्वं वङ्केर्नलोपश्च (ग. सू.१४), १२ शकुल, १३ वकुल । इति मद्रुरादिः ।

२२ मिथिलादयः ५७.

१ मिथिल, २ गातिला, ३ तकिला, ४ चाण्डिला, ५ पाथिल, ६ शिथिला । इति मिथिलादिः ।

२३ मूलेरादयः ६१.

१ मूलेर, २ गुधेर, ३ गुहेर, ४ मुहेर, ५ कुटेर, ६ गुदेर, ७ कडेर । इति मूलेरादिः ।

२४ मृगय्वादयः ३७.

१ मृगयु, २ देवयु, ३ मित्रयु, ४ कुमारयु, ५ अध्वर्यु, ६ कुहु, ७ पाण्डु, ८ पीलु, ९ मञ्जु, १० कण्डु, ११ मृकण्डु, १२ गृह्यु, (एव, १३ निघण्टु, १४ पलाण्टु, १५ कर्करेटु, १६ करेटु, १७ पेरु, १८ डमरु प्रभृतयो- ऽप्यत्रैव द्रष्टव्याः)। इति मृगय्वादिः ।

२५ वङ्क्यादयः ५०६.

१ वङ्कि, २ वप्रि, ३ अङ्घ्रि, ४ तन्द्रि, ५ भेरि । इति वङ्क्यादिः।

२६ विडादयः ११८.

१ विडङ्ग, २ मृदङ्ग, ३ कुरङ्ग । इति विडादिः ।

२७ वृषादयः १०६.

१ वृषल, २ कुशल, ३ पलल, ४ देवल, ५ तरल, ६ सरल, ७ धवल, ८ कमेर्बुक् च

(ग. सू. १५), ९ कम्बल, १० मुशल, ११ मुसल, १२ कोशल, १३ लाङ्गल, १४ कदली, १५ कुड्मल. १६ कुटिकाशिकौ-लिभ्यः प्रत्ययस्य मुट् च (ग. सू. १६), १७ कुड्म्‌, १८ कश्मल, १९ पिङ्गल, २० सम्बल, २१ शम्बल । इति वृषादिः ।

२८ शकादयः ५२१.

१ शकट, २ वरट, ३ कङ्कट, ४ सरट, ५ देवट, ६ करट, ७ कपट, ८ कर्कट, ९ मर्कट, १० कर्पट, ११ पर्पट, १२ कक्खट. १३ चर्पट, १४ चपट. १५ मयट, (एवमन्येऽपि कट्टादयो बोद्धव्याः) । इति शकटादिः ।

इति शाकटायनप्रणीत उणादिसूत्रपाठः समाप्तः ।

शान्तनवाचार्यप्रणीतः

फिट्सूत्रपाठः

१ फिषोऽन्त उदात्तः ।
२ पाटलापालङ्काम्बासागरार्थानाम् ।
३ गेहार्थानामस्त्रियाम् ।
४ गुदस्य च ।
५ ध्यपूर्वस्य स्त्रीविषयस्य ।
६ खान्तस्याश्मादेः ।
७ वंहिष्ठवत्सरतिशत्थान्तानाम् ।
८ दक्षिणस्य साधौ ।
९ स्वाङ्गाख्यायामादिर्वा ।
१० छन्दसि च ।
११ कृष्णस्यामृगाख्या चेत् ।
१२ वा नामधेयस्य ।
१३ शुक्लगौरयोरादिः ।
१४ अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः ।
१५ पृष्ठस्य च ।
१६ अर्जुनस्य तृणाख्या चेत् ।
१७ आर्यस्य स्वाम्याख्या चेत् ।
१८ आशाया अदिगाख्या चेत् ।
१९ नक्षत्राणामाब्विषयाणाम् ।
२० न कुपूर्वस्य कृत्तिकाख्या चेत् ।
२१ घृतादीनां च ।
२२ ज्येष्ठकनिष्ठयोर्वयसि ।
२३ बिल्वतिष्ययो स्वरितो वा ।

इति फिट्सूत्रेषु प्रथमः पादः ॥

२४ अथादिः प्राक् शकटेः ।
२५ ह्रस्वान्तस्य स्त्रीविषयस्य ।
२६ नब्विषयस्यानिसन्तस्य ।
२७ तृणधान्यानां च द्व्यषाम् ।
२८ त्रः संख्यायाः ।
२९ स्वाङ्गशिटामदन्तानाम् ।
३० प्राणिनां कुपूर्वम् ।
३१ खय्युवर्णं कृत्रिमाख्या चेत् ।
३२ उनर्वन्नन्तानाम् ।
३३ वर्णानां तणतिनितान्तानाम् ।
३४ ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये ।
३५ अक्षस्यादेवनस्य ।
३६ अर्धस्यासमद्योतने ।
३७ पीतद्व्र्थानाम् ।
३८ ग्रामादीनां च ।
३९ लुबन्तस्योपमेयनामधेयस्य ।
४० न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम् ।
४१ राजविशेषस्य यमन्वा चेत् ।
४२ लघावन्ते द्वयोश्च बह्वषो गुरुः ।
४३ स्त्रीविषयवर्णाक्षुपूर्वाणाम् ।
४४ शकुनीनां च लघु पूर्वम् ।
४५ नर्तुप्राण्याख्यायाम् ।
४६ धान्यानां च वृद्धक्षान्तानाम् ।
४७ जनपदशब्दानामषान्तानाम् ।
४८ हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा ।
४९ इगन्तानां च द्व्यषाम् ।

इति फिट्सूत्रेषु द्वितीयः पादः ॥

---

५० अथ द्वितीयं प्रागीषात् ।
५१ त्र्यचां प्राङ् मकरात् ।
५२ स्वाङ्गानामकुर्वादीनाम् ।
५३ मादीनां च ।
५४ शादीनां शाकानाम् ।
५५ पान्तानां गुर्वादीनाम् ।
५६ युतान्यण्यन्तानाम् ।
५७ मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा ।
५८ छन्दसि च ।
५९ कर्दमादीनां च ।
६० सुगन्धितेजनस्य ते वा ।
६१ नपः फलान्तानाम् ।
६२ यान्तस्यान्त्यात्पूर्वम् ।
६३ थान्तस्य च नालघुनी ।
६४ शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च ।
६५ सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् ।
६६ ईषान्तस्य हयादेरादिर्वा ।
६७ उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयाहिरण्यारण्यापत्यदेवराणाम् ।
६८ महिष्यपाढयोर्जायेष्टकाख्या चेत् ।

इति फिट्सूत्रेषु तृतीयः पादः ।

---

६९ शकटिशकट्योरक्षरमक्षरं पर्यायेण ।
७० गोष्ठजस्य ब्राह्मणनामधेयस्य ।
७१ पारावतस्योपोत्तमवर्जम् ।

७२ धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् ।

७३ कपिकेशहरिकेशयोरछन्दासि ।

७४ न्यङ्स्वरौ स्वरितौ ।

७५ न्यर्बुदव्यल्कशयोरादिः ।

७६ तिल्यशिक्यमत्यकाष्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः ।

७७ बिल्वभक्ष्यवीर्याणि च्छन्दसि ।

७८ त्वत्त्वसमसिमेत्यनुच्चानि ।

७९ सिमस्याथर्वणेऽन्त उदात्तः ।

८० निपाता आद्युदात्ताः ।

८१ उपसर्गाश्चाभिवर्जम् ।

८२ एवादीनामन्तः ।

८३ वाचादीनामुभावुदात्तौ ।

८४ चादयोऽनुदात्ताः ।

८५ यथेति पादान्ते ।

८६ प्रकारादिद्विरुक्तौ ।

८७ शेषं सर्वमनुदात्तम् ।

इति फिट्सूत्रेषु चतुर्थः पादः ।

॥ इति शान्तनवाचार्यप्रणीतः फिट्सूत्रपाठः ॥